न्यायशास्त्र

अथ

भवानन्दीप्रकाशः

महादेव पण्डित प्रणीतः

श्रीगणेशाय नमः श्रीसिद्धेश्वर्यै नमः। भक्तानां त्राणकर्ता विघ्नभवमहादुःखदैन्यप्रहर्ता संहर्ता किल्बिषाणां प्रबलदितिसुतप्राणहर्ताऽ
१ गधर्ता। भक्तिपाथोधिमग्नाननतजनहृदम्भोकुंठितानां तु कर्ता धर्ता सर्वं सहायाः स भवतु भगवान् भव्यकर्ता सदा नः॥१॥ योसौ कृष्णचक्रे तर्क-
रचनाचुंचुरांतरो घन्य हाहंकारो घनिवर्हिणीकरसिकः ख्यातो धरामंडले नीमांसानिपुणोऽस्य पादकमलं भुक्त्वा समाश्लिष्य पारंगमस्तस्य श्रीशिति-
कंठदीक्षितगुरोः पादांबुजं संश्रये॥२॥ सिंदूरतवागीश्वरवचोऽनिगूढश्रीममहादेवबुधेन बुद्धं॥ तदप्येजातं च विभाव्य बुधा आलोच्य तेऽमल
रसा रितुष्टे॥३॥ अन्यौ सासकृचित्तानां विद्वत्तर्ककिलासिनां। भवानंदीप्रकाशोऽयं तनोतु मुदमद्भुतं॥४॥ कृष्णवानंदवागुंफो मंदस्समनधीः कु
चः। तथापि पत्रवज्जोहं तन्नमेशारणं ह्रिवः ५ यत्र कैरपि टीका यां विवृता नैव दीधितिः। आशायोपवनस्पष्टस्तस्यापुदंष्ट्रनैतिह ६ अनालो च
सिंदूरतवागीशवाणीपावपावरूपिनैः पंडितैर्गैरुजातैः। यदुग्रविंतु दृतमोर्जी त्रभ्लातु भोजनारजातकौ ७ गुरुदेवप्रसादेन सम्यक् भावनमाऽ
गते। यो त्रसार्थोऽस्य पांशकीदेवानां प्रियपरत्वतः ९। पघप्पस्मृतास्तपिनेष्यतिन कृतौ मम। तथापि नस्सतिस्तुष्टाभविष्यंत्येव पंडिताः १० प्रा
रिप्सितनिष्प्रत्यूहसमाप्तिकामनयाश्रीगोविंदचरणानुसंधानरूपं मंगलमाचरन्नेव श्रीगोविंदस्याभिलषितं नाम पद्यो श्रीगोविंदेति। अत्र
श्रीसहितगोविंदस्यपस्यपदस्यांभोजं श्रीगोविंदयोर्वीपस्यदां भोजानि सादि विग्रहः श्रीः लक्ष्मीः। पदांभोजेत्यत्रोपमितसमासः कृचित्पदद्वंद्वेय पा
दः नरवचंद्रेति रूपकं संचारेक्षोरितिसंचारयंति बुस्संचारेऽत्रत्यस्य स्पर्धः॥ इछपिति विं दुरिछेरिलुश्यप्रप तनिपातः। अत्र संचारेणाविषपि
व्याख्यानस्य विषमस्य निगरणादिति शापोक्तिः तन्मूलस्य धार… वर्मश्च मलसाधर्म्यं तंतमस्य घटतिश्रीधेनमसिगा हृंधकारभामतुलयंः॥ अ १
नेगां धक रेणविषमिणानि गूढार्थत्वस्य विषमस्य निगरणातगाढांधकारवा प्रदेशोनविषायेणानि गूढार्थस्यदीधितिग्रंथस्य विषमस्य नि
गरणादुग्राबंधकारप्रदेशोनविषायेण निम्हः८ तिशयोक्तिः घटितातिशयोक्तिः घटकातिशयोक्तिः मूलसाधारणधर्मश्चाविषमानवभास्य

नियन्तं घटितातिशयोक्तिमूलसाधारणधर्मस्य विषया नवभासरूपः। संक्षिनिप्रार्थनायां लोट्। श्रयणं वतमिसजहल्लिंगवेदः प्रयाताग्निसाक्षिदेकवच
नांतं। दुर्दर्चाश्रहृपार्थकसंघतमो निर्विकल्पपरं तच्च विषयावभासस्य धाषकसपर्यकमितं प्रतिष्ठं ग्रंथेतनमसि संचारे छो निरुक्तमाश्रयत्वं च दमरीची
नां नखचंद्रमरीचीनां चन्निगूढार्थदीधितिग्रंथव्याख्याने छोर्य्यं भूकर्तृविषुभावभासकत्वरूपमाश्रयत्वं स्वतोऽसंभवात्स्वमंपेजकि श्रीगोविंदेति षष्ठ्यानुग्र
हत्वात्तन्निरुक्तग्रंथकर्त्रभिलषितनिरुक्तव्याख्याननिर्वाहकस्फूर्तिविशेषसंपादकत्वे पर्यवसन्निराचं च एतस्य ग्रंथकर्त्रा श्रीगोविंदचरणानुसंधानरू
पमंगलमाचरितं श्रीगोविंदः स्वाभिलषितनिरुक्तस्फूर्तिविशेषसंपादकतया प्रार्थितः श्रीतेन च ग्रंथकर्त्रा श्रीगोविंदविषयको रत्याख्यो भावोभिव्यं
तइसेतलघ्यं भावकाव्यमित्येव ध्वनिः। अत्रेदं पद्यं बहुषु पुस्तकेषु न दृश्यते इति नैतद्ग्रंथकर्तुः पद्यं किंतु केनचिन्निक्षिप्तं जानीत च हृदः। इदानीं चक्रविघ्नध्व
कान्संप्रदायानुरोधेन वगुरुतन्नमस्काररूपं मंगलांतरमाचरं स्ते वह्निष्वावधाता यचिकीर्षितं प्रतिजानीते नमस्कृत्येति। तेन चात्र गुरूनिति कड्यच्चने
नैवाभिमतसिद्ध्यासकौतिति निरर्थकमिति वाच्यं। विद्यागुरूणामनेकत्वे न चद्रवचनत्वेन सकलविद्यागुरूणामेव पिपित्समंत्रोपदेष्टादिगुरूणामपि वि
द्यागुरुपरंपराणामापवाततस्यार्थवत्त्वात्। कचित्पुस्तके सर्वानित्यक्तस्य पाठस्तत्रात् निगूढमिसस्य विशेषणमहास्यमिति बोध्यं। श्रीभवानंदेति श्रीसहितो यो
भवानंदस्तस्य सिद्धांतवागीशः। सिद्धांतेति सिद्धांतकरणे वागीशः सिद्धांतवाचामीशः इतिवार्थः। ननु पदस्यात्मनतरूपस्य परमलत्वं न परमहत्त्वरिमाणवेलत
स्पातिप्रसक्तलात्। ईश्वरस्य परिमाणवत्वेमानाभावदुस्वादिनापदार्थविवेतुरूपमेवेश्वरंपरिमाणवत्वे न बाधा। ज्ञ्यत्वंमरमत्वं पर परमहत्परिमाणव
त्सरूपत्वे परमत्वमिसादायन्तमासंभवकृष्णेसतन्त्रा ह्रस्वत्वदीर्घत्वे कुट्टाल्मनरतिउत्कृष्टत्वमात्रस्यातिप्रसक्तत्वात् सर्वेषि संवीत्कृष्टत्वं च सर्वावधिकोत्कर्षवत्त्वं नच
परमत्वमित्यासे परमत्वाभिमतेरत्ने सर्वावधिकोत्कर्षवत्त्वासंभवः तत्रकामिन्यापावधिकोत्कर्षासंभवादितिवाच्यं। स्वसजातीयपावस्यवधिकोत्कर्षव
त्वस्यैव परमत्वरूपतया रत्नादौ पावद्रत्नावधिकोत्कर्षवत्त्वसंभवात्। साजात्यं च स्वसमभिव्याहृतपदार्थतावच्छेदकरत्नत्वादिनावोध्यं। अत्रेदं तत्वं। परम

२ पदस्योत्कर्षवाचित्वे च सर्वत्र शाब्दबोधविषयः नन्वित्थं तद्बोधेऽपि मानाभावात् परमपदस्य बहुतरसाखस सजातीयापेक्षयाधिकोत्कर्षाश्रयबो
धकत्वमिति व्युत्पत्तिस्वीकारेणैवानतिप्रसंगात् तत्तत्सजातीयत्वादिना तत्तत्सजातीयादेः परमपदस्य किं कल्पनागौरवेण परमपदजन्यशाब्दबोधीयविषयता
मात्रानुभवविरुद्धत्वेन च तादृशव्युत्पत्तिस्वीकारस्यैवोचितत्वादिति। ननु त्वेवं परमपदार्थोत्कर्षाश्रयत्वमेव फलितं। तत्रोत्कर्षो न सर्वसाधारण एकः संभ
वति। तथा हि उत्कर्षो नितावदाधिक्यं श्रयत्कृष्टरत्नादावपि परिमाणादि यत्किंचिन्निमित्तकमाधिक्यसत्त्वेन परमरत्नमित्यादि व्यवहारापत्तेः किंतु ननुगतत
त्तद्धर्मरूपः तथा क्वचिद्द्रव्यं क्वचिद्रूपं क्वचित्स्पर्शः क्वचित् क्रिया क्वचित् जातिः परमो वणिगित्यादौ द्रव्यमुत्कर्षः। परमरत्नमित्यादौ रूपमुत्कर्षः परमो वायु
रित्यादौ स्पर्श उत्कर्षः परमोऽश्व इत्यादौ क्रियोत्कर्षः। परमं ब्राह्मणमित्यादौ तारतम्यादिजातिरुत्कर्षः। न च परमशब्दस्य नानार्थता मतिः इष्यतावच्छेदकोत्क
र्षभेदादिति वाच्यं। रूढिसंबंधेनोत्कर्षपदस्य स्वरूपस्याखंडोपाधिविशेषरूपस्य वोत्कर्षत्वस्य शक्यतावच्छेदकतावच्छेदकस्यैकत्वेन तदादिपदस्येव ना
नार्थत्वाभावात्। तथा चानेन तद्भिन्नतमासंभवद्धस्तस्याह। उत्कर्ष इति। तथा चात्र पूर्वोक्तान्यतमासंभवेऽपि जगत्स्थितिस्थितिमलपकर्त्तृस्वरूप एवोत्कर्षः परम
शब्दे नोच्यत इति भावः। न चैवमुत्कर्षाणामननुगतत्वेन परमशब्दस्यानियतोत्कर्षबोधकत्वापत्तिरिति वाच्यं। तत्तादृशोत्कर्षबोधकपदसमभिव्याहारा
दर्निमामकत्वेनातिप्रसंगाभावात्। अत एवानाक्रान्तमपरमेश्वरमत्वविशेषणतावच्छेदकस्य विशेष्यतापर्यवसानं। अन्यथाभिहितोत्कर्षस्यान्यत्राप्यभावेन न
दानर्थक्यात्। तथा च परमशब्दः स्वसजातीयापेक्षयोत्कृष्टत्वेऽधिकोत्कर्षानुभवसिद्धः स स उत्कर्षस्तत्परमत्वाभिमतं तत्तत्र बोधयतीति पर्यवसितं। न च स्व २
दित्वस्य ग्राणोत्कर्षस्य स्वापेक्षिकत्वे प्रमाणाभावादिति वाच्यं। रूपादीनां रूपत्वादिनाऽन्यापेक्षिकत्वेऽपि उत्कर्षत्वेनानुभवसिद्धस्वरूपसंबंधरूपाबाधितत्वेन रूप
कत्वरूपस्यापेक्षिकत्वांगीकारात्। परमेश्वरोत्कर्षः सर्वज्ञत्वं नित्यज्ञानादिमत्त्वं जगत्कर्तृत्वं वा धर्मरूपत्वं वेति। तन्न उत्कर्षमिति हेतुगर्भविशेषणाभ्यामसंगात्। तर्हि किं
आत्मशब्दसमभिव्याहृतपरमशब्देन सार्वज्ञादिलक्षणोत्कर्षः क्वापि न प्रतीयत एवेति चेन्न। प्रमाणस्य परमात्मा न मिसादावेव न तत्प्रतीत्यभ्युपगमात्। किंचि

नुपरमत्वं न सत्त्वादिकर्तृत्वं नापि सार्वज्ञ्यादिकं परमश्रमसाधारण्याचेति कर्मधारयानुपपत्तेः। तथाहि मानुषब्राह्मणः ब्राह्मणमानुषइत्याद्यप्रयोगात् वि
शेष्यतावच्छेदकविशेषणतावच्छेदकयोः परस्परव्यभिचारित्वस्य कर्मधारयनियामकत्वेन निरुक्तपरमत्वविशेषणतावच्छेदकस्य विशेष्यतावच्छेदकात्मत्वा
व्यभिचारात् किंतु भ्रमरहितत्वं परमत्वं तस्य चक्षुरादिसाधारण्येन आत्मत्वव्यभिचारित्वसंभवः आत्मत्वस्यापि परमत्वव्यभिचारित्वं जीवस्य भ्रान्तत्वात्स्पष्टमे
वेत्याहुः। तद्दूषयति। एतन्मतेपि ॐ मितिरितिहेतुगर्भविशेषणत्वात्स्यात्। न च कर्मधारयानुपपत्तिः। परस्परव्यभिचारित्वघटकविशेषणतावच्छेदकस्य विशेष्यता
वच्छेदकव्यभिचारित्वं हि न सर्वत्र विशेष्यनिष्ठविशेष्यतानिरूपितविशेषणतावच्छेदकतया प्रतीयमानस्य विशेष्यतावच्छेदकव्यभिचारित्वं नीलोत्पलमित्या
दावसंभवात्। किंतु नानाव्यक्तिकविशेषणतावच्छेदकस्थले विशेष्यतावच्छेदकतावच्छेदकाश्रयस्य तत्तद्व्यक्तेरपि संभवन्ति परमशब्दस्योत्कर्षत्वेन तन्मनु
त्कर्षबोधकत्वात् विशेषणतावच्छेदकतावच्छेदकोत्कर्षस्याश्रये रूपादिलक्षणोत्कर्षे आत्मत्वव्यभिचारसंभवात्। किं च विशेष्यतावच्छेदकविशेषणतावच्छे
दकयोः परस्परव्यभिचारित्वं न कर्मधारयनियामकं चंदनतरुर्विंध्यगिरिर्वसंतसमयइत्यादिप्रयोगानामसाधुत्वापत्तेः किंत्वन्यतराव्यभिचारित्वमेव तस्मा
त्त्वे परमत्वव्यभिचारस्यादोषत्वात्। न चैवं मानुषब्राह्मणः ब्राह्मणमानुषइत्यादिप्रयोगापत्तिरिति वाच्यं। ब्राह्मणमानुषइत्यस्य चंदनतरुरित्यादिसमशील
त्वेन तन्न्यायेनेष्टापत्तेः। मानुषब्राह्मणइत्यादिप्रयोगापत्तेश्च उत्पलनीलमिति प्रयोगापत्तिवारणाय जातिप्रवृत्तिनिमित्तकं गुणक्रियाप्रवृत्तिनिमित्त
कं विशेषणमेवेति नियमवत् व्यापकजातिप्रवृत्तिनिमित्तकं व्याप्यजातिप्रवृत्तिनिमित्तकं विशेषणमेवेति विशेषणविशेष्यभावव्यत्यये नियमे केवल
लयनियमांगीकारेणैव वारणात्। एतेन परस्परव्यभिचारित्वं न कर्मधारयनियामकं चंदनतरुरित्यादावनुरोधात् नाप्यन्यतराव्यभिचारित्वं मानुषब्राह्मणइ
त्यादिप्रयोगापत्तितादवस्थ्यात् किंतु विशेष्यतावच्छेदके विशेषणतावच्छेदकव्यभिचारित्वमेव तन्नियामकमिति तत्प्रदायमतमपास्तं प्रमेयधूमः प्रमेयवह्नि
मानित्यादिप्रयोगानुपपत्तेश्च। न चात्र न कर्मधारयः। किंतु बहोः हिरइतिवदन्नेऽपर्यन्तकषष्ठीसमास इति वाच्यं। तथा सति चंदनतरुनीलोत्पलमित्यादावपि

पितथावत्कुं शक्यत्वेन कर्मधारयोच्छेदप्रसंगात् अनुभवस्य च ग्राह्यप्रतिनियतत्वात् तत्वस्तु तत्त्वमस्मत्तरव्यभिचारित्वनिपिन कर्मधारयनिपातकं गुणावद्धु
असेसादावनुपपत्तेः किं तु विशेषणतावच्छेदकविशेषणतावच्छेदकयोः सामानाधिकरण्यमात्रं नियामकं मानुषज्ञानमित्यादिप्रयोगापत्तेस्तु अनुपरमेव परिहृत
त्वादन्यथा भवन्मतेप्यनुपपन्नमात्रं नियामकं मानुषज्ञानमित्यादिप्रयोगापत्तेस्तु अनुपरमेव परिहृतत्वादन्यथा भवन्मतेप्यनुपपत्तिताद्वस्थ्यादिसेव सारं। अ
स्मद्रेजगतः स्थितिस्थितिमलमकर्तृत्वरूपोत्कर्षविशेषणमुखेनानुमानप्रमाणमपि सूचितं। तच्च जन्मसकर्तृकं कार्यत्वात् घटवदित्याकारकमिति तर्कत्वे
न बाधसहकृतमीश्वरमेव कर्तृत्वेन व्यवस्थापयति। एतच्च तत्त्वमस्यादिसूक्ते ईश्वरवादेऽनुसंधेयं। ननु त्वपरमात्मनः प्रसंगतं परमपदार्थतावच्छेदकोत्कर्ष
स ईश्वरे सत्येपि आत्मपदार्थतावच्छेदकस्यानतयाभावात्। न चात्मपदार्थतावच्छेदकात्मत्वजातिरीश्वरेस्तीति वाच्यं। प्रमाणाभावेन तस्याएवासिद्धेरिति चेन्
द्रव्यत्वसुखादिकं प्रति चक्षुः संयोगादिवदात्ममानसं प्रति संनिकर्षविधया तन्मनःसंयोगो विजातीयसंयोगत्वेन हेतुरिति सर्वसिद्धं तत्र कार्यतावच्छेदक
कोटिप्रविष्टतया जीकत्वनिमित्तायां आत्मत्वजातेः श्रोतासव्यवहारबलेनेश्वरे संबंधकल्पनात तस्या एव लाघवेनात्मपदशक्यतावच्छेदकत्वादीश्वरात्म
साधारणात्मत्वजातिसिद्धेरदुष्टत्वात्। अधिकं वस्तुतत्त्वमत्त्वजातिविचारेऽनुसंधेयं। केचित्तु परमात्मनद्दत्त्वात्मशब्दोऽज्ञानवद्धबाधकः आत्मत्वमात्रोपादाना
भावेनात्मशब्दस्यनानार्थत्वं छिन्नेशक्तेः। परमशब्दार्थः सर्वविषयकत्वरूपोत्कर्षः स चात्मपदार्थतावच्छेदके ज्ञानेऽन्वेति परमसुंदरस्यादौ परमशब्दस्यम ३
भिव्याहृतपदार्थतावच्छेदकनिष्ठोत्कर्षबोधकत्वस्य दृष्टत्वात् तथाच सर्वविषयकज्ञानवते इत्यर्थस्तत्कृतस्तेऽयिदा दृमात्रं। उक्तयुक्तिसिद्धात्मत्वजातेरेवात्म
पदशक्यतावच्छेदकत्वे लाघवेनानंतज्ञानानामात्मपदशक्यतावच्छेदकत्वे गौरवात् इत्थं दिक्मात्रपदार्थनिगमनविरहाच्च। किं चात्मा ज्ञानवानित्यादौ पौनरुक्त्याप
त्तिः। न च लक्षणया मानस्यात्मपदात्मज्ञानवान्निरूपकतया न दोष इति वाच्यं। निषिद्धलाक्षणिकत्वापत्तेः। लक्षणांगीकारेनाप्युपपत्तौ लक्षणाया गौरवाच्च। अकृतेऽ
मिति हेतुगर्भविशेषणस्वारस्याच्च। अन्ये तु आत्मशब्दस्यनानार्थत्वादात्मशब्दईश्वरपरो बद्धात्मत्वजातिविशिष्टपरः तत्रमानाभावात्। न च तस्मशब्दार्थतावच्छेदकं

श्चर्यमस्य जगतः कर्तृत्वादिरूपतया पौनरुक्त्यमिति वाच्यं। आकाशादिपदवद्ब्रह्मशब्दस्येश्वरे निरवच्छिन्नशक्त्यंगीकारेणास्यावेदादिरूपैश्वर्यस्य वानु
क्तत्वाच्च हेतुकत्वांगीकारेणादोषादित्याहुः। तदप्यात्मपदस्य रूढियुक्तिसिद्धत्वात्तद्विशिष्टपरत्वे नोपपन्नौ नानार्थसंकल्पनागौरवादिदोषप्रसक्तेरनेकोपेक्ष्यमिति
दिक्। अथ विशेष्यमात्रव्याख्याने विशेषणव्याख्येयं तत्रापि प्रमाद्रष्टुत्वगर्भत्वविशेषणस्य चाद्यावामिति व्याख्यातुमवतारयति। एकरूपस्येति। केवलस्येत्यर्थः। विचि
त्रसहकारिरहितस्येति यावत्। ईश्वरस्येति शेषः। विचित्रेति। विचित्रकार्यकारित्वस्य विचित्रसहकारिनियम्यत्वादिति भावः। एतेनैकरूपस्य चैतन्यादेर्ब्रह्मत्वप्रयोगा
हस्यापि विचित्रकार्यकारित्वरूपमेतदित्याशंका निरस्ता। इदमुपलक्षणम्। एकरूपस्येश्वरस्य सृष्ट्यादिकर्तृत्वे प्रमाणाभावेनास्य सृष्ट्यादिकर्तृत्वप्रतिपादकागम
विरोधोपि द्रष्टव्यः। नन्वीशस्य ब्रह्मप्रतिपादकतयानविचित्रसहकारित्वाभ्युपगत आह। ब्रह्मेति। तथा च ब्रह्मादिशरीररूपविचित्रसहकारिसत्त्वान्नोक्त
दोष इति भावः। नन्वीशशब्दस्य रूपमेतादृशार्थलाभः स्यात्तथापि हि। त्रिविधत्वावद्योतकः सकारागमं हकारस्य लोपं विधाय ततः परं। संधिं कुर्यात्सर्वरूपं ततो मोक्ष
णायेभवेदिति वाक्यरूपः। श्रवतेष्टिलोपश्चेति च शब्दः समुच्चितमनुविधायकेन सूत्रेण ज्वरत्वरस्रिव्यविमवामुपधायाश्चेति वकारस्योपधायाश्च विधायकस्त्वस
हकृतेन निष्पन्नो मन्नंतशौणादिकः। अत्र उकारादेशे सकारे रेफाः रमकारे मः। सामान्ये त्रार्थवत्वं तत्र प्रकृते न तावद्रथः तस्यार्थत्वेन लोके प्रयोगाभावात् विशेष्या
ना कास्मिन्त्वाद्व। प्रकृतार्थलाभात्। अत एव न द्वितीयः। तस्य रूपा ब्रह्मप्रतिपादकत्वेन प्रकृतार्थलाभात्। न तृतीयः। तस्मान्नव्ययत्वेन चतुर्थीलोपासंभवादे
मिट्सापत्तेः। न च स्वरादिगणतत्वात्तदव्ययत्वे बाधकाभाव इति वाच्यं। लक्षणाप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति परिभाषया अनेकसंगीकारे ब्रह्मणि
चैत्यर्थविध्यनिर्देशेन चौणादिकस्यैव स्वरादिगणतत्वादित्यत आह ओकारेति। औणादिकस्य रूपत्वेन तदलनेनैवाव्ययत्वसिद्धेः स्वरादिपाठः प्रामाणिकस्याव्य
ययत्वार्थः। अव्ययनिर्देशस्य शौ पञ्चत्वानुत्तममनुरामनुत्स्य भिन्नार्थे दुवाक्यं। विदुषपत्तेः। तथा च लुप्तचतुर्थ्यंतस्य ओमिति कौ शब्दा देवप्रकृतस्यार्थलाभ इति भावः।
अप्पत्मर्थमिकत्वायेदको दकाराघारस्यमोदवा आत्मविश्वमहेश्वराः। अंतेप्रतीयमानो यो ध्वनिर्ब्रह्मेति कीर्त्तितः इति वाक्यादेतादृवरणात्मका स्मत्तमस्तं

४ शरता दर्शनात्सोमितिपदमितिवाच्याचास्य योगरूढत्वसिद्धौ रूढ्यर्थविशेष्यकस्य परमात्मशक्यात्मा मात्रेणेन रूढ्या। नचैवमिति विधेयकोटौ योगार्थस्या
धिकस्य निवेशानुपपत्तेन रूढ्यमितिवाच्यं। तथाप्येकस्येश्वरस्य वारद्वयं भाने तु भयविरोधोऽप्यपरिहार्य एवेति चेन्न। सामासिकस्य रूढ्या भानाभावात्‌। तथाहि
तत्रैव रूढ्यर्थे योगार्थवैशिष्ट्यस्यातिप्रसक्तत्वं यथा पंकजमित्यत्र पंकजनिकर्तृत्वस्य कुमुदेऽपि सत्त्वेन पद्मत्वविशिष्टे रूढिः अत्र च योगार्थस्य तत्तच्छरीरावच्छिन्नात्म
नो न निप्रसक्तत्वे नैव विवक्षितहेतुत्वमंगीकारात्‌। उपदर्शितवाक्यस्य चरमात्मशक्यो एतादिकयोर्द्वयोः एकपदोपस्थितिकत्वरूढत्वलक्षितपादकतयाप्युपपत्तेः। वस्तुतस्तु
योगरूढत्वेऽपि न क्षतिः। निराकांक्षत्वेनात्र रूढ्यर्थस्यानन्वितत्वया योगार्थस्यैवान्वयात्‌। नच योगरूढस्थले रूढ्यर्थोपस्थापकहारितेति प्रवादानुरोधेन रूढ्यर्थसहित
स्यैव योगार्थस्यान्वयमननियमात्कथमेतदिति वाच्यं। यद्यपि पंकजमित्यादौ केवलयोगार्थस्याप्यन्वयात्तन्नियमः अपवादस्य चेवस्तुगत्या रूढ्यर्थभिन्नेऽशस्यानयो
गार्थान्वयः ईश्वरेत्यस्य रकत्वात्‌। अत एवास्य पंकजादिपदे पद्मत्वादिकं यथा योगोपाधिरित्यनेनैकवाक्यत्वं अस्तु वा योगरूढस्थले रूढ्यर्थसहितस्यैव योगार्थस्यान्व
यनियमस्तथापि न दोषः। उभयमप्यत्र तत्तच्छरीरावच्छिन्नात्मविवक्षितोऽर्थः स च योगरूढ्युभयवृत्त्या योगार्थस्तत्तच्छरीरमेव निरवच्छिन्नरूढ्यर्थ आत्मस्वरूप
मात्रं ज्ञानाकाशादिपदेति स्वच्छिन्नरूढ्यंगीकारात्‌ तच्चावच्छिन्नतानियामकसंबंधेन तत्तच्छरीरादेरन्वयः एकपदार्थयोरप्यन्वयस्य योगरूढिस्थले दृष्टत्वात्‌।
तथाहि पंकजमित्यत्र पंकजनिकर्तृत्वेन पद्मबोधवदत्र तत्तच्छरीरवत्त्वेनात्मबोधः विशिष्टस्य चाभेदसंबंधेन परमात्मशक्यार्थत्वप्रयतिनयोन रूढ्या दिक्षमा
वृत्तापि॥ केचित्तु तत्तच्छरीरावच्छिन्नात्मा योगार्थः रूढ्यर्थस्तु स्वरूपमात्रं सार्वज्ञ्यविशिष्टो वा न तु परमात्मशक्योपस्थापितः इति न योनरूढ्यादिनवा रूढ्यर्थसहित
स्यैव योगार्थस्यान्वयः इति नियमभंग रूढ्यर्थयोगार्थयोरभेदेन परमात्मशक्यार्थत्वमादिस्याद्वस्तदसत्‌। रूढ्यर्थसहितयोगार्थान्वयस्थले तयोः परस्परं वि ४
शेषणविशेष्यभावेनान्वयो न तु स्वातंत्र्येण तथा सति पंकजमस्तीत्यादिवाक्यजन्यशाब्दबोधानंतरं पद्मं पंकजनिकर्तृ न वेति संशयाभावानुपपत्तेः न चात्र
विरूढ्यर्थयोगार्थयोः परस्परमभेदेनान्वये विशिष्टस्य परमात्मशक्यार्थत्वमस्त्विति वाच्यं। अनुभवविरोधादिति दिक्‌। ब्रह्मादीनां शरीरतपादनादिति अत्रेदं बोध्यमो

मित्यस्य केवलयौगिकत्वपक्षे अकारादिपदानां तादृशशरीरविशेषावच्छिन्नात्मपरत्वात्तच्छरीरविशेषरूपपदार्थैकदेशे भेदादेरन्वयः । नच चै
त्रादिपदवज्जातिविशेषविशिष्टतत्तच्छरीरपरतया पदार्थे भेदस्य वक्तुं भवतीति वाच्यं । तथात्वे अकारादिपदार्थानां परमात्मत्वानि अयोग्यतया भेदान्वयानुपपत्तेः ।
नच भेदान्वयस्य स्वारसिकत्वमिति वाच्यं । नामार्थयोरिति व्युत्पत्तिविरोधेन तदसंभवात् । नचैतेषां निपाततया पितृपरमात्मनि भेदान्वयस्य संभवस्येवेति वाच्यं । अकारादीनां तत्त
च्छरीररूपद्रव्यार्थकत्वेन मकारस्य चादिष्वपाठेन च यादृशोसत्वदृष्टेन निपातत्वासंभवात् । नचानिपातत्वे कथमोमिति शब्दस्याव्ययत्वमिति वाच्यं । स्वरादिगणपठितत्वा
दित्यस्य पूर्वमेवादिदितत्वात् नचास्य पदार्थतावच्छेदकान्वयोस्त्विति वाच्यं । निपातरूपाव्ययपदार्थेनैव भेदान्वयस्य यत्र अन्यथा चैत्रः पुचैत्रस्सादृशव्ययोर्थैः पदार्थैकदेशिनां चैत्रा
देर्भेदान्वयापत्तेरिति । योगरूढत्वपक्षे तु अकारादिपदानां मुकुन्दशरीरात्तत्तच्छरीरप्रकर्षपरतया पदार्थभेदाद्युपपत्तिः संभवति । नच तत्पक्षे योगार्थस्य तत्तच्छ
रीरस्यावच्छिन्नतानिपातकेन भेदस्य बंधेन कथं रूढ्यर्थेऽन्वयः नामार्थयोर्भेदेनान्वयाभावादिति वाच्यं । विभिन्ननामार्थयोर्भेदेनान्वयेपि एकनामार्थयोर्भेदेना
न्वये बाधकाभावात् । अत एव चैत्रस्य नप्तेत्यादौ एकदेशान्वयभीत्या लाघवेन च नप्तृपदस्य जन्यत्वे पुंसि च एवकारवत्खण्डशः शक्तिरंगीकारस्सङ्गच्छते न
त्पक्षे चैत्रस्य निरूपितत्वेन जन्यत्वे तस्याश्रयत्वेन पुंसि तस्य पुनर्निरूपितत्वेनान्वयत्वे तस्य पुनराश्रयत्वेन पुंस्यन्वयेन चैत्रजन्यपुंजन्यपुमानिति साकारकान्व
यबोधस्यैकनामार्थयोर्भेदेनान्वयांगीकारं विनासंभवदुक्तिकत्वात् । दीधितौ नम इति । अत्र स्वापकर्षबोधानुकूलः व्यापारो नमः पदार्थः स्वपेक्षा
तदेकदेशभूतापकर्षान्वयि अवधित्वमवधिमत्त्वं वा नमः स्वस्तीत्यादिसूत्रविहितचतुर्थ्यर्थः तथा च परमात्मावधिककर्षप्रयोज्यस्वापकर्षबोधानुकूलोव्या
पार इत्यन्वयबोधः । अन्ये तु परमात्मनेत्यत्रावधित्वाद्यर्थकपंचमीप्रसक्तौ तु चतुर्थी । नच चतुर्थ्याः पंचम्यपवादकत्वात्कथमिति वाच्यं । तथात्वे विसर्गोपप
दविभक्तेः कारकविभक्तेर्बलवत्त्वानुशासनविरोधापत्तेरिति चेदत्र केचित् क्रियान्वयितादृशार्थविवक्षायामेव पंचमीति प्रकृते चतुर्थ्येवोपपद्यते इत्यपरे अस्तु सा
चतुर्थी तदपवादकत्वेनोक्तानुशासनमपि प्रायु । वस्तुतस्तु स्वावधिकोत्कर्षप्रयोजकापकर्षज्ञापनं नमस्कारः स एव नमःपदार्थः तदेकदेशापकर्षान्वयिविधिमत्त्व

५ विषयित्वं वा चतुर्थ्यर्थः तथा च ग्रंथकृदवधिकोत्कर्षवत्तया परमात्मविषयकज्ञानानुकूलोऽयं व्यापारः स्वकारकः शाब्दबोधः। ईश्वरं प्रणमन्नीसाद्य
वस्तुकृतरूपनमस्कारस्वनमादिधात्वर्थः। इयान् परं विशेषः तत्र ज्ञानस्य धात्वर्थत्वपक्ष्याप्यतयाऽऽश्वरादेः कर्मता प्रकृते च ज्ञानस्य नमःपदार्थत्वेन धात्वनुपस्थाप्य
तया न परमात्मनः कर्मता। नारायणं नमस्कृत्येत्यादौ नमःपदं तात्पर्यग्राहकं धातुरेवोत्कर्षज्ञानानुकूलव्यापारार्थकः द्वितीया चाधानूपस्थापितज्ञानान्वयि
विषयित्वं प्रत्याय्यते इति नारायणस्य कर्मतया द्वितीयोपपत्तिः। स्वर्गभुवेन नमस्कृत्येत्यादौ तु उत्कर्षज्ञानं नमःपदार्थः अनुकूलव्यापारो धात्वर्थः धात्वनुपस्था
पितज्ञानान्वयि विषयित्वं चतुर्थ्या प्रत्याय्यत इति न तत्र द्वितीयाप्रसक्तिरिति वदंति। अपरे तु अवधित्वनिरूपकापकर्षप्रकारकज्ञानानुकूलव्यापारो नमः
पदार्थः उद्देश्यत्वं च चतुर्थ्यर्थः पदार्थैकदेशेऽवधित्वेऽन्वेति। कर्तृत्वं च विशेष्यितया तदेकदेशे ज्ञाने प्रसज्जितं वेद्यं स्यात्। तथा च परमात्मत्वावधिकत्वनिरूपकाप
कर्षप्रकारकस्वविशेष्यकज्ञानानुकूलो व्यापारो नमेस्त्वबुपवबोधः नमेस्त्साध्याहारात्। अत एव गुणावत्तमात्राप्रणतस्तुतिः प्रमुदितपस्यापकर्षबोधानु
कूलो व्यापारविशेषः स तत्र नमस्कार इति मंगलवादे दीधितिचिंतामणिकारेणोत्कर्षघटितस्यस्तु नित्यमपकर्षघटितस्यैव नमस्कारत्वमुपदर्शितं संगच्छते इ
षपूर्वं वदितिमाहुः। ननु परमात्मनः सर्वस्मादुत्कृष्टत्वाद्विशेषणमनर्थकं। न च नमस्कारप्रतीतावश्यापकरूपप्रदर्शकत्वेन सार्थकं हेतुगर्भप्रथमविशेषणात्सैव तत्
प्रदर्शकत्वादित्यत आह ख्याख्यायां न स्पचेति। परमात्मन इत्यर्थः। रूपांतरमपीति। अपि ना हेतुगर्भप्रथमविशेषणपरिग्रहः। इत्थं विशेषणयोरपी स्वेवाद्य म
णांबोधः। सर्वप्राणिनइति। लापभेदेन पृथिव्यादौ कालातीते चाणसे। आसे प्राणिनि कीबाडि भूतशब्दं प्रयुक्तत इति तात्पर्यकोऽयात् भूतशब्दस्य प्राणिवाचक ५
र्व नियोज्येति नियोगःप्रेरणा। प्रवृत्त्यनुकूलो व्यापार इति यावत्। स चेच्छात्मक ईश्वरस्य लभः। धात्वर्थता वच्छेदक स्य वत्तिभाग प्राणिनोक मे ते ति धेयर्थ। प्रति
तिष्ठत इति। इत्थं सर्वे वर्तीति प्रतीकं तु तो भूमते इत्यर्थकं। तत्वीश्वरस्य सर्वप्रेरकत्वमामाभावः वैषम्यस्वनस्य तत्र लक्ष्ये सुष्टुतिः सं भवादिसत आह अंततः यैमितत इति।
प्राचांचापदिशेरणं पाशिपारे स्वमनोरेप्रवृत्तिरस्मचा। तेस स्वमप्पतिरेक प्रांतज्ञस्कार्ये प्रवृत्तिद्रु एहन्ने सेरणा हेतुत्वेन प्राद्रु शेषयो रितिस्पामेन कार्यमाने

प्रवृत्तिद्वारा प्रेरणाहेतुत्वसिद्धेः सर्वप्राणिप्रेरकत्वमीश्वरे सिद्धमिति भावः। अत एवेश्वरस्य सर्वप्रेरकत्वे श्रुतिः। अज्ञो जन्तुरनीशोऽयमात्मनः सुखदुःख
योः। ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वेति। श्वभ्रो नरकः। स्वर्गश्च भोगः इष्टानिष्टोपलक्षकौ। अत्र सर्वेत्यादि विशेषणेन सर्वप्रेरकत्वेनेश्वरसिद्धिः सूचिता।
ननु समानकर्तृकयोः पूर्वकाले क्त्वानुशासनात् पूर्वकालत्वं क्त्वार्थः। तच्च प्रागभावाधिकरणक्षणवृत्तित्वं तथा च विष्टभ्य परितिष्ठत इत्यत्रानन्व
यः ईश्वरस्य नित्यप्रागभावाप्रसिद्धेरिति चेन्न। तत्पूर्वकालत्वं हि न तत्प्रागभावाधिकरणक्षणवृत्तित्वं प्रागभावस्य सर्वत्राप्रसिद्धत्वात्। किन्तु तदधिकरणक्षण
वृत्तिध्वंसप्रतियोगिक्षणवृत्तित्वं तथा च नोक्तदोषः। ईश्वरस्याप्यधिकरणक्षणवृत्तिध्वंसप्रतियोगिक्षणवृत्तित्वस्य विष्टम्भे सत्त्वात्। केचित्तु मुख्यं प्राप्यस्व
पितीत्याद्यनुरोधात् समानकालीनत्वस्यापि क्त्वार्थत्वेन क्त्वो नानार्थत्वात् प्रकृते प्रतिसमेव क्त्वार्थत्वमुपेयमित्याहुः। तन्न यत्किञ्चित्पापकर्तृपूर्वकालत्व
स्य मुखव्यादाने सत्त्वात् सिद्धेः पूर्वकालत्वस्य सर्वसाधारण्येन क्त्वो नानार्थत्वे मानाभावात्। नहि समभिव्याहृतधात्वर्थतावच्छेदकावच्छिन्नपूर्वकालत्वबोध
कत्वं क्त्वाप्रत्ययस्येति नियमः मानाभावात् भुक्त्वा व्रजतीत्यादावसम्भवाच्च। यद्यपि पूर्वकालत्वस्यैव क्त्वार्थत्वे मुखव्यादानादिरूपस्य कालत्वं व्यादाय
स्वपितीत्याद्यप्रयोगापत्तिरिति विभाव्यते तथापि न क्षतिः। व्यादानाश्रयदेशाश्रयत्वस्य विशिष्टवैशिष्ट्यमिति न्यायेनैव बोधस्य तात्पर्यविषयत्वात् योगिक
रेणैव समानकालीनत्वलाभसम्भवात् विशिष्टवैशिष्ट्यमिति रीत्या बोधविशेष्यतावच्छेदकविशेषणयोः समानकालीनत्वभानस्यौत्सर्गिकत्वादिति दिक्।
मतान्तरमाह विष्टभ्येत्यादि वदन्तीत्यन्तेन संयोगसामान्यस्य विष्टम्भत्वे जीवात्मसाधारण्येन पोष्कपोना धापकत्वेन तत्कथनमनुपपन्नमत आह। धार
णेति। संयोगविशेषः विशिष्टः संयोगः। विलक्षणसंयोग इति भावः। तादृशलक्षणस्वरूपलाभाय धारणात्मक इति विशेषणं ननु ईश्वरे आकाशधारकत्वा
भावात् सर्वमूर्तविष्टम्भकत्वानुपपत्तिरत आह मूर्तेति मूर्तेति। तथा चेश्वरस्य सकलब्रह्माण्डादिरूपमूर्तसंयोगित्वमानानुपपन्नमिति भावः। अत एवेति
विभुत्वे सर्वसंयोगबोधकपदसमभिव्याहृतमहत्त्वेन विभोः संख्यादिवत्त्वादेवेत्यर्थः। विश्वव्यापीति। व्यापित्वं निरुक्तसंयोगित्वं तथैव ना समर्थितं। अत्र व्याख्या प्राक्प्रम

६ तस्य व्याप्तिनिरूपकत्वस्यासाद्दृश्यस्येनऽस्य भारतापातात्। प्रकृतोपष्टंभकत्वानुपपत्तेश्च विश्वस्य ह्रासिरिति। आपुच्छेतिमितिवदुपचारः बुद्धिं दर्श्यं॥न
न्वीश्वरस्य ब्रह्मांडादिधारकत्वे मानाभाव इत्यत आह। प्रयत्नेत्यादि। पतनप्रतिबंधकत्व धारणत्वं पतनप्रतिबंधकसंयोगवत्त्वं च धारकत्वं एवं च ब्रह्मांडादिप
तनं प्रयत्नवदात्मसंयोगप्रतिबध्यं पतनत्वात् पक्ष्यादिपतनवदित्यनुमानादितरबाधसहकृतादीश्वरस्य ब्रह्मांडादिपतनप्रतिबंधकसंयोगवत्त्वोसिद्धेर्धृतिं
ब्रह्मांडादिधारकत्वमिति भावः। मानांतरमाह। अत एवेति। प्रयत्नवदीश्वरसंयोगस्य ब्रह्मांडादिपतनप्रतिबंधकत्वादेवो धावेति। एतस्यैवाक्षरस्य प्र
शासने गार्गीत्यादि। प्रशासनं स्वेच्छारूपः प्रयत्न इति कुसुमांजलिव्याख्यातारः। द्यावापृथिवी इति श्रुतिः ठिकवच्चनं छंदुस्त्वनुकूले न हि द्यावापृथिव्याविसर्गः। विधृते इ
ति प्रथमा द्विवचनांतं द्यावापृथिव्योर्विशेषणं। श्रुतिरपीति। अपिनापूर्वोक्तानुमानपरिग्रहः। भगवत्त्वयोगस्येति। संयोगवत्तो भगवत इत्यर्थः। ननुप
तनप्रतिबंधकसंयोगस्य विष्टंभधात्वर्थत्वेन ब्रह्मांडादौ तत्कर्मत्वानुपपत्तिः धातोः फलावच्छिन्नव्यापारबोधकत्वे न धात्वर्थतावच्छेदकफलशालित्वा
भावात्। न च घटादेर्ज्ञानविषयित्वादिवत् ब्रह्मांडे निरूक्तसंयोगाश्रयत्वरूपं कर्मत्वमेवास्त्विति वाच्यं। तथा सतीश्वरस्यापि निरूक्तसंयोगाश्रयत्वे
न विष्टंभकर्मतापत्त्या ईश्वरेण ईश्वरं विष्टभ्नाति इतिवत् ब्रह्मांडादिरीश्वरं विष्टभ्नाति इत्यपि प्रयोगापत्तेरिति चेन्न। पतनप्रतिबंधकत्वस्य पतनानुत्पादरूपफलप्र
योजकत्वरूपत्वात् तत्प्रयोजकत्वं च दाहानुत्पादप्रयोजको मणिरित्यादिप्रतीतिसिद्धस्वरूपसंबंधविशेषः। एवं च प्रकृतधातोः पतनानुत्पादरूपफलावच्छिन्नव्या
पारबोधकतया ब्रह्मांडादीनां धात्वर्थतावच्छेदकपतनानुत्पादरूपफलान्वयितया तत्र मुख्यकर्मत्वस्यैवाच्च यत्न ब्रह्मांडादौ विष्टंभकर्मत्वानुपपत्तिः। अथेश्वर ६
स्यापि धात्वर्थतावच्छेदकपतनानुत्पादवत्तया तत्कर्मत्वापत्तिरपरिहार्येति चेन्न। ईश्वरसंयोगजन्योऽपि पतनानुत्पादो यत्र ब्रह्मांडादौ न तु ईश्वरे ईश्वरस्य संयो
गजन्यपतनानुत्पादवत्त्वं न वा ब्रह्मांडादिसंयोगजन्यपतनानुत्पादवत्त्वमीश्वरस्येश्वरस्य ब्रह्मांडादिर्विष्टंभकर्मत्वे नान्वयासंभवेनोक्तप्रयोगापत्त्यभावा
वदंतीत्यस्वरसोऽत्रावनतं च जंतु ईश्वरस्य सकलमूर्तधारकत्वाभावेनान्वयानुपपत्तिः। तेनाप्रमाणेन पतनानुत्पादेन गुरुत्वाभावस्यैव प्रयोजकत्वेन ईश्व

रसंयोगस्याप्रयोजकत्वात् अन्यथा गुरुत्वोच्छेदप्रसंगात्। मूर्तपदस्य मूर्तत्वपरत्वे लक्षणाकल्पने गौरवं च अन्येषाममप्याशयः। मूर्तपदं लक्षणया तन्मू-
र्तपरं अपि तु मूर्तत्वविशिष्टवाचकमेव आकाशतेजोवायवीनां धारणान्वयायोग्यत्वान्वयः घटेन जलमाहरेत्यादौ घटपदस्य घटत्वविशिष्टवाचकत्वेऽपि सछि-
द्रघटस्यायोग्यतया न चयात्। मूर्तपदं मूर्तपरमित्यस्याभिमूर्तपदं धारणान्वययोग्यगुरुत्वद्रवत्वकठिनत्वादिमत्परमित्यर्थः ननु लक्षणाया मूर्तत्वस्यावच्छिन्न-
परमित्यर्थस्तथैवत्वात् समीचीनमिति चेन्न। तथापि सर्वपदार्थान्वयानुपपत्तेः सर्वघटानीलादृष्टादेशिवायोग्यत्वस्य दुरुत्वात्। एतेन मूर्तपरमनुसन्निमत्वेनोपसन्निम-
त्वं ब्रह्माण्डत्वादिना अखण्डादिपरंवा। विशिष्टमपदं चाधेयस्ववृत्तसुपादानस्य स्वविशेष्यवृत्तित्वरूपसंबंधपरो हूती येतु धारणापरमित्यप्यपास्तं। लक्षणां विनैवो-
पपत्तौ लक्षणाकल्पने विशेष्यवृत्तित्वरूपसंबंधपरो हूती येतु धारणपरमित्यप्यपास्तं। लक्षणां विनैवोपपत्तौ लक्षणाकल्पने गौरवात्। मतानुसारेणेति। स्वी-
कृतमतानुसारेणेत्यर्थः। इदमिति। सर्वमूर्तानीत्यादि। तथा च मूर्तपदं यथाश्रुतमेवेति भावः। तन्नैवेति ईश्वरएवेत्यर्थः तद्व्यक्तियौगिकेति। ईश्वरव्यक्तियौगि-
केत्यर्थः। तथा चव्यक्तियौगिकसंयोगे पत्रतस्यैव तद्धारकत्वात् पास्वव्यक्तियौगिकसंयोगस्य स्वाश्रितस्य त्वेन स्वस्य च धारकत्वानुपपत्तिः एतन्मतेऽपि धारणस्य
विष्टंभमप्रयोजकत्वादिति भावः। ननु तथापीश्वराणां निरूपकाशाबस्युपगंतव्मतेन तद्धारकत्वनमतत्वेऽपि मूर्तपदस्य मूर्तत्वावच्छेदकत्वेन तत्सोपिः सत्व मनवे। नमूर्ता-
त्वकत्वादिरूपं चर्दीधितिकारसंमतं मूर्तत्वं च सर्वद्रव्यसमवायिकारणतावच्छेदको जातिविशेषः मूर्तत्वमपि तस्यैवेति पदार्थखंडने अभिधानात्। तदेवेत्यस्य
मूर्तत्वमेवेत्यर्थः। तथा चाकाशस्य मूर्तपदार्थवाच्यत्वाभावाद्दोष इति चेन्न। तथाप्युपदर्शितरीत्या तेजोवायुवाद्यपसर्वपदार्थान्वयानुपपत्तेर्दुरुद्धरत्वात्।
न चैतन्मते संयोगसामान्यमेव विष्टंभपदार्थो न तु धारणमिति। न दोष इति वाच्यं तथा सति सर्वमूर्तसंयोगित्वस्यैतरस्य धारणत्वयोकपीनाधायकत्वेन त-
त्कथनस्यानुपयुक्तत्वापत्तेः। वस्तुतस्तु आकाशमनसोरतिरिक्तत्वानंगीकर्तृमतेनेति प्रकृतेनिगमनता वरहेणस्य द्रव्यसमवायिकारणतावच्छेदकतयाऽसिद्धत्वस्य। अन्य-
त्वस्यश्रोतन्मूर्तत्वव्यवहारानुरोधेन आकाशे संबंधमात्रे कल्प्यते मूर्तपदद्रव्यत्वावच्छेदकत्वं च कल्प्यते मुख्यबाधकाभावेन लक्षणायोगात्। तथा चाकाशस्यापि मू-

७ तपदवाच्यत्वमपुत्रमेवेति दीधितिग्रंथेतदेयस्य स्पंदस्य मनापिकाररागतावच्छेदकमेवेत्यर्थो न तु मर्तेत्यमेवेति तद्येवत्वस्पर्शिति न तद्विरोधः। अन्य
था सर्वत्राकांक्षे मर्तत्वव्यवहारस्य लक्षणापेप्पपादने गौरवात् मर्तमर्तं मिति निरूपयोगानुपपत्ते श्चेतन्नाप्येकपदस्य पदवाच्यत्वलक्षणिकत्वं गौकारेति गौरवा
त्। न च मृतत्वस्य मृतत्वानां त्वकत्वेनेत्सा कमीतुल्यव्यक्तिफला हमर्तत्वं कथं जातिरिति निरिति वाच्यं। मृतत्वस्य मृतत्व आप्यत्वादेवाद्देवादिति तद्दन्तदभिप्राये
णैव चेच्चत्वस्यैवाकाशतया नत पदवाच्यत्वेनेत्युक्तं। केचित्तु शरादृनिमित्तका राले नक्तं नानांबीराघवेणमहद्यादीनां नवशादस्य मध्यापि कारणत्वेनाक्राद्दनन्त द
तिरिक्तमित्यभिप्रायेणेद मित्याहुस्तद्वृक्तं रीत्या सर्वपदार्थानन्वयाःतु पपत्तिप्रसंगैरिस्युपेक्षणीयमिति दिक्। नन्वीश्वरोनित्यसुखे मानाभावः न च नित्यं विज्ञान
मानंदं ब्रह्म आनंदो ब्रह्मेत्यादिश्रुतिभिरीश्वरे आनंदस्यैव धन्ना नत्सिद्धिरिति वाच्यं। तत्रानंदपदे नानंदजनकत्वस्य दुःखाभावस्य वा बोधनात् श्रुतिस्वरसत्
दस्य विज्ञानानंदमयो ब्रह्मत्वपभेदबोधस्य नित्यसुखस्वीकारेऽप्युपपादयितुमशक्यत्वेन यथाश्रुतत्यागस्यावश्यकत्वात् न च नित्यत्वं तानुमपि तत्सिद्धेरिति
वाच्यं। तस्य धर्मिग्राहकमानसिद्धत्वादित्यत आह। नित्य मिति। ब्रह्मेति। ब्रह्मत्वरूपनिरूपितात्स्ववृत्तिके त्यर्थः। आनंदविशिष्टस्येति। नत्वर्थौ पाद्य संपदवत्वाद
त्यादि। प्रतिपादयंतीति श्रुतिविशेषणं। प्रतिकादयती तिक्वचित्पाठः। तत्र श्रुतिः प्रतिपादयति इतिहेतोरित्यर्थः। प्रतिपादयतीति। श्रुतौ विशेषणस्य विशेष्या
न्वयिनाः न्वयस्य सुलभत्वात् अतएवाहाऽऽपापिरा स्येकहापि स्यागवासौमंत्री रागतीत्यत्र श्रुताद्वारुपपादयेत्। विशेषणतयाऽक्रपसा धनत्वबोधइतिभावः।
न च ब्रह्मविशेषणतयोपस्थितस्य नित्यसुखस्य कथमानंदेन्वयइतिविशेषणत्वेनोपस्थितस्यान्यत्राविशेषणतयान्वयइति व्युत्पत्तिर्विरोधइति वाच्यं। स्वर्गकामो ७
यजेतेत्यादौ कामनाविशेषणत्वेनोपस्थितस्यापि स्वर्गस्येतरविशेषणतया न्वयस्य सर्वसंमततत्वात्। नन्वीश्वरे नित्यसुखांगीकारे पुराणसुखपोः कार्यका
रणभावानुपपत्तिः। सुखत्वस्य नित्यसाधारणतया कार्यतानवच्छेदकत्वादित्यत आह। तथाचेति। सिद्धिनित्यसुखेइति। नित्यसुखे सिद्धे सतीत्यर्थः। ननूपासना
त्मकबोधस्योपासकनिष्ठतया परस्येतिपक्षधर्मतानुपपत्तिरत आह। स्येति। अप्रतिहतेति। नप्रतिहता इच्छा यस्येति विग्रहः श्रीहिः प्रतिहतत्वं यस्य विषय सिद्ध्य

नुपहितत्वं तत्र्यर्थस्य विशेषः सच्चतुष्टयात्मकलक्ष्यो वेत्यन्यदेतत्। स्वविषयमसिध्यनुपहितेच्छाधिकरणेच्छाश्रयायेति फलितार्थ इति बोध्यं। अत्र नमस्का
र्यस्योल्लेखः कथ्यते न तन्नमस्कारकृतो ग्रंथकारस्य नमस्कार्यविषयिणा शुभमीहितं निर्वाहकं लघुबुद्धिर्जन्यते तेन च तत्स्वरूपोऽयं परमेश्वरविषयकानुरागात्म
कभावातिशयपदस्येतत्पद्यस्य भावध्वनिरुक्तोऽलंकारश्च काव्यलिंगं समर्थनीयस्य वाक्यस्य काव्यलिंगं समर्थनमिति तल्लक्षणात्। तत्र शक्ते समर्थनीयमनेकरूपस्वर
स्याविधिविचित्रकार्यकारित्वं तत्समर्थनेन दृष्टिमुष्टिग्राह्यत्वात्मकत्वात्। नतिपादकोऽस्य हेतुत्वेन कृतमिति तत्समन्वयः। अपरे तु अत्र ओंकारादिकरूढत्वमोंशब्दः पद्यं च
र्ये ईश्वरपक्षे ओंशब्दस्य एव विशेष्यत्वं दत्त्वा निर्विशेषणानि ॐ मीश्वराय नमः परमात्मनेत्यस्य परममुत्कृष्टं पद्यगृहदाकाशस्य प्रलर्षः। यद्यादि इति मत्वा
मित्यनुसारात्परमः सर्वविषयक आत्मा ज्ञानं यस्येति वा अन्यविशेषणानि पूर्ववत्। जीवपक्षे परमात्मनेन नमस्कृत्यन्वयः। परमेश्वरयणनात्वं तरमात्मनेऽत्र
स्वरूपो न नमोऽस्मभाषिते जीवाय नमः इत्यर्थः ॐ मित्यादिविशेषणानि ॐ मीश्वराभिन्नात्मानो ह्यदशायां सा ह्यपात् सर्वो लीति सर्वात्मि भूतानि शरीराणि
पार्थिवादि। निर्विघ्नस्य तत्ताकाम्यकर्मफलभोगाय तत्तल्लोकेषु विधसकाय प्रदत्तं पापोधेतिपावत। परितः सर्वेषु लोकेषु तिष्ठते विघ्नतां नाम अरवंड इति॥ अ
र्थे उ अनवच्छिन्नप्रवाहः आनंदस्य समाधिजन्यस्य बोधः समाधिपदार्थो त्र्वास्य वस्मात्पस्य तथा मतास्य। एतासामपि योगद्धि समाधानादित्तस्य बोभि लपिम्यपि ति
एतेन शिष्यमप्रदायो परिस्थितः तथा चात्र श्लेषालंकारः तेन च जीवेश्वरयोरुपमालंकारो व्यज्यत इत्येतस्य चमत्कारमूलालंकारे ध्वनित्वमित्याहुरित्स
लमतिशयविस्तरेण मंगलाचरणानंतरं स्वस्य ग्रंथस्य चनाममप्रदर्शनीयमिति संप्रदायानुसारदर्शयति। दीधितौ अप्यपनेति। निखिलतंत्राणामिति। अ
त्रतं तत्र शास्त्र एतच्छास्त्री पर्याय परस्तेन तान चपदृतिके चितः। वस्तुतस्तु तत्र शास्त्रस्य शास्त्रपदत्वेपि न क्षतिः। शास्त्रं सर्वशास्त्रार्थोपयोगेन सकलशास्त्राध्य
यनभावना रहितस्यापि स्वशास्त्राध्ययनेनभावतास्मामेव सर्वशास्त्रार्थसारनिर्णयसंभवात्। दीधितिप्रकाशं। अंथेच। अधिचिंतामणि। चिंतामणशेर्धितामू
णि नाम कग्रंथे च तनुते विस्तारयति। तार्किकशिरोमणिः। तार्किकाणां शिरः संबधीनामि तार्किकशिरोमणिर्यथ कारस्य शिरः संबंधित्वेनोत्कर्षो विवक्षि

८ तः। उत्कृष्टा हि महिमानः शिरसि धार्यंते। श्रीमान् कांतिमान् लावण्यसमृद्धिमांश्च। तथा चोत्कृष्टेर्मणिरश्मिसंबंधेनात्मनोऽपकारं विस्तारयंतीति श्लेषा
लंकारः। नन्वत्र तार्किकशिरोमणिरिति धृतिं तनुते इति वाक्यार्थे समभ्यधीमानिति विशेषणस्य पादपूरणमात्रप्रयोजनत्वान्निरर्थकत्वं दोष इति चेदत्रोच्यते। श्रीमा
निति तस्य विशेष्यत्वात्तार्किकशिरोमणिरिति तस्य विशेषणत्वात् चोक्तदोषावतार इत्याह। तथा सति कैंकारः स्मरकार्मुकसेत्यादिमलिनतरदुराग्रह। तेऽपि वे
णुत्वेन तस्य विशेष्यत्वस्य तु वचनतात्पर्यमात्रप्रयोजनत्वस्य काव्यदोषत्वापत्तेः। अस्मिंस्तु दूषकतावीजाभावादेव नास्त मात्रप्रयोजनत्वं दोषः। तथा हि निरुक्त
स्वरूपैव तस्य दूषकतावीजं तत्रानुपजनितान्वयबोधकत्वरूपाकांक्षाराहित्यं घटमानयेत्यादौ घटीपाकमितेत्यादिशाब्दबोधानंतरं घटकर्मकानयनानुकू
लकृतिमानित्यादिशाब्दबोधानुपपत्तेः तत्र घटीपाकमितेत्यादिशाब्दबोधस्य पूर्वमेव जातत्वात्। किंतु अजनिततात्पर्यविषयतयानक्काप्यनुपपत्तिरित्याहु
स्तद्व्यसनं किंकारः स्मरकार्मुकस्येत्यादावपि विशेषणस्य न्यायांतर्भावेन शाब्दबोधस्य तात्पर्यविषयत्वमेव तद्दोषाच्छेदपातेः। तत्रैव गुणत्वेनत्यादि यथा हि धीवेन
शाब्दबोधस्य तास्मिन् विषयत्वमत्र तु श्रीमत्वांतर्भावेन शाब्दबोधस्य तात्पर्यविषयत्वमिति तस्य चरितार्थत्वान्निरर्थकत्वात्। वस्तुतस्तु। तत्रैव समस्तमात्रप्रयोजनत्वं दो
षः यत्र प्रकृतवाक्यार्थोपपत्तावपि पदके चिद्विशेषणमनुपादीयते यथा केंकार इत्यादौ ननु प्रकृतवाक्यार्थोपपत्तिजनकविशेषणोपादानेन तथा सति अघा
पित्तन्वेव यथा जनयति श्वासः प्रमाणशिक्रुः अयमुत्पन्नतिनिद्राभंजनः पद्मिनीनामित्यादावप्येतद्दोषापत्तेः। तथा चात्र श्रीमत्त्वस्य धृतिविस्तारकत्व
रूपप्रकृतवाक्यार्थोपपत्तिजनकत्वमानैतद्दोषप्रसंगो दोषोदीति दिक्। उत्तरग्रंथे इतरग्रंथोत्कर्षघोतनमत्राह। परजुष्टेति। मननेति। मनने चिंतने नास्ता धोनु ८
भूयमानो रसोऽर्थो यस्या इत्यर्थः। अत्र परिकरालंकारः अलंकारः परिकरः साभिप्रायैर्विशेषणैरिति लक्षणात्। प्रकृते च कृतिविशेषणात्ममनोदरविस्तार
कत्वसामर्थ्याभिप्रायमितितत्समन्वयः इतरग्रंथेषु रसग्रंथापकर्षघोतयन्नाह। न्याय्यमिति। अधीते कृतु जानीते नर्थ इत्यस्याधीते इत्यनेनान्वयः। यो रचिता
विरहतकिंतु तनुते इत्यनेनान्वयः। ततश्चासर्वपरंपावदधीतेत्यर्थ इति सत्रनान्वयः। कृतुकादि। तितिक्षा दूषणान्वयि यस्य त्वया मृगाणां तु सप्रिमपित्र निर्वचनी

यं विशिष्टानुमितिनिर्वंधनेहरा पास्तमिति भावः। सुधियइति संबोधनं केचनेत्यस्य विशेषणं वा। तथा च सुबुद्धीनां हि ज्ञानमेव व्यापारस्तत्कर्तृत्वं तु सर्वा
ध्येतृणामिति भावः। यद्वा केचन विशिष्टानुमितिं शिक्षेत का ज्ञानके पीत्यर्थः। तेन सुधियो व्यापारस्यास्तत्वं नान्येषां एवं च अध्ययनमात्रादेव तद्व्यापारस्य ज्ञानमित्य
स्यार्थं येन व्यापारस्याज्ञानात्कार्त्स्न्येनारपकर्षः सूचितः। अत्र पर्यायोक्तमलंकारः पर्यायोक्तं तु गम्यस्य वचो भंग्यन्तराश्रयमिति। छलस्यज्ञानात्। पदेनग
म्यं व्यंग्यविवक्षितं तस्यैव केनचिद्रूपान्तरेणाभिधानं पर्यायोक्तमित्यर्थः। प्रकृते च व्यंग्यस्यैवार्थस्य प्रकारान्तरेणाभिहितत्वमिति तत्समन्वयः। स्वग्रंथस्य निर्दोष
त्वं द्योतयन्नाह। मान्यानिति। अत्र च विशिष्टे व्याप्तिमत्त्वं मामानां कर्मसं तेषामुपपत्तिनिपुणं विभाव्येत्यस्य पापह्नवः। किं तु तेषां साक्षिसंकर्मत्वं त्वेष्वानाम
न्येषामेवेति ध्येयं। अत्र च काव्यलिंगमलंकारः। लक्षणं तु कं। अत्र चानिपुणं विभाव्येति समर्थनीयं। तच्च भावेत्यादिना समर्थितमिति तत्समन्वयइति। व्या
ख्यापाठस्तु प्रलपितत्वादीति। आदिनोपेक्षणीयत्वपरिग्रहः। ननु पूर्वापरेत्यादौ संगतिप्रदर्शनं विशिष्टे प्रतिज्ञाकरणस्य चानुमाननिरूपणे संग
तिप्रदर्शनविशिष्टप्रतिज्ञाविषयत्वलाभः वैशिष्ट्यं च समानकालीनत्वसंबंधेन विशिष्टे वैशिष्ट्यमितिन्यायेन च पक्षविशेष्यविशेष्यतावच्छेदकस्य समानका
लीनत्वसंबंधेन वैशिष्ट्यं विधेयमनालनेत्यस्यातिलकीकर्तुं वीतिसाधो सुसन्निपि हुत्वा तत्र च पूर्वापरेत्यादिफलद्वयस्य संगतिप्रदर्शने विशिष्टप्र
तिज्ञायामन्वयेन तदुभयस्य विशिष्टफलत्वासंभवइत्यतो भावार्थमाह। संगतिप्रदर्शनस्येति विशेषणान्येतादि। अनुमाननिरूपणप्रतिज्ञायाइति। विशे
ष्यरूपायामाद्यत्यादि। तुल्यार्थइति। इति भावार्थइत्यर्थः। विशिष्टस्य विशेषणविशेष्योभयानतिरिक्तत्वेन न तदुभयस्य विशिष्टफलत्वासंभवइति भावः। ए
तेन एकैकस्य प्रत्येकफलत्वेनान्वयेन मुख्यपार्थेन चकारः संगतिः यामनन्वेग छअश्नातीति तुल्यकक्ष्यान्वयापत्तिरित्यपास्तं प्रसक्तं। दृष्टान्तरीत्या सं
गतिप्रदर्शनविशिष्टप्रतिज्ञायामेव फलत्वेन समुच्चितयोरन्वयस्यान्याभिप्रेतत्वेनादोषात्। केचित्तु प्रसक्तोपजीवकत्वादिति समुदितवाक्यमेव प्रतिज्ञानी
तइति प्रतिज्ञाबोधकपदेन विवक्षितं मन्यमाना प्रसक्तत्वादिकं विशेषणान्वयानुपपत्तिः तथा चैकस्मिन्प्रतिज्ञापदार्थे तदुभयमाचयेनन्वयकार

भ॰दी॰
६
संगतिः एकदेशस्यैकवाक्यताप्रतिपत्त्यादिफलकत्वेनैव समुदायस्य तत्फलकत्वोक्तेः संगतिप्रदर्शीयचित्तसंनिधानं तु संगतिभिन्नांशप्रतिपादनद्वारा
नैकवाक्यताप्रतिपादकत्वमुक्तमपि तु तावाक्यस्य किं तु संगतांशप्रतिपादनद्वारेणैवसूचापि तु भिन्नस्याहुः। ननु संगतिप्रदर्शनस्यैकवाक्यताप्रतिपत्तिफल
कत्वे नम्रकृतोपयोगस्त्वेदृशं भवति। यद्येकवाक्यताप्रतिपत्त्यपेक्षा प्रकृते तत्र वचनानां भावद्वयं तत्राह प्रयोजनत्वामिति। तदेकवाक्यतातात्पर्येणेति पूर्व
ग्रंथीयप्रयोजनवत्तातात्पर्येणेत्यर्थः। भावइति। तथा च प्रकृते तदेकवाक्यत्वस्य तत्प्रयोजनवत्ताव्याप्यत्वेन पूर्वग्रंथैकवाक्यताप्रतिपत्तेः पूर्वग्रंथीयप्रयो
जनवत्तातात्पर्यसंपादनद्वारा तदेकवाक्यत्वप्रतिपत्तिरेव तत्प्रयोजनवत्तातात्पर्यानुरूपतया वाच्यवेदग्रंथप्रयोजनफले छावनतत्तद्ग्रंथप्रवृत्त्युपयोगित्वेनापे
क्षेति भावः। एकवाक्यत्वं लक्षयति तत्र चेति। नन्वसाकांक्षत्वोक्तावपि भागो वा मिलित्वा देवाकांक्षस्य प्रत्येकं साकांक्षत्वादेवोपपन्नतादवस्थ्यमत आह विभागो
इति। ननु पूर्वापरग्रंथयोरपि तत्सद्व्यतिरेकप्रयुक्तान्वयाननुभावकत्वरूपपरस्पराकांक्षा न संभवतीत्यत आह परस्परार्थेति। तथा च तत्समभिव्याहृतप
दार्थस्मारितार्थजिज्ञासारूपाकांक्षा निविष्टा सा च पूर्वापरग्रंथयोः संभवति अत एव वस्तुतिकरणाकृष्णनानं तरंको मे स्नाकथनेकिमससकाद्भिमसाकांक्षा
चेत्तीति भावः। तावन्मात्रं चेति। विभागे साकांक्षस्य त्वमात्रं चेत्यर्थः। स्योनमित्यादि। अस्यार्थः। हे पुरोडाश ते स्योनं समीचीनं सदनं स्थानं कृणोमि करोमि तच्च
सदनं घृतस्य धारया स्निग्धत्वेन सुशेवं सुखेन सेव्यं संपादयामि तस्मिन्सदने सीदामृते प्रतितिष्ठ अमृते भव व्रीहीणां मेधः सारभूतेति। कृणोमि
ध इति पाठः। अर्थस्तु स एव कल्पयामीत्यंतस्येति इदमुपलक्षणं तस्मिन्सीदेत्यादेर्विच्छेदे कल्पयामि किमर्थमित्याकांक्षा भवतीत्यपि द्रष्टव्यं। तेन स्वनिवर्त्याकां ६
क्षोत्थापकत्वे तत्रिकर्पाकांक्षोत्थापकत्वरूपपरस्परसाकांक्षत्वोपपत्तिः। वस्तुतस्तु प्रत्येकं निरुक्तसंबंधाघटकत्वरूपं सदनं कल्पयामि तस्मिन्सीदेत्यादिपूर्व
भागस्यान्येन परस्परसाकांक्षत्वं स्फुटमेवेत्यनेन तदुत्थाप्याकांक्षानिवर्तकत्वाद्विवक्षितं कांक्षोत्थापकत्वमत एव तु सर्वेभागा परस्परसाकांक्षत्वं तेन स्योनामिति मं
त्रे भागाकांक्षोत्थापकत्वाभावेपि न क्षतिः। अत एव तस्मिन्सीदेत्यादिमंत्रस्येव साकांक्षत्वमुपपादितं न तु स्योनमिति मंत्रस्य पूर्वापरस्यार्थत्वमेसाधुक्तिस्तक

तिपपत्त्यलाभिप्रायेणेत्य निपराक्तस्योत्पमितिमंत्रस्यानुमतवसिद्धसांकांक्षत्वस्य सम्भवादनुपपादनेपि एतत्पोक्षेत्तु तत्राऽभिप्रायविषयत्वावगमात् । निरुक्त
न्यतरत्वस्य चैवोभयंक्रमेतत्तु नो । भयंक्रमे इत्यादि साधारण्येन वक्तुमशक्यत्वात् प्रमाणान्तरविवेचनमेवेति प्रसङ्गादिचतुष्टयधर्मिकप्रमाणान्तरभेदपरिच्छेदप
वेसर्गः विभिन्नतास्यपि केपीति । न च संगते निरूपणीयनिष्ठत्वेन ग्रंथारूढत्वित्तथारूपमेतदिति वाच्यं । स्वरूपासिद्धिवारणाय स्वाश्रयप्रतिपादकत्वस्यैव हेतु
तावच्छेदकसंबंधतमात्रेण संबंधेन तस्याग्रंथारूढत्विवात् । तथेति लिंगविधयेस्यादि । एकवाक्यतापन्नयोरेवेति । एकवाक्यतापन्नप्रतिपाद्ययोरेवेत्यर्थः ।
संगतिव्यवहारेरोत्स्यस्यचोपदर्शितपरंपरासंबंधेन संगतिव्यवहारेत्यर्थः । नातो निरूपणापोरेव संगतिव्यवहारादनुपपत्तिः । अनुप्रवेशात्सं
गतिलक्षणघटकीभूतानंतराभिधानविशेषणत्वेनप्रवेशात् । संगतस्याभावात् । एकवाक्यताघटितसंगत्यभावात् । ननु संगतेरेकवाक्यताघटितत्वे न
लिंगज्ञानकालएवतद्घटकतयैकवाक्यत्वांति क्षयाप्तिद्धसाधनमिति चेदन्नगुरुचरणाः संगतिघटकमेकवाक्यत्वं न निरुक्तरूपं किंतु एकवाक्यत्वनाप
न्नपदघटितत्वत्वरूपं निरुक्तैकवाक्यत्वं च साध्यमिसाधायामौक्तदोषइत्याहुः अपरे तु संगतिलक्षणे नैकवाक्यत्वं निवेश्यं गौरवात् । किंतु हेतुतावच्छेद
कसंबंधएवनिवेश्यः । तथा चैकवाक्यतानापन्नपदघटितत्वविशिष्टस्याश्रयप्रतिपादकत्वस्यैव हेतुतावच्छेदकसंबंधतया न क्वापि व्यभिचारइत्यप
त्वेयमेतन्नीयः संगतिलक्षणे तत्संगते नियमेन ज्ञाप्यते नैवेति संगतिलक्षणाः संगतिविशिष्टधीनियामकः संबंधइतिमाहुः । तत्रैकवाक्यतापन्नप्रवेशः
संगत्यभावादित्यस्य निरुक्तसंबंधेन संगतस्याभावादित्यर्थः सामान्यत्रोक्तदोषइत्याहुः अन्ये तु भिन्नतात्पर्यकत्वरूपमेकवाक्यत्वं संगतिलक्षणेनिवेश्य
मतो न सिद्धसाधनमित्याहुः केचित्तु संगतिलक्षणे एकार्थकत्वरूपैकवाक्यत्वस्यैव प्रवेशो न तु साकांक्षत्वस्यापि । तथा चानुमानग्रंथविशेष्यकवि
शेषणविशेष्यभावापन्नसाकांक्षत्वाविशिष्टैकत्वरूपैकवाक्यत्वप्रकारकसिद्धरुद्देश्यप्रायालिंगज्ञानकालेऽवच्छेदकत्वात्र उक्तदोषइतिवदंति । परंतु अनुमान
ग्रंथत्वादिरूपविशेषधर्मप्रकारकानुमितौ तादृशसिद्धेरपायविरोधित्वान्नदोषइति तन्न । अनंतराभिधानेस्यत्तिप्रसंगवारणायतदभिधानानंतरत

भ॰ टी॰ दभिधानार्थकृतप्रापसेहेतुग्रहेविशेषधर्मप्रकारकत्विदुरवश्यकत्वात्। केचित्तु। एकवाक्यतास्थलेपि प्रसंगादिसंगतिसत्वादेकवाक्यत्वस्याप्यसं
१० नसंगतेरितिनसंगतिफलत्वमेकवाक्यताज्ञानस्यैवस्वरसतस्संगतिप्रदर्शनस्यफलत्वात् तदाहशिष्यावधानायेति। अवधानंस्वस्यसंगतत्वशंकाप्रयुक्तोन्मत्तप्रल
पितत्वोपेक्षणीयत्वशंकानिरासः संगतिज्ञानस्यासंगतत्वशंकानिरासद्वारोन्मत्तप्रलपितत्वादिशंकानिरासरूपशिष्यावधानफलकत्वात्। एवंचैतन्मतेननिरूपणाधि
षयत्वबोधिकायाः प्रतिज्ञाया अपिफलद्वयं तन्निरूपणरूपेच्छाग्रंथरूपपक्षस्यतानद्वारानुमितौतस्यैकवाक्यताज्ञानफलकत्वात्। विषयांतरसंचारविरहस्य
पृष्ठिशिष्यावधानफलकत्वाच्च। संगतेरेकवाक्यतानुमितिफलकत्वेप्रतिज्ञायास्तत्फलकत्वं संगतिशिष्यावधानफलकत्वेप्रतिज्ञाया अपितत्फलकत्वमिति
कैकस्यफलद्वयपरः पूर्वापरेत्यादिग्रंथद्वयमाहुस्तस्मत्तात्पर्यदर्शितरीत्या संगतेरेकवाक्यताव्याप्यत्वेनैकवाक्यताज्ञानस्यसंगतिफलत्वसंभवात्। तत्प्रयोजन
कताज्ञानानुरोधेनतदेकवाक्यताज्ञानस्यभवतोप्यावश्यकत्वाच्च। अवधानपदस्योन्मत्तप्रलपितत्वादिशंकानिरासपरत्वेगौरवाच्च। अतएवावधानंप्रवृत्ति
स्तस्यचोन्मत्तप्रलपितत्वादिशंकानिरासद्वारासंगतिप्रदर्शनफलत्वं विषयांतरसंचारनिरासादिद्वाराप्रतिज्ञाफलत्वंशेषंपूर्ववदित्यपिपरास्तं। तथाप्युन्मत्त
प्रलपितत्वादिशंकानिरासादेरेवफलत्वकल्पनौचित्यात्। नचतस्यद्वारत्वेनप्रांपीतिकशिष्यप्रवृत्तेरेवफलत्वमुक्तमितिवाच्यं। तथासत्येकवाक्यताज्ञा
नस्यापिद्वारत्वेनापाततोपिसंगतिप्रदर्शनफलत्वकथनापत्तेः। अवधानशब्दस्यप्रवृत्त्यर्थकत्वेविवादाच्च। एतेनसंगतिप्रदर्शनप्रतिज्ञयोरेकवाक्यता
प्रतिपत्तिद्वारत्वेनफलंप्रवृत्तिरूपशिष्यावधानंचप्रधानफलमित्येकैकस्यफलद्वयमुक्तमित्यपिनिरस्तं। एकवाक्यताप्रतिपत्तेर्द्वारत्वेनफलत्वबहिष्कर्णात १०
रसंचारराहित्यादेरपिद्वारत्वेनप्रतिज्ञाफलत्वात्तदकथनेनन्यूनतापात्ताच्च। अपरस्तुपूर्वापरेत्यादेः प्रकृतंतंत्ररोमेधप्रयोजनात्तथाहि। पूर्वःप्रसक्तनिरूपणात्मक
कः अपरश्चोपमानश्रुतिनिरूपणात्मकोपेचिंतामणेरुपग्रंथभागस्तेरनुमाननिरूपणात्मकस्यचिंतामणेरुपवर्ग्यग्रंथस्यप्रक्रमस्यनापास्यचैकवाक्यतावजन्या
वांतरवाक्यार्थज्ञानद्वाराएतज्ज्ञानाधीतरवाक्यार्थज्ञानजन्यचिंतामण्यात्मकमहावाक्यार्थज्ञानजनकत्वरूपातत्प्रतिपत्तिःशिष्यावधानंचसंगतित्वेनसंगतिप्रदर्

नफलं संगतिं प्रदर्श्य पत्तिस्तस्य संगतित्वेन संगतिं प्रदर्शयन्ति तस्यार्थः अर्थैक्यादिति जैमिनिसूत्रेऽपि एककार्यकत्वं स्वजन्यावान्तरवाक्यार्थज्ञानद्वारा महा
वाक्यार्थज्ञानजनकत्वमेव प्रतिपत्तिश्च श्रूयमाणमानसंवादहानेः। नह्येवं संगतित्वेन संगतिप्रदर्शनं फलवत् शाब्दबोधात्मकैकवाक्यताज्ञानेकर्थसंगतित्वेन
संगतिप्रदर्शनं फलवन्मितिचेत द्वे हि प्रमाणमस्तोपजीवकत्वादिति पंचम्यर्थः ज्ञानजन्यजिज्ञासाप्रयोज्यत्वं तस्य च वर्तमानप्रयत्नसाध्यानंतरं निरूपणोद्यत्व
र्थेन्वयः निरूक्तं पंचम्यर्थोपि स्वघटकजिज्ञासाजनकानुमानत्वधर्मितावच्छेदककानुमानज्ञानगतेष्टसाधनत्वज्ञानविषयानुमानज्ञानगतेष्टसाधनतानिरू
पकस्येष्टस्य पर्यालोचनेन महावाक्यार्थप्रतीतिलक्षणोपस्थितेकस्मीजनेलाघवादस्याप्योगान्महावाक्यार्थप्रतीतिलक्षणेष्टनिरूपितानुमानज्ञानगत
साधनताज्ञानजन्यजिज्ञासाप्रयोज्यत्वपर्यवसितः नस्य चानुमाननिरूपणान्वये निरूक्तैकवाक्यतोपपत्तावच्छेदकतया भासते वाक्यसमन्देहो हि हि श्रुत्व
स्वार्थप्रतीतिमात्रजनकत्वद्वारा महावाक्यार्थप्रतीतिजनकत्वस्य प्रकृते चानुमानग्रंथस्य महाप्रावन्यन्मकुमहावाक्यावयवत्वेन स्वार्थप्रतीतिमात्रजनकत्वबाधेन
तद्वारा महावाक्यार्थज्ञानजनकत्वरूपैकवाक्यत्वस्य प्रकारतया भानात्। घटेन जलमाहरेत्यादौ घटे जलाहरणकरणत्वान्वये सच्छिद्रत्वबाधेन छिद्रेतरत्वस्य प्र
कारतयाभानवत्। तदर्थमेव चोपजीवकत्वेन वर्तमानप्रयत्नसाध्यानंतरनिरूपणान्वितपंचम्यर्थनिरूक्तस्य धर्मलक्षणसंगतित्वस्य प्रदर्शनं। नचनिरूक्तपंचम्य
र्थस्योपजीवकत्वे सत्वेन कथं तत्र संगतित्वस्य प्रदर्शनमिति वाच्यं। नज्ञानजन्यजिज्ञासाप्रयोज्यत्वस्य निरूपणान्वये सामानसंवित्संविधानघतया निरूपणप्रयो
जकजिज्ञासाजनकज्ञानविषयत्वस्यापि तत्रान्वयात्। नचतथापिजिज्ञासाजनकानुमानत्वधर्मितावच्छेदककानुमानज्ञानेष्टसाधनताज्ञानविषयत्वस्य
प्रमुपजीवकत्वे इतिवाच्यं। तत्प्रयोजकज्ञानविषयत्वरूपपारिभाषिकविषयत्वस्योपजीवकत्वे सत्वात् संगतिलक्षणोप्य संभवनिराशापत्तेर्वविषयत्वस्य
प्रवेशात्। जनकपदस्येव प्रयोजकत्वपरत्वाद्वा तत्प्रयोजकत्वं च निरूक्तानुमानज्ञाने इष्टसाधनताज्ञाने निरूक्तानुमानज्ञानज्ञानं जनकं तज्ज्ञानुमानत्वप्रकारेणानुमा
नज्ञानं। तत्रानुमानत्वसामान्यकं तत्रानुमानसंबंधितावच्छेदकप्रत्यक्षत्वप्रकारकज्ञानं तत्सहकारीतदुद्बुद्ध उपजीवकत्वरूपप्रत्यक्षसंबंधोद्बोधसंस्कारस्तज्जनकं च प्रस

क्षोपजीवकत्वरूपसंबंधज्ञानमित्येतादृशप्रणाल्याः वक्ष्येयं । शिष्यावधानेकथंसंगतित्वेनसंगतिप्रदर्शनफलत्वमितिचेत्संगतिर्विघटकत्व
मावर्त्तमाननिरूपसाज्ञानादित्यवेहि । निरूपणस्यैवोक्तैः शब्देनप्रतिपादनलक्षणप्रतिज्ञातुनिरूपणघटितसंगतित्वज्ञानोपयुक्तप्रदर्शयन्निति
हेत्वर्थकेनशानच्प्रत्ययेनतस्याः संगतित्वेनसंगतिप्रदर्शनहेतुत्वेऽधनादित्याकूतः । तदपिनमनोहरंयोग्यतायाः प्रकारतयाशाब्दबोधानस्यनैयायि
कासंमतत्वात् । उपदर्शितरीत्यैवोपपत्तौयोग्यतावच्छेदकस्यशाब्दभानप्रयोजकेतरविशेषबाधादित्यसुरसत्वानमग्नीकल्पनाप्रयासवैयर्थ्याच्च । पदस्ये
कवाक्यताप्रतिपत्तिरनुमित्सात्मिकासंगतिप्रदर्शनफलंएवंशिष्याणामवधानेशिक्षात्मकेतत्फलत्वंमंगलप्रदर्शनफलत्ववदिति । तदप्यवधान
पदस्यस्वरसात्पूरपेक्ष्यमितिदिक् । असत्वादिति । आद्यवसत्वादित्यर्थः । प्रलपसेतीतीतिप्रलपसेत्यादीतीत्यर्थः । अनुचितइतिव्याख्येयग्रंथस्यस्वरसंवलि
तस्यैवधारणासंप्रदायसिद्धमितिभावः । यत्तुदीधितिकृतैवव्याप्त्यनंतरंपक्षधर्मतानिरूप्यतेइतिचिंतामणिग्रंथस्यव्याप्तीतीतिप्रकारेणधृतत्वाच्चाप
नियमः परंत्वनियमः क्वचिदेवक्वचिदन्यथापिधारणमितितदसत् । तत्रव्याप्तिरूपणानंतरमितिसंप्रदायसिद्धपाठाभिप्रायेणव्याप्तीतीतिप्र
कारेणधारणात् । केचित्तुप्रलपसेतीतिपाठनिर्देशोऽप्रलक्षानंतरंक्षिप्यतेऽकारणतप्रलक्षपदस्वत्वेननत्यतीकभ्रमापत्तिरितिप्रलपसेतीतिपाठनिर्देशादृत्ता
हुः । नचतथाप्यौकारगृहीतप्रलपसितीतिप्रतीकधारणमेवकुतोनकृतमितिवाच्यं । प्रलक्षावितीतिश्रुतौकारसहितंपरित्यज्यतदेकदेशस्यजनघटितस्य
वृत्त्यानिष्कृष्यधारणेप्रमादाधिक्यापत्तेः नचप्रलेतीत्येवकुतोनोक्तमितिवाच्यं । प्रलेत्यस्यार्थसंगत्वात् । यदैकदेशोहिसः प्रलपसोइतितुप्रलसेतिवल ११
दमेव । प्रलक्षपदगतअकारोहिवृद्धकारेपरेऔरूपतांप्राप्तः । सुध्युपास्येत्यत्रईकारइवअचिपरेयकारभावं । यदिचतत्रयकारोवर्णांतरंतर्हिहापिउ
कारेवर्णांतरपरंनतत्रसुध्युपास्येवयथासुधीशब्दःअचिपोस्तिश्रवणप्रयोगात्तथेहप्रलपसाधेदृश्येवप्रलक्षशब्दःदर्शनपरेऽत्रव्यतत्वेबभ्यासोगादितिपरेतुयथा
सुध्युपास्यादिपदसमस्तमेवसुधीकर्णकोपासनाविषयादिरूपविशिष्टार्थेशक्तंतथाप्रलसेत्युपजीवकत्वपदसमखंडमेवप्रलक्षकार्यत्वरूपविशिष्टार्थकमितिस

वैसर्ग्यपद्यादेशा इति मतानुसारेणोक्तः तदनुभवविरोधादिग्रस्ततया प्रयोजकतरमेव प्रत्यक्षविती तीति प्रत्यक्षविसादीतीत्यर्थः क्वचित्तथैवपा
ठः इति शब्दः स्वरूपपरः। एतस्य च प्रतिजानीत इति क्रियाविशेषणत्वेनान्वयः सर्वत्र प्रतीकस्य क्रियाविशेषणत्वेनान्वयस्य व्युत्पत्तिसिद्धत्वात्।
एवं च पूर्वापरग्रंथैकवाक्यता प्रतिपन्नपूर्वी शिष्यावधानार्थी चायं प्रत्यक्षचिन्तामणिमित्रसंगतिप्रदर्शनविशिष्टानुमाननिरूपणविषयकप्रतिज्ञानकर्त्रे
ति समुदितान्वयबोध इति भावः। उभयपत्रैवमप्रतिपत्तिप्रमाणापेक्षेयं। तत्प्रदर्शनेति। संगतिप्रदर्शनेत्यर्थः। अत्र प्रत्यक्षपदं स्वरूपे प्रतिगनमस्वंप्रत्यक्ष
मिति योगिकं फले च रूढं अनुमानपदं करणव्युत्पत्त्या स्वरूपपरं भावव्युत्पत्त्या फलपरमिति। तयोर्भयत्रफलस्य संगतिप्रदर्शनपरत्वमवसेयं। अत एवानि
रूपणक्रमनियामकत्वेन फलयोः स्वरूपयोश्च संगतेराकांक्षितत्वादेव। जिज्ञासायां योग्यत्वादिति। स्वरूपयोः कार्यकारणभावः किं प्रत्यक्षकार्यमितिज्ञा जि
सायामुपयुक्तः फलयोः कार्यकारणभावस्तु किं प्रत्यक्षफलोपजीवकफलकमिति जिज्ञासायामुपयुक्त इति भावः। केचित्तु। स्वरूपयोः कार्यकारणभा
वः साक्षाज्जिज्ञासायामुपयुक्तः फलयोः कार्यकारणभावस्तु परंपरया साक्षात्कारत्वानुमितित्वयोः कार्यकारणभावेऽपि हि तयोः साक्षात्कारत्वकानुमानेनप्रत्यक्ष
कार्यत्वेन जिज्ञासासंभवादिति भाव इति वदंति। आकुर्वत्स्वरसो ज्ञानंतरंपीजंतु फलयोः कार्यकारणभावस्यापि उक्तप्रकारसाक्षात्कारोपयोगसंभवे परंपरयो
पयोगवर्णनानौचित्यं उभयमत्रापि संगतेराकांक्षितत्वेन तत्प्रदर्शनेनानंतरतापत्तिश्च न च प्रत्यक्षस्वरूपनिरूपणानंतरमनुमितेः प्रत्यक्षफलनिरूपणानं
तरमनुमानस्वरूपस्य च निरूपणात् स्वरूपफलयोः फलस्वरूपयोश्च संगत्योराकांक्षितत्वेन तत्प्रदर्शनेन भवन्मतेऽपि न्यूनतातादवस्थ्यमिति वाच्यं स्वरू
पत्वेऽप्यनुक्तसमुच्चायकचकारेण तस्याप्युपलंभात्। यन्नु तथा सति फलतः स्वरूपतश्च तुल्यत्वे चार्थफलस्वरूपयोरभेदान्वयप्रसंग इति तत्र। आकांक्षाघभा
वे नैवाभेदान्वयवारणसंभवात्। अत एवेति। संगतेरनंतराभिधानव्याप्यत्वादेव। उपजीवकत्वादिति। उपजीवकं विसत्वुक्तेत्यादि। वह्निमान् धूमादित्या
दावितत्ज्ञानतत्ज्ञाप्यसंबोधकयोः पंचम्याप्रत्यक्षोपजीवकत्वेऽनंतराभिधानव्याप्यत्वलाभादिति भावः। आहेति। यद्यद्युपजीवकं तत्तन्निरूपणानंतरं निरूप्यमि

भ॰टी॰
१२

तिव्याप्तेरव्यभिचारादिभावमाहेत्यर्थः। विशिष्टप्रत्यक्षमेव कुतो नोक्तमिति वाच्यं। तथा सत्यनुमितिमात्रपरामर्शस्यापि विशेषणाधीत्वेन साधारण्याल्लाभा
तापत्त्यादिपदद्वयमनुमित्यात्मकविशेषदर्शनजन्यविपरीततत्वानुमानत्वप्रसंगः सौरभानुमितिजन्यसौरभविशिष्टप्रत्यक्षं चेति तत्र। विशेषदर्शनहेतुत्वस्य दी
धितिकारेण संमतत्वात्। सौरभानुमितिमात्रपरामर्शस्याप्युपजीव्यत्वेन साधारण्यात्। न तु क्वचिदुपजीवकत्वदर्शनेनैव व्यभिचारसंभवादादिपदद्वैयर्थ्य
मिति चेन्न व्यभिचारदर्शायत्तदुपादानात्। केचित्तु। अनुमिनोमीति प्रत्यक्षमप्यनुमानोपजीवकमिति ग्रंथेनानुमित्यनुव्यवसायेनानुमित्युपजीवकत्वं साध्यं
भोभोक्तं तिरस्कुर्वन्नाहानुमित्यनुव्यवसायादेरिति। अनुमित्यनुव्यवसायस्यानुमिनोमीत्याकारकस्यादिरनुमितिनिर्विकल्पकमेव तत्त्वेस्यर्थः। न तु साक्षिभो
मोक्तं ग्रामविशिष्टलौकिकप्रत्यक्षविशेषणस्य हेतुत्वे मानाभावात्। अलौकिकप्रत्यक्षस्य द्रव्यविशेषणतानन्तर्भावाभिप्रायेण चविशिष्टलौकिकप्रत्यक्षतन्मयोः क्रि
ष्टिरितिभावइत्याहुः। अन्ये तु प्रत्यक्षे विशेषणस्य हेतुत्वे मानाभावादादिपदोपादानमित्याहुः। अयं घट इति प्रत्यक्षे घटत्वादिप्रत्यक्षं। ननु दीधितौ न सर्वा
प्रत्यक्षप्रमितिरित्यर्थस्यानुपपन्नं। अनुमित्यनुव्यवसायादावनुमित्युपजीवकत्वेन सकलप्रत्यक्षप्रमितानामनुमित्युपजीवकभेदसत्वेनायोग्यताहि। न च प्रत्य
क्षप्रमितिवृत्तिपावच्छेदेनानुमित्युपजीवकभेदस्य साध्यत्वमिति वाच्यं। प्रत्यक्षत्वे धर्मस्यावच्छेदकत्वानुपेमितोक्ताभावानंगीकारपक्षेणासंभ
वादिति चेन्न। प्रत्यक्षप्रमितिवृत्तिपावत्वसामानाधिकरण्यस्यानुमित्युपजीवकभेदे सत्वेनानुपपत्त्यभावात्। अथानुपयोगिविशिष्टावच्छेदेनैव तन्नो भा
वबोधकत्वमन्यथा द्रव्यं न रूपवदित्यस्यापि प्रयोगापत्तेः। रूपवद्भेदद्रव्यत्वसामानाधिकरण्यादिति चेन्न। सर्वं द्रव्यं न रूपवदित्याद्यनुरोधेन व्यासज्यवृत्तिध १२
र्मविशेषितानुयोगिकाभावबोधे तथानियमानंगीकारात्। न च तथापि उद्देश्यतावच्छेदकव्यापकविधेयव्याप्यधर्मान्तिकधर्मस्यैवमस्यैवोद्देश्यतावच्छेद
कतया प्रत्यक्षप्रमितित्वव्यापकपक्षप्रत्येषां विधेयीभूतानुमित्युपजीवकभेदव्याप्यत्वाभावादनुपपत्तिता द्वव्यस्थामितिवाच्यं। घटोविभिन्नत्वस्यानुपपत्त्यै
न क्वचिदेकांशपरित्यागेपि विरोधाभावेनात्र विधेयव्याप्यत्वमानानंगीकारात्। अत एव सर्वं द्रव्यं न रूपवदित्यादावप्युक्तरीत्या नानुपपत्तिः। केचित्तु न

त्रूपदं ऽत्रापि तावच्छेदकसामानाधिकरण्येनेत्यर्थबोधकमिति सर्वं पदं तात्पर्यग्राहकं। पक्षा। सर्वे पदार्था मेदप्रतियोगितानवच्छेदकत्वरूपं व्यापक
त्वं प्रत्यक्षप्रमितेस्तदेकदेशे मेदेऽन्वयः स्फुरतीत्यवेधि ज्ञानं। व्यापकत्वस्य नञर्थप्रतियोगितया तस्य चाप्रत्यक्षतया तथा पदार्थैकदेशानुमित्युपजीवक
त्वे। तथा च मस्य प्रत्यक्षप्रमितिनिष्ठमेदप्रतियोगितानवच्छेदकत्वाभाववत्त्वमित्युपजीवकत्ववती प्रत्यक्षप्रमितिरिति निष्कृष्टो बोधः। अथवा सर्वपदं व्यापकता
तावच्छेदकावच्छिन्नार्थकं प्राप्नोतु तथापदार्थो न्वयः। तथा चानुमानात्मसंबंधेनानुमित्युपजीवकव्यापकतावच्छेदकावच्छिन्नभिन्ना प्रत्यक्षप्रमितिरिति निष्कृष्टबो
धः। भयादिति हितत्वाघटत्वादिप्रत्यक्षे अनुमित्युपजीवकत्वाभावादित्याशयः। अनुपपत्तिरेव मन्यत्रापीत्याहुः पक्षादीति। आदिना साध्यहेतुपरिग्र
हः। गुरुत्वादित्यादाविति। आदिना घ्राणरूपपरिग्रहः। व्याप्यादीति। आदिना पक्षधर्मतापरिग्रहः। पतनादीति। आदिना तुटिपरिग्रहः। गुरुत्वादीति।
आदिना घ्राणुकपरिग्रहः। परंपरयावतीति। वा कारो ऽव्यवस्थितविकल्पार्थः। तथा च क्वचित्साक्षात्क्वचित्परंपरया व्याप्यादिप्रत्यक्षनिरूपितोपजीवक
तात्पर्यमित्यर्थः। अथ मनः संयोगात्मकप्रत्यक्षफलनिरूपितसाक्षादुपजीवकत्वस्यानुमितित्वावच्छेदेन सत्त्वात्परंपरयेत्यफलमिति चेन्न। मन
सोवच्छिन्ननिरूपणानंतरं स्पर्शवच्छिन्नस्य निरूपणं तदुभयावच्छिन्नमनोरूपजीव्योपजीवकभावस्यैवासंगतत्वात्प्रकृते च प्रत्यक्षप्रमितित्वावच्छिन्ननि
रूपणानंतरमनुमितित्वावच्छिन्ननिरूपणामिति प्रत्यक्षप्रमितित्वावच्छिन्ननिरूपितोपजीवकत्वस्यैवासंगतित्वपर्यवसानात्। मनः संयोगस्य प्रत्यक्ष
प्रमितित्वानवच्छिन्नत्वात्। मुनिनेति। मुनिना गौतमेन आदृतः। तात्पर्यविषयीकृतः प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानीति विशेषोद्देशकरणा
त्। उद्देशक्रमे ऽपि संगतेरेव बीजत्वात्। अथ मुनिनेत्यादृतोपजीवकत्वादेरस्त्वस्यादृष्टत्वे ऽपि प्रकृतग्रंथे किमायातमिति चेन्न। मन्येः स्वांगत्वेप्स
प्रयोजनवत्त्वेनादृष्टत्वात्तस्य चादृष्टत्वेन तदंगस्यापि तस्यादिति मुख्यतस्तत्त्वेनैव संगतेरभिधेयत्वात्स्वचकवृत्तितादादरेणानदनुमन्तेर्मणिकृतास्यापि तदादर
त। अत एव मणिकारेण मामणीकृतस्तद्बोधनायैवमुपादानाभिधानं केचित्तु मुनिना मन्त्रशास्त्रोपार्वर्गत्वाद्मणिकारेणेत्याहुः। ननु उपजीवक

१३ तायामेव अनंतराभिधानप्रयोजकत्वेनोपजीवकतोत्कर्षस्य पुरस्कृतत्वानुपपत्तिः। उपजीवकतोत्कर्षस्योपजीवकतावच्छेदकत्वेनोपजीव
कतोत्कर्षस्य स्वोपमितिविरहमात्राधिकरण्यानुपपत्तिश्चेत्यत आह उपजीवकतोत्कर्षेत्यादि। केचित्तु नवीनमतानुसारेण प्रत्यक्षफलत्वेत्यादि
ग्रंथः तत्त्वनंतराभिधानस्याप्यसंगतिरिति प्राचीनमतमनुसृत्य। तथाहि। नन्वनुमितेः प्रत्यक्षप्रमित्युपजीवकत्वं यत्प्रत्यक्षप्रमितेरप्यनुमित्युपजीव
कत्वेन प्रत्यक्षप्रमित्यनंतरमनुमितिनिरूपणे किं विनिगमकमिति तद्दूषयितुमाह प्रत्यक्षफलत्वेत्यादि। तथा चानुमितिनिरूपणोत्तरं प्रत्यक्षप्र
मितिनिरूपणेनुमाननिरूपणानंतरं प्रत्यक्षप्रमाणनिरूपणे अनुमानोपजीवकत्वादनुमानानंतरं प्रत्यक्षं निरूप्यत इति वक्तव्ये तस्य च संगति
पूर्वदर्शितत्वं न संभवति अनुमित्युपजीवकत्वस्य प्रत्यक्षप्रमितित्वाव्यापकत्वेन प्रत्यक्षप्रमितित्वावच्छिन्ननिरूपणे संगतित्वासंभवात्। सामान्यध
र्मप्रकारकज्ञानस्य तद्विशेषधर्मप्रकारकजिज्ञासाप्रसवहेतुत्वेनानुमित्युपजीवकत्वज्ञानस्य प्रत्यक्षप्रमितित्वरूपतदवांतरधर्मप्रकारकजिज्ञासा
जनकत्वासंभवात्। सामान्यविशेषभावस्य व्याप्यव्यापकभावानतिरेकादिति भावः। नन्वेवं प्रत्यक्षप्रमित्यनंतरमनुमितिनिरूपणेपि अनुमिति
निष्ठप्रत्यक्षप्रमित्युपजीवकत्वं संगतिर्न स्यात्। आकाशसंयोगव्याप्यगुरुत्ववान्परमाणुरित्याद्याकारकानुमित्यात्मकपरामर्शजन्यानुमितौ प्रत्यक्षप्रमि
त्युपजीवकत्वाभावेन प्रत्यक्षप्रमित्युपजीवकत्वस्यानुमितित्वाव्यापकत्वादत आह। अनुमितिपरस्त्विति। तथा चानुमित्यात्मकपरामर्शजन्यानुमितावपि
परंपरया प्रत्यक्षप्रमित्युपजीवकत्वान्न दोष इति भावः। ननु तद्धर्मावच्छिन्ननिरूपणे तद्धर्मसामानाधिकरण्येनोपजीवकत्वं न संगतिः किंतु तद्धर्मा
वच्छेदेनोपजीवकत्वमेवेति कुत इत्यत आह पुरस्कृतत्वेति। यथानुमितित्वावच्छेदेनोपजीवकत्वरूपोत्कर्षः स त्वथाभिन्नक्रमः प्रत्यक्षप्रमितिनिष्ठप्र
त्यक्षत्वसामानाधिकरण्येनानुमित्युपजीवकत्वव्यावर्तकः। तथा चानुमितित्वव्यापकोपजीवकतोत्कर्षेणानुमितित्वावच्छिन्ननिरूपणप्रयोजकजि १३
ज्ञासाजनकज्ञानविषयत्वरूपसंगतिपदार्थतावच्छेदकत्वं तत्पुरस्कृततः। ननु प्रत्यक्षप्रमितिनिष्ठप्रत्यक्षत्वसामानाधिकरण्येनानुमित्युपजीवक

त्वरूपः प्रत्यक्षप्रमितित्वावच्छिन्ननिरूपणप्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपसंगतिप्रदर्शकतावच्छेदकाभावादित्यर्थः तथाचा
ज्ञावच्छेदकावच्छेदेनोपजीवकत्वस्य संगतिप्रदर्शकतावच्छेदकत्वं तत्पाससंगतित्वसामानाधिकरण्येनोपजीवकत्वस्य तदभावान्न संगतित्वमि
तिभावः ननु सामानाधिकरण्येनोपजीवकत्वेपि कुतो न संगतिप्रदर्शकतावच्छेदकत्वं तत्प्रकारकज्ञानस्य तत्सामानाधिकरण्यधर्मप्रकारकजि
ज्ञासां प्रतिहेतुत्वमभ्युपगम्यापि तत्र जिज्ञासाजनकत्वघटितसंगतिमद्रूपकतावच्छेदकग्रहसंभवादित्याशंकायामाह हल्लक्षणे इति हेतुगर्भवि
शेष्यपदं तथाच स्वरूपसंबंधरूपत्वावच्छेदकताकावच्छिन्नकार्यतादिग्रहस्य स्वनिष्ठत्वावच्छेदकव्यापकताग्रहनियतत्वेन प्रत्यक्षप्रमितित्वावच्छि
न्नतया प्रत्यक्षत्वसामानाधिकरण्यमात्रेण कार्यत्वग्रहसंभवात् तथाविधकार्यत्वविशिष्टानंतर्याभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूप
संगतिप्रदर्शकतावच्छेदकग्रहसंभवः। अथ निरवच्छिन्नतया प्रत्यक्षत्वसामानाधिकरण्यमात्रेण कार्यत्वग्रहे बाधकाभावः अतएव स्वर्गादौ नि
रवच्छिन्नतया स्वर्गत्वसामानाधिकरण्यमात्रेण ज्योतिष्टोमादिनिरूपितकार्यत्वग्रहः इति सिद्धान्त इति चेन्न प्रत्यक्षप्रमितौ प्रत्यक्षत्वसामानाधिकरण्य
मात्रेण कार्यताग्रहेपि तस्य संगतिप्रदर्शकतावच्छेदकत्वं न संभवति यत्र यत्र हि येन रूपेण कार्यताग्रहस्तत्र तेनैव तेन रूपेण कार्यताज्ञानं जिज्ञा
साजनकं अतः प्रत्यक्षप्रमितित्वसामानाधिकरण्येन कार्यताज्ञानं प्रत्यक्षप्रमितित्वावच्छेदेन जिज्ञासाजनकं न भवति कार्यत्वज्ञानाविशेषेपि जिज्ञासा
जनकज्ञानविरहात्तदवच्छेदेन निरूपणे तद्व्यापकोपजीव्यकत्वमेव निरूप्यस्योत्कर्षस्तस्यैव संगतिप्रदर्शकतावच्छेदकत्वं न तु सामानाधिक
रण्येनोपजीवकत्वस्येति भावः। एतदनुसारेणैव यद्यपीत्यादिग्रंथो योजनीयः सर्वं चेत्यादिग्रंथोपि स्वरूपयोग्यनिरूपणाविनिगमकपरतया यो
ज्य इति प्राहुः प्रत्यक्षप्रमितित्वावच्छेदेनेति। प्रत्यक्षप्रमितित्वावच्छेदेनेत्यर्थः। ततश्चानुमित्युपजीवकत्वं। आशंकते इति। यद्यपि जिज्ञासाकारणमात्रस्य
भोगतत्साधनेतरत्वेन विहितनिषिद्धान्तराजन्यत्वादन्तत्वाददृष्टं कारणं तस्य तदन्यतरव्यापारत्वाऽन्यत्वेनैव तत्सिद्धेः कार्यमात्रं प्रति तत्प्रकारणता

पांच प्रमाणाभावः तथा च सुखदुःखान्यतरसाक्षात्कारकप्रयोगतत्साधनसाक्षात्कारस्याऽदृष्टजन्यत्वेनानुमितसुषुप्तिजीवकत्वेऽपि साक्षात्कारमात्रे तत्वाभा
वात् अयमिपमार्ग्यं कालस्याणिमा चीनमतसिद्धं जन्यमात्रेऽदृष्टजन्यत्वमनुपेलम्भकारांतरेण समाधातुमियमाशंका वस्तुतस्तत्कार्यतावच्छेदकावच्छिन्नानुत्प
त्तिधिकरणत्वस्य कारणतावच्छेदकावच्छिन्नाभावप्रयोज्यत्वमात्मामहाप्रलयपक्षिकायेत्तावच्छिन्नानुत्पादाधिकरणत्वस्यादृष्टत्वावच्छिन्नाभावप्रयोज्यत्वा
तुरोधेनतत्सिद्धिः विशेषसामग्र्यभावकूटस्य प्रयोजकत्वे गौरवादिति ध्येयं। यागादेरेवादृष्टजनकत्वेनानुमितेरदृष्टजनकत्वाभावादाह। अदृष्टप्रयोजि
कामिति। तत्र दृष्टसाधनताज्ञानेकारणमिति पदार्थोपस्थितिरिति शेषः तच्च कारणं च। एतस्य तत्रैव विनालसस्यापि विना। इदं च पदं यत्र प्रवृत्त्यभावे नेतृत्वे
त्वेशाऽमिति सामान्यमुख्यव्याप्तौ अतिरेकप्रयुक्तानां गंगापदे व्यभिचारवारणाय। अपवर्गे व्यभिचारवारणाय विशेष्यं। यागरागा तत्र प्रयोगात् तद्व्यभि
तिश्रमिमुखेरिसप्रकृ। इत्यनुमितिरूपं। इत्यनुमानजन्यानुमितिरूपं। प्रत्यक्षफलेति प्रत्यक्षप्रमितौ लक्ष्ये अवधानेनेति। ग्राह्यतिप्रसंगाद्
कृतिसाध्यतादिज्ञानमेव प्रवर्तकं वाच्यं। प्रकृतिविनेत्यादि। अत्र प्रकृतिविना सत्वे सति मदिष्टसाधनत्वादिति पाठः। अत्रापि पकृतिसाध्यत्वेष्टसा
धनेव्यभिचारवारणाय सत्यंतं। स्वेष्टसाधनेनांतरीयके व्यभिचारवारणाय विशेष्यं। न चेष्टसाधनेनांतरीयके व्यभिचारस्तदवस्थ इति वाच्यं। तद्भेदस्यापि हे
तौ प्रवेशात् न चैवमिष्टसाधननांतरीयकभेदस्यैव हेतौ निवेशेऽपि प्रत्यौ विशेष्यमपि मितिवाच्यं। अनेकतद्भेदनिवेशगौरवस्यानापसंगीकारात्। नच
नांतरीयकत्वावच्छिन्नभेद एव निवेश्यतामिति वाच्यं। अनेकतद्भेदनिवेशगौरवस्यानापसंगीकरणात्। नचनांतरीयकत्वावच्छिन्नभेद एव निवेश्यता
मितिवाच्यं। अनेकतद्भेदनिवेशगौरवस्यानापसंगीकरणात्। नचनांतरीयकत्वावच्छिन्नभेद एव निवेश्यतामिति वाच्यं तस्य दुर्वचत्वात्। इत्येवंरूपेति १४
इत्येवरूपानुमानजन्येत्यर्थः। मदिष्टसाधनत्वानुमितीति। एतज्जनकं चेदं मदिष्टसाधनं तत्वेन ज्ञातत्वादित्यनुमानबोध्यं। केचित्तु समयमतकर्त्तृमतेऽसादिष्ट
ममः कृतोपाधिः वर्तमानारम्भस्तत्र पाकरूपेष्वतामत्कृतिसाध्यताइदानींतनमत्कृतिसाध्यतेतिमायात्तत्र सरिछेदिकाभिलर्थः तथा च इदमिदानींतनम

त्कृतिसाध्यत्वं इदानींतनमत्कृतिव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वादिलिङ्गानुमानाधीनेदानींतनमत्कृतिसाध्यतानुमित्युपजीवकत्वमिहाभिप्रेतमिति सा
द्रः। यत्तु तत्रापि पत्रशतच्छिद्रघटकप्रत्येकपदार्थोपस्थित्या मनसेव युगपत्कर्मत्कृत्स्नत्वसाध्यस्य यो धात्यवच्छिन्नत्वेनादृष्टपिपत्रशताद्यादिघटकप्रत्येक
पदार्थोपस्थित्या मनसैव युगपत्कर्मत्कृत्स्नत्वादेश्च यो धात्यवच्छिन्नत्वेनादृष्टजन्यफलस्य प्रमितत्वानुमित्युपजीवकत्वाभावात्तत्कृत्स्नमित्युपक्रमितिमित्तत्र
द्राक्षिप्तत्कृतित्वादीनां सर्वेषामेव मानसत्वोधात्यवच्छिन्नत्वस्य मानाभावात्। किं च नहि तत्फलस्य प्रमितत्वेन तदृष्टजन्यत्वस्य प्रमोजकत्वं किं तु मानस
त्वाद्याकारादिमो धस्यापि जन्यत्वेन मानसत्वरूपतया तज्जनकादृष्टादेरपि तथात्वं च तदृष्टप्रयोजकत्वात्। किं वा धस्य मानसत्वेऽपि तत्फलस्य प्रमितत्वा
बिताद्दृष्टादृष्टप्रयोजकत्वात्ययत्नुमित्युपजीवकत्वं निराबाधमेव नन्वेतादृशादृष्टप्रयोजकोऽपि मानसत्वदशायामादिवोधस्य प्रमानमस्ति संसारस्यानादि
त्वेन कारणविरहानुमितिनिरूपस्यापि संभवात्। अपि चात्र तद्दिव्यप्रकाशमित्यनुमानपरिच्छेदिकानर्थनिर्णायामितिमितिवदन्तादिधीतिकारस्याप्यनिश्चायिका
प्रमाणस्यानुमितिरूपजीव्यत्वे नाभिप्रेततथा च मानस्तुत्यादिबोधप्रयोजन्यफलस्य प्रमितत्वपि व्यापारान्तरानुमित्युपजीवकत्वाभावेऽपि प्रामाण्यानुमित्युपजी
वकत्वान्नोक्तदोषावकाश इति। नन्वीश्वरमतस्य सफलत्वेऽपि फलस्य प्रमितत्वावच्छेदेनानुमित्युपजीवकत्वमत आह। तथा चेति। अयत्न वेति। अप्रत्यस॥
त्वं न फलतावच्छेदकं नित्यसाधारणत्वात् किं तु जन्यप्रत्यक्षत्वमेव तदवच्छेदेनानुमित्युपजीवकत्वमस्तीति भावः। निरूपितप्रत्यक्षत्वस्यनिरूपितप्रत्यक्षत्वव
त्तिनिरूप्यतावच्छेदकस्य जन्यप्रत्यक्षस्यैवेति यावत्। वह्निमत्त्वेनोद्देश्यकुड्यप्रयत्नत्वावच्छेदेन वह्निमत्त्वान्वयवदत्रापि द्वारत्वावच्छेदेन दृष्टत्वान्वयो
त्पर्यमिति साध्येनाह दृष्टमात्रद्वारकमिति। एतेन केषांचिद्दुरदृष्टत्वादिदोषोऽप्युक्तं न संगच्छते। दृष्टमात्रघटकत्वं च दृष्टेतराद्वारकत्वे सति दृष्टद्वारकत्वं त
द्विशेष्य वैयर्थ्यं परिहर्तुं दृष्टेतरत्वेनादृष्टनिवेशो गौरवं चेत्याशयेनाह। अदृष्टेति। तत्त्वं च सजन्यकादृष्टाजनकनिरूपितत्वं। उपजीवकत्वमितिनि
रूप्यतावच्छेदकावच्छेदेनोपजीवकत्वमित्यर्थः। अत एव तत्त्वमितिविहायतथात्वमित्युक्तं दृष्टद्वारकत्वमिहाहरणमित्यत्र निरूप्यतावच्छेदकाव

म॰टी॰ छेदेनेत्यस्याविपर्यस्तत्वेन तत्त्वमितित्वोक्तमिति ध्येयं । अदृष्टद्वारकोपजीवकत्वस्येति । दृष्टादृष्टसाधारण्यस्येतिमध्याश्रुतव्याख्यानेतु यद्यपीत्यादिनोक्त
मितस्यैवव्यभिचारस्येतरस्येत्यादिनोद्भावनात्सोऽनहृत्त्वापत्तिरनन्तसामग्र्यः दृश्यं च तन्न दृष्टद्वारकोपजीवकत्वस्यैवानन्तर्याभिधानेऽप्येवं जनकतामात्रस्यमपी
१५ स्यमेवानुमित्यनन्तरं किं न निरूपितं मितावाद्यं रूपाद्यतरस्येति चेद्धिधित्वबलात् । अन्येतु यद्यपीत्यादिनाव्यभिचारः स्वरूपेणैवोक्तः अवत्वविनिगम्यत्वा
दितिस्वशब्देनोक्तं प्रतितन्त्रं पानरूप्यं तथा च निरुक्तं पूर्वाश्रुतव्याख्यानमेवादरणीयमित्याहुः । अविनिगम्यत्वमेवोपपादयति । अदृष्टद्वारकोपजीवक
त्वं चेतिनेकं तन्मात्रनिष्ठं व्यभिचारीतिपावतः तमेवोपपादयति अत्रस्फूर्जफलेति । अदृष्टद्वारकोपादानेति । कामेनार्थे प्रसदृष्टहेतुत्वस्त्रपातादिप्रक्लृ
धीनां प्रकृतिस्थोपादानप्रत्यक्षजन्यत्वादत एव तदुपादानः प्रत्यक्षस्य हेतुत्वादितिभावः । यद्वा दृष्टद्वारकत्वस्य जनकादृष्टजनकनिरूपितत्वरूपत
या कार्यमात्रजनकस्येश्वरीयोपादानप्रत्यक्षस्यादृष्टानुमितौ हेतुत्वादितिभावः । इत्थं चादृष्टद्वारकोपजीवकत्वस्याव्यभिचारित्वान्नादरणीयत्वमिति
दोषसंवलितं इतरस्येत्यादिग्रन्थसंबोधः । केचित्तु । अविनिगम्यत्वादिति नास्ति विनिगमकं यस्मादित्यबहुव्रीहिणा विनिगमकत्वादिरर्थः । अ
नन्तमोऽभिधानान्निगमकत्वादितिमावृतव्यभिचारेणानिष्टोषः नत्वविनिगमकत्वादिस्येव संमुखतः कथं न लिखितमिति वाच्यं । फलोपधानाभाव
स्यस्फुटतरप्रतीत्यर्थमेव लिखनात् । विनिगमकेस्वत्र तत्त्वपर्यायेन स्वरूपयोग्यताकथनादित्याहुः । अभिनवाप्त्यत्वाच्चापितत्वमितेवपाठः दृष्टद्वार
कमित्यस्य दृष्टेनात्मकव्यापारद्वारकमित्यर्थः । तथा च दृष्टेनात्मकव्यापारद्वारकस्य मानाधिकरणत्वेन जन्यत्वेन तत्सत्त्वेऽनुपजीवकत्वमेवेत्यभिप्रेतं । १५
अनुमितिं अनुभवस्यापादेद्वारं चिनेनानुमित्युपजीवकत्वात् व्यभिचारः । न त्वेवं तद्द्वारकं तत्त्वमिवेत्याहितस्य तत्त्वाहतरस्यानिमद्वारकोपजीवकत्वस्ये
त्यर्थः अविनिगम्यत्वादिति । मानसप्रत्यक्षनिदिध्यासनद्वारकस्य मननात्मकानुमित्युपजीवकत्वस्य तत्त्वसाक्षात्कारे विद्यमानत्वादितिभाव इत्याहुः । न
दसतापत्तेस्तद्गौरवे बहिर्मानुमितिस्ततो बहिः स्थितेवा तस्येव तद्धेतिद्रष्टोऽनालिकाबुद्धित्वतो बहिर्मार्गस्यैव अवतत्र तदेशा इति विशिष्टवैशि

व्याकां हि प्रत्यक्षं तत्र निरुक्तोपजीवकत्वस्यानुमितित्वरूपितस्य प्रत्यक्षे सत्त्वेन व्यभिचारापत्तेः संदर्भविरोधाच्चाविरोधेनेति । अत्र दृष्टद्वारादि
पदानादिगोचरकृतिसाध्यत्वाद्यनुमानोपजीवकत्वस्य प्रत्यक्षप्रमाणाच्च क्षुरादिसाधारणेपत्तनस्य तत्र व्यभिचारवारणाय द्वारानंतराभिधानव्याप्यत्व
रूपसंगतिलब्धवस्तुयोपपादप्रतीतिलक्षणः परंपरायेति तज्ज्ञानकत्वप्रयोज्यप्रत्यक्षे द्वारे संघः परंपरानुधावने प्रयासाद्दृहवस्तुनरुति । ननु जन्यज्ञानमा
मान्यं प्रति मनःसंयोगस्य हेतुत्वेनानुमनसोपि मानाभावात् । अत एव द्रव्यजन्यत्वं विहायेंद्रियामं संसोत्पत्तिकमित्युक्तमिति तत्त्वं । विनिगमनावि
रहादेयमनसोपि हेतुत्वसिद्धेः । अथैवमपि द्रव्यजन्यमित्येवमुक्तमुचितमिति चेन्न फलसाधारणयोग्याधेनमूलस्योपजीवकत्वपरेन प्रयोज्यता पार
सिद्धिवक्षितत्वेन तथोक्तेः । न चैवं तथा सति इंद्रियोपजीवकमित्येवोच्यतामिति वाच्यं । एतस्यैतद्विवरणत्वकत्वेन निरनुयोज्यत्वात् । अपरे तु प्रत्यक्षमा
णां मामणपयहाधर्मप्रमाणानां तरमपेक्षितत्वमिति तदुपजीवकमुच्यते प्रकृते च निर्म्लनाधीद्वेणमामाणपयुहार्थमनुमानमपेक्षणात् इन्द्रियोपजीवकत्व
मा । विवक्षितं किंतु स्वजौ नदपेक्षितत्वरूपमनुपजीवकत्वमिति स्फुटीकर्तुमिंद्रियापेक्षोत्पत्तिकमित्युक्तं । नन्विंद्रियोपजीवकमिति । अग्नेनानु
मानाधीनजन्यस्तुक्तावपीदमेव बीजमिति प्राहुः । धीधुताद्वनुमितिकरणमित्यस्यानुमितित्वावच्छिन्नकरणमित्यर्थः तेन जन्यज्ञानत्वावच्छिन्नं ध्या
करणस्य मनसंइंद्रियापेक्षोत्पत्तिकत्वाभावेपि न क्षतिः । व्याप्यंशाः व्याप्तिज्ञानत्वेनैवेति । एवकारेण जन्यत्वांतभावव्यवच्छेदः । इदं च प्राचीननयेन न
अनयेप्याप्तेरननुगतत्वेन ज्ञानत्वेनैवेति । एवकारेण तन्मत्वांतभावव्यवच्छेदः । इदं च प्राचीननयेन नतन्मनयेप्याप्तेरननुगतत्वेन ज्ञानत्वेनैवकरणत्वा
दिति ध्येयं । न च प्राचीननयेप्याप्तिज्ञानत्वेनानुमितिहेतुत्वेपि कथमीश्वरज्ञानेतत्करणत्वमाप्तिज्ञानत्वं हि व्याप्तिघटकतावच्छेदकाश्रयीभूतघाविधपर
स्पराद्यश्लेषावगाहिज्ञानत्वं तद्विशिष्यतावच्छेदकवत्त्वेश्वरज्ञानेमानाभावादिति वाच्यं । यथार्थकपंक्तिस्त्वर्वविषयकज्ञानवत्त्वस्य सर्वज्ञत्वरूपत्वेऽतिप्रसक्त्याप्रमा
त्वघटकसर्वविषयताश्रयज्ञानवत्त्वस्यैव तत्त्वेन तस्याप्तत्वाद्यपकत्वात् । वस्तुतो विशेष्येविशेषणमितिन्यायेन व्याप्तिघटकपदार्थावगाहि प्रगम

षादप्यनुमितेस्तद्देशेन कारणतावच्छेदकव्याप्तिज्ञानत्वं नोक्तरूपं किंतु व्याप्तिघटकतावत्त्वरूपम्। व्याप्तिज्ञानत्वमेव। न च विशिष्टवैशिष्ट्यावगा
हित्वांशेऽपि विशिष्टविशेषणकयोर्धर्मिविशिष्टविशेषणज्ञानत्वेन हेतुत्वान्नेदं सम्यगिति वाच्यं। तथा हेतुतायां मानाभावात्। न च तथापि हेतुज्ञानत्वा
देरेव तत्कारणतावच्छेदकत्वमस्त्विति वाच्यम्। तथा हेतुतायां मानाभावात्। न च तथापि हेतुज्ञानत्वादेरेव तत्कारणतावच्छेदकत्वमस्त्विति वाच्यं। वि
निगमनाविरहेण तत्तत्त्वासंभवात्। केचित्तु व्याप्तिघटकलघुपदार्थकिंचित्सदाद्यज्ञानत्वेनानुमितिहेतुत्वमपेक्ष्येश्वरज्ञानेन तत्त्वप्रसंगेऽनुमिति
भावापत्तौ पीत्योऽग्रयावतार इत्याहुः। अनुमितिकरणत्वं। अनुमितित्वावच्छिन्नकरणत्वं। करणीभूतं। व्याप्तिज्ञानत्वेनानुमितित्वावच्छिन्नक
रणं। अथेश्वरज्ञानस्योपादानप्रत्यक्षत्वेनैव हेतुत्वं न तु व्याप्तिज्ञानत्वेनेति चेत्। किमीश्वरज्ञानस्य व्याप्तिविषयकत्वेनास्ति किं यावत्तत्त्वेऽपि तस्य हे
तुतायां तदवच्छेदकं। नाद्यः तस्य सर्वविषयकत्वात्। नान्त्यः जन्यव्याप्तिज्ञानस्यानुमितिहेतुतायां लाघवाद्व्याप्तिज्ञानत्वस्यैवावच्छेदकत्वेनाक्लृप्तस्येश्व
रज्ञाने भिन्नत्वात्। न किंचिदपेक्षोऽनैमित्तिकमिति। नित्यत्वादिति शेषः। न च यत्नानुमानत्वावच्छेदेन द्विविधपरजीवकत्वमिति भावः। नन्वीश्वरज्ञानस्या
नुमित्यकरणत्वे तस्य कार्यमात्रजनकत्वव्याघात इत्यत आह अनुमितिविभावपत्तौ पीति। तथानुपपत्ते भावे मत इत्यस्य जनपत इत्यर्थकृत मातस्यानुमि
तिजनकत्वे करणत्वनिषेधासंगतेः करणातिरिक्तजनकतायां मानाभावादित्यत आह। भावमत इत्यादि। उपादानप्रत्यक्षविषया। उपादानप्रत
क्षत्वेन। अप्रमाश्रयः। कार्यत्वावच्छिन्नजन्यतानिरूपितोपादानप्रत्यक्षत्वावच्छिन्नजनकतायाः सत्त्वेऽपि नानुमितित्वावच्छिन्नजन्यतानिरूपितव्या
प्तिज्ञानत्वावच्छिन्नकरणत्वनिषेधासंगतिः। तद्धर्म्यैकधर्मावच्छिन्नजन्यतानिरूपितकरणत्वस्य तद्भिन्नधर्मानवच्छिन्नजन्यतानिरूपितो १६
पादानप्रत्यक्षत्वावच्छिन्नजनकतायाः सत्त्वेऽपि नानुमितित्वावच्छिन्नजन्यतानिरूपितव्याप्तिज्ञानत्वावच्छिन्नकरणत्वनिषेधासंगतिः। तद्धर्मे कृ
तजनकतात्मकत्वात्। तद्धर्मावच्छिन्नकरणत्वस्य तद्धर्मेतरधर्मावच्छिन्नजनकतात्मकत्वाच्च। यद्वा विषयतासंबन्धावच्छिन्नजनकतासंबन्धा

नुमितिकरणत्वनिवेशे बाधकाभावः तस्य विषयतासंबंधावच्छिन्नजनकतानात्मकत्वात्। अथ वा जनकत्वं द्विविधं। स्वानंतरोत्पन्नव्यापारा
पेक्षत्वमेकं तदेव करणत्वं तत्तदनपेक्षत्वमपरं तदेव भावकत्वं। भूम्याकाशवितिधात्वनुसारात्। तदेवोपादानेनसादिना सिद्धिं। तथा च द्वितीयजनकता
सत्वेपि न धूमजनकताकाभाव यदीधितौ भावप्रत्ययस्तु कर्मव्याख्याचापिद्वस्वादकत्वात् तर्भावेन तद्व्याख्यानात्। अन्यथा जनतयन इत्येवोच्येत एतेन भावप्रत्यो
जनयतइत्यनयोः समानार्थकत्वभ्रमवतां केषांचिज्जनयत इत्यस्य केवलं जनयत इत्येवोच्येत। एतेन भावप्रत्ययो जनयत इत्यनयोः समानार्थके
त्वभ्रमवतां केषांचिज्जनयत इत्यस्य केवलं जनयत इति व्याख्यानमुपेक्ष्यं। ननु येन संबंधेन करणतास एव करणतानिर्वाहकः प्रसा सन्निकर्षः।
स च न पक्षतासमानाधिकरणः। फलकरणयोः सामानाधिकरण्यनियमस्य हेतुत्वेनैवानतिप्रसंगात्। नापि व्यापारसामानाधिकरण्य तस्य फल
करणतावच्छेदकत्वेमानाभावात्। नापि संबंधसामान्यं गौरवात्। अधिकरणफलप्रस्यापि करणत्वापत्तेः तस्य करणतानिर्वाहकत्वासंभवाच्च। ई
श्वरज्ञानेनादृष्टभावेन करणस्याभावसाधनेस्वरूपासिद्धेः। अत एवाह अनुमितिफलोपहितेति। अजनितपरामर्शस्य व्याप्तिज्ञानस्यानुमितिजनि
त्वरूपयोग्यत्वात् परामर्शस्यानुमितिकरणताहाभाव्यनिर्वाहकसंसत्तित्वं न संभवतीति करणतापदस्य फलोपहितकरणतापरत्वमभ्युपेत्य फ
लोपहितेत्युक्तं। विशेषणज्ञानत्वेनेति। न तौ मार्थोऽवच्छिन्नत्वं तत्त्वस्वनिष्ठजनकत्वनिरूपितजन्यत्वरूपस्वजन्यत्वपर्याप्तवृत्तिजनकत्वेऽवच्छिन्नं
न तु व्याप्तिज्ञानस्य व्यापारवत्कारणत्वरूपकरणत्वानुपपत्तेः परामर्शव्यापारकत्वेपि परामर्शसंबंधेन कारणत्वेमानाभावः। करणतापानिमम
गर्भकारणताघटितत्वेन संबंधविशेषघटितत्वेपि परामर्शसंबंधेन हेतुत्वापेक्षया लाघवादनुमितिजनिव्याप्तिज्ञानस्य समवायेनैव हेतुत्वांगी
कारात्। न च कालिकादिसंबंधमादाय विनिगमनाविरहः। असंभवात् कालिकादिसंबंधेन हेतुत्वेऽधिकरणव्याप्तिज्ञानस्यापि फलं प्रतिकर
णत्वापत्तेर्गौरवाच्चेत्यत आह सर्वत्रेति। अयं भावः तत्तावद्व्यापारवत्कारणं करणं नष्टस्यापि करणस्य जन्यव्यापारद्वारा फलं प्रति करणत्वेन त

प.टी
१३
दनुपपत्तेः कारणानां फलव्यापारान्यतराव्यवहितपूर्ववर्त्तित्वनियमे गौरवात्। किं च व्यापारद्वारा फलं प्रति करणत्वे कारणत्वस्य संबंध
विशेषघटितत्वेनेतन्नतत्त्वलघुधावच्छिन्नत्वनिवेशे स्यात्। तदपेक्षया व्यापारत्वस्य निवेशे व्यापारस्य न कारणतावच्छेदकसंबंधनियमेऽशे तु गौरवमिति व्यापारसं
बंधावच्छिन्नकारणत्वमेव करणत्वं करणस्य सव्यापारसंबंधेनैव हेतुत्वेऽभ्युपेयम्। एवं च व्याप्तिज्ञानस्य करणत्वानुपपत्त्या गुरुणापि फलम्
वे संबंधेनैवानुमितिं प्रति हेतुत्वं न तु लघुनापि संबंधांतरेणेति। ननु करणस्य व्यापारसंबंधेन फलं प्रति हेतुत्वे व्यापारस्य काले व्यापारसंबंधे
न करणाभावादेव फलाभावोपपत्तौ व्यापारस्य फलं प्रति हेतुत्वे मानाभाव इति चेत्। व्यापारस्यैव फलं प्रति हेतुत्वे करणस्य काले च व्यापा
राभावादेव फलाभावोपपत्तेः करणस्य फलं प्रति हेतुत्वे मानाभाव इत्येवार्थं न स्यात्। अथ फलस्य क्रियात्वेन क्रियायाश्च करणजन्यत्वनियमात्
व्यापारस्य निर्व्यापारतया करणत्वेनान्वयव्यतिरेकाभ्यां करणस्य फलं प्रति हेतुत्वमिति चेदत्रापि दीयतां दृष्टिः। कारणस्य सव्यापारस्यैव नियमेनान्व
यव्यतिरेकाभ्यां करणस्य फलं प्रति हेतुत्वमिति चेदत्रापि दीयतां दृष्टिः। करणस्य सव्यापारस्यैव नियमेनान्वयव्यतिरेकाभ्यां व्यापारस्यापि फलं प्रति
हेतुत्वसिद्धेः। यथा च व्यापारेण व्यापारिणो नान्यथासिद्धिरेवं व्यापारिणापि व्यापारस्य नान्यथासिद्धिरिति तुल्यं। उपजीव्यविरोधस्य मूलत्वेना
न्येषामविशिष्टत्वात्। यथा हि व्यापारस्य हेतुतायां करणे हेतुत्वमुपजीव्यं न तथा करणस्य हेतुत्वानुपपत्त्या व्यापारस्य हेतुत्वात्। एवं करणस्य हेतुतायां
व्यापारहेतुत्वमुपजीव्यं। व्यापारस्य हेतुतां विना व्यापारत्वानुपपत्त्या करणस्य व्यापारसंबंधेन हेतुत्वानुपपत्तेः। तस्माद्विनिगमकाभावादुभयो १८
स्तयोः करणव्यापारयोरुभयोरपि फलं प्रति हेतुत्वेनैवोपपत्तेः। ननु व्यापारस्य फलं प्रत्यहेतुत्वे तस्य व्यापारत्वानुपपत्तिस्तज्जन्यत्वे सति तज्जन्य
जनकत्वस्यैव व्यापारत्वादिति वाच्यं। निरुक्तव्यापारत्वस्य नियमगर्भजनकतागर्भत्वेन गौरवात् तज्जन्यत्वे सति तज्जन्यानुकूलत्वस्यैव व्यापार
त्वात्। व्यापारस्य हेतुत्वेऽपि करणसंबंधत्वेनैव व्यापारत्वोपपत्तेः। अत एव सर्वत्र व्यापारस्य फलं प्रत्यहेतुत्वेनानुमितिं प्रति परामर्शस्य हेतुत्वाया

ष्टिविशिष्टपक्षधर्मताज्ञानजन्यं ज्ञानमनुमितिरिति चिंतामणिकारेणोक्तमनुमितिलक्षणमसमंजसमालोच्य पांकाधिदितादिनाऽनुमिति
लक्षणांतरं दीधितिकारेणैव वक्ष्यतीति ध्येयं। पुअनेन व्यापारसंबंधावच्छिन्नकारणत्वमेव करणत्वं न तु व्यापारवत्कारणत्वमिति अन्यथा ईश्वर
ज्ञानस्येच्छादिव्यापारवत्त्वात् कार्यमात्रं प्रति कारणत्वाच्च कार्यमात्रं प्रति करणतापत्तेः। न चेष्टापत्तिः तथा सत्येकस्यैव तस्य प्रत्यक्षानुमित्युपमि
तिशाब्दकरणतया प्रमाणचतुष्टयरूपत्वेन व्यवहारविरोधापत्तेः। मन्त्रसाधारणोपधायकतासंबंधेन व्यापारवत्त्वे सति कारणत्वं व्यापारवत्त्वेन सम
धारणकारणत्वं वा करणत्वं असाधारणत्वं च कार्यतावच्छेदकजन्यतानिरूपितत्वं ईश्वरज्ञानस्य च कार्यत्वावच्छिन्नं प्रत्येव हेतुत्वान्न
दोष इति तन्न असाधारणपदे गौरवात्। तदन्यज्ञानमात्रेऽस्त्यात्मनः करणत्वापत्तेश्च तस्यात्ममनःसंयोगरूपव्यापारवत्त्वाज्जन्यज्ञानत्वावच्छिन्नं
प्रति कारणत्वाच्च। न चात्मनो जन्यज्ञानमात्रकारणत्वेपि न क्षतिः उपधेयसंकरेप्युपाधेरसंकरे लौकिकस्यैव करणत्वोपपत्तेरिति वाच्यं। आ
त्मनः प्रमाणत्वापत्त्या तथा वक्तुमशक्यत्वात्। यद्यप्यनुभवत्वव्याप्यधर्मावच्छिन्नप्रमायानिकार्यतानिरूपितकारणत्वं प्रमाविभाजकधर्माव
च्छिन्नकार्यतानिरूपितकारणत्वं वा प्रमाणत्वं घटकमतो नात्मनः प्रमाणत्वमिति तदपि न। अनुभवत्वव्याप्यत्वादिप्रवेशे गौरवात् न घटादेः
प्रमाणत्वापत्तेरुद्धरणाच्च। तस्येंद्रियसंयोगरूपव्यापारवत्त्वात् लौकिकविषयतासंबंधेन प्रत्यक्षत्वावच्छिन्नं प्रति विषयत्वेन हेतुत्वात् प्र
त्यक्षस्यानुभवत्वव्याप्यत्वेन प्रमाविभाजकत्वेन तन्निरूपकधर्मावच्छिन्नकार्यतानिरूपितकारणतावत्त्वाच्च। कारणतायां तादात्म्यसंबंधावच्छिन्नत्वनि
वेशेन तद्वारणे च तेनैवात्मनोपि तदापत्तिवारणसंभवे कार्यतायां निरूढधर्मावच्छिन्नत्वविवक्षणवैयर्थ्यापत्तेः विषयेंद्रियसन्निकर्षादेरपि नि
र्विकल्पकादिव्यापारवत्कारणत्वेन प्रमाणत्वापत्तेश्च गौरवाच्च। व्यापारसंबंधावच्छिन्नकारणत्वस्य करणतारूपत्वे तु न कोपि दोषः। ईश्वरज्ञाना
दीनां विषयतातादात्म्यादिसंबंधेन हेतुतया व्यापारसंबंधावच्छिन्नकारणताभावेनाकरणत्वव्यवहारः कस्याप्यस्तीति सत्यप्यदृष्टादिव्यापारे न तेन स

म॰दी॰ बंधे भेश्वरत्वानादीनां कारणत्वं। लक्ष्यानुसारेण लक्षणप्रणयनं न तु लक्षणानुसारेण लक्ष्यानुसविभागः तदुक्तमभियुक्तैः। सिद्धान्तगमनमा
१८ त्रहि कर्त्तुं पुरुषपरीक्षकैः। न सर्वलोकसिद्धस्य लक्षणेन निवर्त्तनं भ्रमिति। तदेतत्सर्वमभिप्रेत्योक्तं सर्वजनकारणस्य व्यापारः सर्वबंधेन बफलो यथा
पकत्वादिति। एतेन सर्वज्ञगुरुणा व्यापारसंबंधेन कारणस्य फलं प्रति हेतुत्वानियमस्य प्रयोजकत्वादिदमसंगतमिति निरस्तं वेदितव्यं। यत्तु व्या
पारस्य वस्तुनियामकत्वेन तत्संबंधावच्छिन्नप्रतियोगिताया प्रसिद्धा तेन संबंधेन कारणत्वानुपपत्तिरिति तन्न। प्राचीनतमेष्वस्यानियामकत्वे बंध
स्य प्रतियोगितावछेदकत्वेनाप्यप्रवृत्तेः। किं च यादीनां कारणत्वे निर्गुणम्कारणतावच्छेदकसंबंधेन प्रतियोगिनोऽप्यधिकरणत्वनिवेशे कारण
तावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वनिवेशेन स्वाव्यवहितोत्तरत्वेन व्यक्तिकत्वस्वसामानाधिकरण्योभयसंबंधावच्छिन्नाभावकार्यनि
ष्ठभेदप्रतियोगितावच्छेदकतातदनवच्छेदकधर्मवत्त्वस्य कारणताघटकत्वे तथाऽनुपपत्त्यभावादिति संक्षेपः। न त्वीश्वरीयव्याप्तिज्ञाने विशेषण
ज्ञानत्वेन स्वजन्यपरामर्शरूपानुमितिफलोपहितकरणतानिर्वाहकमसामस्त्यभावेनानुमितिकरणत्वसाधने ताधः स्वरूपासिद्धिरीश्वरेश्वरतान
स्यसंबंधविषयत्वेन विशेषणज्ञानत्वान्तर्गतविशेषणज्ञानत्वेन स्वजन्यास्मदादिपरामर्शसंबंधेनानुमितिफलोपहितकरणत्वादत आह। विशे
षणज्ञानत्वेनेति। तादात्म्येऽवच्छिन्नजनकतापामान्वितं। जनकतायामनितिहेतुमन्वर्थेऽवछेदकत्वं अभेदेन सामानाधिकरण्यान्वितमसामस्तौ तस्यान्व
यः। नास्मदादीति। तथा च सामानाधिकरण्यसंबंधेन स्वजन्यपरामर्शसंबंधेन व्याप्तिज्ञानस्यानुमितिफलोपहितकरणत्वादत आह। विशेषणज्ञान १८
त्वेनेति तादात्म्येऽवच्छिन्नत्वं जनकतापामन्वितं। जनकतायामिनितिसमन्वर्थेऽवछेदकत्वं अभेदेन सामानाधिकरण्यान्वितमसामस्तौ तस्यान्वयः।
नास्मदादीति। तथा च सामानाधिकरण्यसंबंधेन स्वजन्यपरामर्शसंबंधेन व्याप्तिज्ञानस्यानुमितिफलोपहितकरणतयाऽस्मदादिपरामर्शस्येव
श्वरीयव्याप्तिज्ञानेऽधिकरणतमानतेन संबंधेन तस्यानुमितिफलोपहितकरणताश्रयत्वादिति भावः। न त्वेवमपीश्वरस्यानुमितिकरणतास

मान्यस्य स्वत एव सिद्धेरसंभवात् अनुमितेरेकविशेषबाधे परविशेषप्रकारकत्वनियमादत आह नित्यस्येति। स्वरूपयोग्यत्वे कारणतावच्छेदक
धर्मवत्वे। आद्य इति। तथा च नित्यत्वविशिष्टस्वरूपयोग्यत्वव्यापकफलावश्यंभावाभावेन न नित्यस्येश्वरज्ञानस्य नित्यत्वविशिष्टस्वरूपयोग्यत्व
व्यापकफलावश्यंभावाभावेन नित्यस्येश्वरज्ञानस्य नित्यत्वविशिष्टस्वरूपयोग्यत्वाभावस्य स्वरूपयोग्यत्वाभावपर्यवसन्नस्य जन्यव्याप्तितानवच्छे
स्ये वानुमितिस्वरूपयोग्यत्वरूपतामंगीकृत्य साधने नैकविशेषबाधाभावादनुमितिः कारणतासामान्यशून्यत्वेनासिद्धमिति भावः। एतेनावश्य
मात्रोना अप्रसक्तानन्तसाध्यवजन्यभूम्यादिरूपप्रसक्तस्वभाववर्तो पि कारणतानत्स्वरूपयोग्यत्वात् कारणताभावसाधकः कारणतासामान्या
भावसाधकः। प्रत्यक्षलोपहितकारणतानिर्वाहकप्रसक्तस्तिमत्त्वेनतावच्छेदकारणतासामान्यशून्यत्वमिति सामान्यमुखव्याप्तेररण्यस्थदंडादौ व्यभिचा
रासंभवादिति भावः। सामान्यत इति। व्याप्तेरिति शेषः। अनभिधानात् प्रसक्तादर्शनात् सेलभ्येनसामान्यतोव्याप्तेरनभिहितत्वादिति भावः। प्र
ह्रण एतेन नित्यस्येसादिव्याप्त्युपष्टंभेन व्याप्त्युपष्टंभमेवाह। सामान्यत इति प्रसक्तसत्त्वभावत्वेन प्रसक्तसत्त्वभावस्य कारणताभावसाधकत्वाभि
धानात्। तथा च नित्यस्येसादिव्याप्तिपर्यालोचनया नित्यत्वसमानाधिकरणप्रसक्तस्वभावस्यैव तत्साधकत्वमित्यरण्यस्थदंडादिकमादाय न सा
मान्यमुखव्याप्तौ व्यभिचार इति भावः। अथवा एतेनेसादिग्रंथो विशेषव्याप्तिमालंब्यैव। तथाहि। अरण्यस्थदंडादेरिति दृष्टांतार्थं प्रसक्तसत्त्वभावः।
अनुमितिफलोपहितकारणतानिर्वाहकप्रसक्तस्वभावः कारणताभावसाधकः अनुमितिकारणतासामान्याभावसाधकः प्रत्याप्रसक्तसत्त्वभाव
वत्वारण्यस्थदंडादौ स्वरूपयोग्यत्वेन व्यभिचाराभावात् निरुक्तप्रसक्तसत्त्वभावस्य नुनिरुक्तकारणत्वाभावसाधकत्वमिति भावः। सामान्यत इति निरुक्तप्रसक्त
सत्त्वभावस्येति। नाजनितपरामर्शकार्यस्य दिव्याप्तिज्ञानमादाय व्यभिचार इति भावः। यद्वा अजनितपरामर्शकार्यस्य दिव्याप्तिज्ञानमादाय व्यभिचा
रवारणाय नित्यत्वघटितनिरुक्तप्रसक्तसत्त्वभावस्य हेतुत्वे तस्यैव पर्यवसानं एतेनेत्यादिग्रंथः। तथाहि एतेन नित्यस्येसादिव्याप्तिप्रदर्शकस्य नित्यपदस्य स्वरूप

योग्यत्वानुपलब्धिबलाबत्संभावबत्वादिति तर्कस्य सहकृतेन: अरण्यपश्यद्दंडादेरिति द्रष्टव्यं तादृशमेव प्रत्यासत्त्यभाव: निरुक्तघटितनिरुक्तप्रत्यासत्त्यभा
व: करणत्वाभावसाधकइत्यस्य निरुक्तप्रयोजकः। तथा च यथारण्यपश्यद्दंडादौ तत्र सामान्येऽपि स्वरूपयोग्यत्वं दृष्टमेवं निरुक्तघटितनिरुक्तप्रत्यासत्त्य
भाववत्यपि कुत्रचिल्लिंगे नुमितिस्वरूपयोग्यत्वं भविष्यतीति प्रयोजकत्वसंदेहाहितव्यभिचारसंशयान्नेश्वरज्ञानेन निरुक्तघटितनिरुक्तप्रत्यास
त्त्यभावेन निरुक्तकारणत्वाभावसिद्धिरिति भावः। सामान्यतस्तु। अनुकूलतर्कं विनैव निरुक्तप्रत्यासत्त्यभावस्य निरुक्तकरणत्वाभावसाधक
त्वानभिधानात्। तथा चोक्तव्याप्तिमूलकनिरुक्ततर्कसत्वेन नित्यत्वेन तदापाद्यप्रकाशादावन्यथाभावाभावेनापादकस्य स्वरूपयोग्यत्वस्याभावे सिद्धे उ
पदर्शितव्यभिचारसंशयनिरासेनेश्वरज्ञाने निरुक्तप्रत्यासत्त्यभावेन निरुक्तकरणत्वाभावसिद्धौ न कोऽपि दोष इति सर्वमुच्छृङ्खलमवधातव्यं। य
त्प्रागुक्ते प्रत्यासत्त्यभावमात्रस्य करणत्वाभावसाधकत्वानुक्त्या प्रत्यासत्त्यभावेन करणत्वाभावसाधकत्वमसंगतं स्यादिति दिक्। अनुमिति
फलोपहितकरणताश्रयत्वादिति पाठे न तु तादृशकरणत्वाभावेपीश्वरज्ञानस्य स्वरूपयोग्यताया अक्षतत्वे न कारणतास्त्येवेत्यत आह नित्यस्येति वाक्ये
तितया चेतनस्य स्वरूपयोग्यतापि तत्रेति भावः। प्रत्यासत्त्यभाववत्त्वं निर्दिधिशुक्रइत्यादि: सामान्यतः प्रत्यासत्त्यभाववत्करणत्वाभाववत्त्वाभावो न निर
धानादिति दीधितेरुक्तार्थता स्यादिति भावः। अतिव्यापकस्य चित्त्वमतइति श्लोकमुख्येन संबंधकोटौ विशेषणत्वात् ज्ञानत्वेन स्वप्रयोजनत्वं च कुत्रुपन्न
म्नते। पक्षस्येति। भूवल्येत्येति। तथा च बाध: स्वरूपासिद्धिश्चेति भावः। एवं सति यथा चैत्यवृत्ति जन्यव्यापारसंबंधेन व्याप्तिज्ञानस्यानुमितिफलोपहित
स्येति। पूर्वप्रमाणसत्त्व स्वव्यधिकरणेत्यादि। असंभवादिति। तथा च न बाधादीति भावः। नन्वीश्वरज्ञानस्य यथाकथंचित्त्वजन्यव्यापारसंबंधेन फ
लोपहितत्वेपि नित्यस्येत्यादिव्याप्तेरभंगः। व्याप्तिज्ञानत्वस्यैव स्वरूपयोग्यतारूपत्वमानुमितिं प्रतिस्वरूपयोग्यत्वावच्छेदकत्वस्याभिसाशये नार्थ
कतेन चेति। अबाधः अभंगः स्वरूपयोग्यताघटकसंबंधेनेति। सचकार्यत्वकारणत्वयोरवच्छेदकः संबंधः स्वतीयार्थो घटितत्वं फलोपधानेन्वितं १९

फलोपधानस्य फलसंबंधस्य निवेशस्तदा हिनिकामित्वकारणत्वयोरवच्छेदकसंबंधघटितफलसामानाधिकरण्यात्मकफलसंबंधस्य फलत्व
रूपभावघटकत्वेन निवेशनीयत्वादिति भावः। अन्यथा संबंधविशेषघटितफलोपधानकनिवेशे। आकाशादौ हिंसानिमित्तस्य तादृशसंयोगादिसंबंधे
नेतिनत्वं तस्योपोर्ऽघटितत्वफलसामानाधिकरण्यात्मकेन फलसंबंधेनैवान्वितं। निष्फलोजनकेऽपि निमित्ते नित्यादिमिश्रभोजनं हिंसाकलादेर्दुःखस्य
ऐश्वर्यादिजनकत्ववारणं। न च तथापि निरुक्तफलोपधानाविवेशे निमित्तस्याप्य। काशादेः संयोगादिसंबंधघटितफलोपधानसंभवान्न तद्वारणमिति
तद्व्याप्ति निष्प्रयोजनतैव तस्मान्निरुक्तफलोपधानविवेशेनैव कपालादेस्तादात्म्यादिसंबंधेन दुःखजनकत्वमादिनिमित्तस्यापि कपालादेस्तादात्म्यसंबंधादिघटित
फलसंबंधाभावात्तद्वारणमिति तद्विशेषः सार्थक्यमिति भावः। फलायोगे साहित्यस्य सत्त्वमेकोऽर्थः। एतन्मते च निमित्तस्येति व्याप्ते रसत्त्वे शीघ्रं तत्तस्या
अनुमितिस्वरूपयोग्यत्वापि चेत्तत्स्यात्। फलोपहितत्वं करणत्वं सैव पुरुषकृतत्वादिति धर्मः। फलाश्रयादिसत्त्वस्य सोऽनन्तत्वं। तत्तत्सहकारिविरहदशायां फला
नुपधायकत्वे हेतुः स्वकरणत्वाभिमतेऽपि तत्त्वेनैतरसकलसहकारिसमवधानदशायां फलायोगव्यवच्छेदस्य चानिष्टसत्त्वात्। तत्कलसहकारिघटितत्वेन
रेवा जनकफलायोगव्यवच्छिन्नकारणकारणं। फलोपहितकरणमेव निरूप्यमितिप्रयस्यार्थः। इति टीकार्थः फलोपहितस्य स्वरूपयोग्यकारणमात्र
स्य निरूपयितुमभिप्रायेणोपलक्षणितिरेकव्याप्तिप्रसंगः कृतपदेनोत्कृष्टत्वात्। एवं मेवं च मते इन्द्रियसंयोगादेरवसादकारणकरणत्वं तथा च बंधुत्वं इत्यादि
७ संगत्यसंगतिश्चेति। व्यापितानत्वेनेवेति। एवं प्रकारेण जन्यतानतिव्याप्यत्वच्छेदः। ननु निमित्तस्येति व्याप्तिवत्कार्यजनकत्वापि निमित्तानले देवकरणतावच्छेदकीभूत
आह। अनिमित्तत्वेति तादृशि। अप्रयोजकत्वादिति। न चैवं कपालादेर्द्रव्यत्वरूपेण घटजनकत्वापत्तिः कृतं परिहरणीयमिति चेत्। स्वसमानजनकत्वा
कारूपेण कारणत्वसंभवादिति तत्साधारणरूपेण कारणतायां अन्याप्यत्वेन व्याप्यधर्मेण कारणतावच्छेदके संभवति व्यापकधर्मस्य तथात्वासिद्धत्वेन तथेति
पाक्रपरिहरणान्न। न च तुल्यन्यायतयानुमितित्वस्यापि जन्यत्वाविशेषेऽनवच्छेदकत्वेन कारणतावच्छेदकत्वानुपपत्तिरित्यादिति वाच्यं। तत्र द्रव्यत्वकपालत्वघोरूपस्पार्शवज्जातित्वतया

भ.टी.
२०

कपालत्वादिनाहेतुत्वेपीहजन्यव्याप्तिज्ञानत्वस्यजन्यत्वघटिततयाऽननुगमेनव्याप्तिज्ञानत्वेनैवहेतुत्वात्। नचैवंव्याप्तेरप्यननुगततयाव्या
नत्वेनैवहेतुतास्यादितिवाच्यं। दृष्टान्ते गत्वतत्वयोरेकोनपञ्चहृद्दित्वयोरेकमितिप्राचीनमतमनुसृत्यव्याप्तिज्ञानत्वेनहेतुत्वाभिधा
नात्। अदृष्टादीति। आदिनात्वज्ञानोपयोगादिपरिग्रहः। तेनात्मसंयोगादृष्टेनैवघटादेरूपादिवदीश्वरेपिफलसंभवेनादृष्टविरहेणफलाभावानु
पपत्तिरित्यपिसमाहितं। अतः ईश्वरज्ञानस्याप्यनुमितिकरणतयासमाकरणतावच्छेदकावच्छेदेनोपजीवकत्वस्यानंतराभिधानानिया
मकत्वात्। ननुदृष्टकारणेष्वेसादिनापर्यायद्वारत्वावच्छेदेनदृष्टत्वान्वयाकरणतावच्छेदकावच्छेदेनादृष्टद्वारकोपजीवकत्वस्यानंतराभिधान
नियामकत्वंतत्पर्यंतदपिनसंभवतीश्वरज्ञानेऽभावादतआहतथापीति। तथाचैतत्करणतावच्छेदकसामानाधिकरण्येनादृष्टद्वारको
पजीवकत्वस्यानंतराभिधाननियामकत्वमितिभावः। स्वजनकेति। इहस्वजन्यकादृष्टजनकनिरूपितत्वमदृष्टद्वारकत्वजन्यत्वमेवचोपजीवक
त्वमभिमतंतत्स्वरूपदमेवचैतत्सर्वोजनन्यकोभविष्यति। स्वदृष्टजनकेत्वस्यविद्वेपिनास्तिगंगादर्शनादिजन्यादृष्टजनकादृष्टेऽसंभवतः स्व
जनकेति। गंगादर्शनादिजन्यादृष्टस्यचनसर्वानुमानजनकत्वमिनाभावात्। अथगंगादर्शनादिनोपस्थितिसिद्धेर्विनादृष्टजनकमतःस्वजन
केतिव्यर्थमितिचेन्न। तात्पर्येनानन्यथासिद्धत्वाघटितसाक्षात्संपरसाधारणजनकतौभावस्यैवादृष्टजनकत्वघटकत्वात्। नचतथापि
स्वजनकत्वनिवेशप्रयोगोरवेणसाक्षाज्जनकत्वाभावस्यैवतद्घटकत्वमुचितमितिवाच्यं। स्वजनकत्वनिवेशेऽनुमानजनकादृष्टस्यनिवेशेनलाघ २०
वात्। एतेनास्वजनकेतिनदेयपदंनुमानजनकमिद्धिपकस्याप्यदृष्टस्याजनकतादृशानुमानविशिष्टेनादृष्टोपजीवकत्वसंभवात्स्वघटकतनिवोहा
दितिनिरस्तंतादृशानुमानविशेषेमानाभावाच्च। नास्तीतिदेवदत्तनाहिंसाचरकृतिसाध्यतावदनुमानस्यैदृजनकादृष्टजनकत्वादितिभावः। करण
तावच्छेदकधर्मसामानाधिकरण्यमिति। इदंप्रत्यसामानाधिकरण्यमित्यर्थः। सूचितमिति अदृष्टद्वारकानुमानोपजीवकत्वंनेप्राभावत्तिप्रयोजनत

पासूचितमित्यर्थः। तादृशोपजीवकत्वेऽङ्कुरपक्षसामानाधिकरण्येनास्तीति सूचितमिति पाठः। न चाङ्कुरत्वसामानाधिकरण्येन तादृशानु
मानोपजीवकत्वं नास्तीति सूचितमिति फलितं अपि नानिस्तेऽङ्कुरे सुतरामनुमानेनापेक्षितत्वस्य समुच्छितत्वादिति भावः। चक्षुर्योगो नेत्रस्य स्वसुर
वयवविभागानुकूलावयवकर्मजनके नेत्रादिः प्रयोजकेन अदृष्टस्यादृष्टवपक्षीणत्वेन तेनैकत्वाभावादिति। तथा चैतत्कल्पे उपजीवकत्वं जन्यत्वरूपं विव
क्षितमिति भावः। केचित्तु धर्षणादेः स्वं च स्वः प्रयोजकत्वे मानाभावः। इष्टसाधनताविषयकधीरूपो प्रमाणान्तरेणापि तदुपयोगस्य भगवद्वाक्यात्। एवं उप
जीवकत्वस्य जन्यतारूपत्वे अदृष्टद्वारकेति। दीपदानादिगोचरकृतिसाध्यत्वाद्यनुमानस्येत्यर्थः। तद्धारणाप्रतज्जन्यत्वमिन्द्रियनिष्ठसाधनप्रभृति
रवारणाय। तदुपादानादिति। न चेश्वरज्ञानस्य साक्षादिन्द्रियजनकतया तदुपादानेपि न तद्वारणमिति वाच्यं। अदृष्टद्वारकत्वस्य स्वजनकादृष्टजन
कनिरूपितत्वस्य विवक्षितत्वेनेश्वरज्ञानस्येन्द्रियजनकादृष्टं प्रत्यपि जनकतया तद्वारणात्। एतेन दृष्टद्वारकेत्यस्यादेः प्रत्यक्षद्वारकोपजीवकत्वे तात्पर्यमि
ति निरस्तं। उक्तव्यभिचारावारणात्। नन्वदृष्टद्वारकोपजीवकत्वं पुरस्कृत्य प्रसक्तस्यैवानुमानान्तरं किं न निरूपितमत आह। अदृष्टेति। उभयत्र सत्वा
दिति। इन्द्रिये दृष्टद्वारा दीपदानादिगोचरकृतिसाध्यत्वाद्यनुमानोपजीवकत्ववदनुमानेऽपि कायेन्द्रियजनकादृष्टसंपादकविहितकर्मप्रवृत्तिजनके
पादानप्रसक्तस्यैव संपादनेन निरुक्तेन्द्रियोपजीवकत्वं पुरस्कृत्य प्रसक्तस्यैवानुमानान्तरं किं न निरूपितं उक्तरीत्येश्वरज्ञानात्मकानुमानोपजीवकत्व
स्य प्रसक्तस्यैव सत्वादत आह। अदृष्टेति। उभयत्रसत्वादिति। यदिन्द्रियं स्वजनकादृष्टजन्यप्रवृत्त्यनुमानजनकं तदनुमानेऽपि निरुक्तं तादृशेन्द्रियोपजीवकत्वासत्वा
दिति भावः। विनिगमकत्वं आनन्तर्याभिधाननियामकत्वं। अत्रेदमवधेयं। दीधितौ दृष्टद्वारकेति वा शब्दः संभवत्कल्पनां तत्प्रदर्शनमात्रपरो न तु स
र्वथेति पूर्वकल्पस्यारस्यपरः। ईश्वरज्ञानस्यानुमानत्वेऽपि पूर्वकल्पस्य परिष्कर्तुमशक्यत्वात्। तथाहि। निरूप्यतावच्छेदकावच्छिन्नमुपजीवकत्वमे
वसंगतिः। अवच्छिन्नत्वं च व्यापकत्वं व्यापकतावच्छेदकसंबन्धेन स्वसमानाधिकरणकरणत्वं भवति हि। इन्द्रियोपजीवकत्वमनुमानगतं स्वीकृत्य

म॰टी॰ संबंधेन निरूप्यतावच्छेदकानुमितिकरणत्वव्यापकं करणतावच्छेदकभेदेनैव करणत्वस्य भेदेनैकस्येंद्रियोपजीवकत्वसमानाधिकरणस्य
२१ व्याप्तिज्ञानत्वाद्यवच्छिन्नकरणत्वस्य सर्वत्रानुमितिकरणे सत्वात्। इंद्रियगतमनुमानोपजीवकत्वं च न निरुक्तसंबंधेन व्याप्यस्य करणत्वव्याप
कं मनः श्रवणत्वादीमनस्त्वाद्यवच्छिन्नकरणत्वस्य त्वासमानाधिकरणत्वात्। न चेंद्रियत्वावच्छिन्नकरणत्वमादाय निरुक्तसंबंधोपपत्तिरि
ति वाच्यं सकलेंद्रियकरणानुगतेंद्रियत्वस्याभावेनेंद्रियत्वेनाकरणत्वात्। न चेंद्रियत्वं जातिः पृथिवीत्वादिना संकरात्। यदि चेंद्रियत्वमिह चे
कत्वेषु वैजात्यमनुपेक्ष्य विजातीयकत्ववत्त्वमेवानुगतमिंद्रियत्वं। न च तेन करणत्वेनासाधारणाभावः। चक्षुराद्यवच्छिन्नकरणत्वेनैवोपपत्तेरिति वा
च्यं। यदिह शेषयोरिति न्यायेन तदवच्छेदकत्वात्। न च मिलित्वा तद्व्याप्यस्य स्वजन्यतानवच्छेदकत्वेन कथमिंद्रियत्वेन करणत्वमिति
वाच्यं। निरुक्तेरपि जन्यतावच्छेदकत्वांगीकारात्। रातेनैकत्वजन्यतावच्छेदकनिरुक्तव्याप्त्याजन्यकत्वमाश्रित्यैवैतान्येन साकर्यान्नेंद्रियैक
त्वेषु वैजात्यसंभवस्तथापि निरस्तमिति विभाव्यमनेन सूक्तिः। प्रमाविभाजकधर्मव्यापकधर्मावच्छिन्ननिरूपितत्वस्य संबंधघटकक
मेद णत्वेनिवेशात्। भेदप्रतियोगितावच्छेदकं व्यापकत्वं च भेदसाधारणं। तथा च प्रत्यक्षत्वस्य प्रमाविभाजकस्य प्रत्यक्षत्वव्यापकतया प्रत्यक्षत्वा
वच्छिन्ननिरूपितेंद्रियत्वावच्छिन्नकरणत्वमादाय निरुक्तसंबंधोपपत्तिः। अथैवमनुमितित्वस्यापि प्रमाविभाजकानुमितित्वव्यापक
तयानुमितित्वावच्छिन्ननिरूपितव्याप्तिज्ञानत्वाद्यवच्छिन्नकरणत्वमादाय कथं निरुक्तसंबंधेनेंद्रियोपजीवकत्वस्यानुमितिकरणत्व
व्यापकत्वोपपत्तिरिति चेन्न। तल्लिंगकतत्साध्यकानुमितित्वव्यक्तित्वलिंगविशेष्यकतत्साध्यनिरूपितव्याप्तिज्ञानत्वावच्छिन्नकरणत्वमादायैव राम
तदुपपत्तेः। अथवा प्रमाविभाजकधर्मावच्छिन्नानिरूपितत्वमेव संबंधघटकं। अवच्छेदकत्वं च तन्न्यूनास्यधिकरणत्वमतो न कोऽपि दोष इत २१

लं सत्स्यमानुधावनेनारीचितौ। अथेति। यदुपजीवकं निरूप्यते तदुपजीव्यं निरूप्यैवेत्युपजीवकनिरूपणे ऽउपजीव्यनिरूपणानंतर्यनियमो
नेत्यर्थः। निरूप्यापि निरूप्यैवः अपि रवधारणे। न तु कार्यनिरूपणागत्यागित्यर्थः। यद्वा अपिः समुच्चये कुचित्कारणम [illegible]
निरूप्यैव कार्यनिरूप [illegible] णमित्यर्थः। इतेदेतु एवकारस्य [illegible] लासे तदुपजीवकं उपजीव्यं निरूप्य निरूप्यत एवेति उपजीवकत्वे उपजीव्य
निरूपणोत्तर [illegible] रनिरूप्यत्वनियमो नेत्यर्थ इत्याहुस्तन्न सत्। एवकारस्य लासे मानाभावात्। कुचिदित्यादिना
नंतर्यनियमे व्यभिचारोद्भावनेन तदसंगतेश्च। न चापि शब्दलब्धेन कारणानिरूप्य कार्यानिरूपणेन निरूप्यत्वनियमे व्यभिचारस्याभ
इति वाच्यं। मुख्यव्यभिचारोद्भावनासंगतस्य परीहारात्। वस्तुभेवन्मते ऽस्य सरूपमतिषेधानुकूलं वा ताद्यापत्तिः प्रसक्तस्य [illegible] द्विना निरूप्यत्वनिय
मस्यैवोक्तत्वादिति चेन्न। यथाश्रुतनियमस्यानिरूप्योपजीवकेव्यभिचारेणानिरूप्यत्वनिवेशस्य हेतोर्वाचस्पकत्वेन सविशेषणो हीतिन्या
यान्निरुक्तानंतर्यनियम एव पर्यवसानात्। अयमाशयः उपस्थापके प्रयोजनकत्वेनावश्यनिरूप्यत्वे प्यानंतर्ये किंनियामकमिता
कांक्षायामुक्तस्वविनिर्ग्रंथोऽस्यानेनाहस्यनिरूपणानुवादेनानंतर्यनियमस्यैवोक्तत्वात्। एतेन विशिष्टनियमस्य नियमद्वयस्यैव वा प्रति
क्षेपकोयं ग्रंथः कारणानिरूप्य कार्यानिरूपणासमुच्चायकापि शब्दसंवलितः कुचिदित्यादिग्रंथे ग्रंथेनोभयत्रैव व्यभिचारलाभादिति परा
स्तं। कुकरीसैव स्वारस्यादिति दिक्। नियमासंभवेकानुपपत्तिरित्यत आह व्याख्यास्यामि तथा वेति हेतुपंचमीय व्यापकत्व पर्यवसितत्वा
मत्वाप्यत्वार्थिका पंचमीयद्ध्येति तथा चानुमितौ निरूप्यत्वे सत्यनुमानोपजीवकत्वमस्ति न तु तन्निरूपणानंतरनिरूपणाविषयत्वमित्यु
क्तनियमे व्यभिचार इति भावः। यद्यपि निरूप्यत्वघटकनिरूपणोऽउपजीव्यनिरूपणानुपजीव्यत्वनिवेशेनापं व्यभिचारः अत उक्तमिति निरू

परास्य विशेषणाज्ञानसंपादकतया अनुमाननिरूपणोपजीव्यत्वात् । तथाप्यप्रयोजकत्वं उर्वारमेवक्कदिदिसादिग्रंथस्यापि अनुमाना

न्तरं मनुमितेरिव प्रमस्वात्पूर्वमनुमाननिरूपणासंभवनितावतापितयोरुपजीव्योपजीवकभावाबाधादितिरीसा ऽप्रयोजकत्वप
दर्शकत्वसंभवात् । एतेन सामान्यव्याप्तिभंगेपि पक्षत्वोपजीवकत्वे विशेषव्याप्तिरक्षतैव अन्वयदृष्टांतविरहेपि व्यतिरेकसहचा
रेणातद्ग्रहसंभवादितिनयलक्षणोपजीवकत्वा[illegible]दिति हेतुपंचम्यनुपपत्तिरिति परास्तं । विशेषव्याप्तिग्राहकानुकूलतर्काभावेनाप्र
योजकत्वस्य दुर्वारत्वात् । ननु ज्ञानजन्येति । तज्ज्ञानजन्यजिज्ञासाद्वारा प्रयोज्यत्वमित्यर्थः । पंचम्यर्थ उपजीवकत्वादिति पंच
म्यर्थः । आशये नेत्ति निरुक्ते नियमाभावेन द्वाप्यकत्वपर्यवसितत्वज्ञानजन्यत्वस्य पंचम्यर्थत्वानुपपत्त्या हेतुपंचम्यनु
पपत्तिः । निरुक्तजिज्ञासाद्वारा प्रयोज्यत्वस्य पंचम्यर्थत्वे तु निरुक्तनियमाभावेपि न पंचम्यनुपपत्तिरित्याशयः । तेन पक्षोप
जीवकत्वादित्यत्र पंचम्या ज्ञानप्रयोज्यत्वमर्थः । वेदान्ते वर्तते इत्यादौ लक्षणत्वान्न तु निरुक्तजिज्ञासाप्रयोज्यत्वं तत्र पंचम्या व्याप्यहेतु
त्वादिति परास्तं । वेदान्ते वर्तते इत्यादौ स्वज्ञानजन्येच्छासाधनताज्ञानजन्येच्छाद्वारा प्रयोज्यत्वस्यैव प्रकृतेपि निरुक्तजिज्ञासाद्वारा प्र
योज्यत्वस्य पंचम्यर्थत्वे बाधकाभावात् । नहि तद्व्येराग्यसत्तनं दर्थस्यैवान्यत्र तन्नदर्थत्वं । तथा सति दंडाद्घट इत्यादौ दंडत्वादिघटि
तजन्यत्वस्य पंचम्यर्थत्वेनाक्लृप्तत्वात वंचम्यर्थत्वानुपपत्तेः । अवक्लृप्तेपि प्रकृते पंचम्यर्थस्य ज्ञानप्रयोज्यत्वस्य वक्तव्यतो जिज्ञासाद्वारकस्य
वं पंचम्या ज्ञानजन्यजिज्ञासाप्रयोज्यत्वार्थकत्वं कृत्स्नमपि सपिकेचित् । तस्य तु उपजीवकत्वस्य । अनंतराभिधानव्याप्यत्वे स्यैव । अनंतरा
भिधानव्याप्यत्वस्यापि तद्घटकत्वात् । तं सं + स्यमानायाप्रमाण्यां की कृत्स्ववेदान्तवर्तते इत्यादौ पंचम्यर्थत्वे नाक्लृप्तत्वात् बाधात्परित्याग वर्तत इत्यत्रैव +

गतित्वघटकत्वात्तन्निरूपणनिरूपकत्वं क्लितादावतिप्रसंगवारणायानंतराभिधानव्याप्यत्वे सति प्रसंगाद्यन्यतमत्वस्यैव संगतित्वा
दिति भावः ॥ नचोपजीव्यत्वेऽप्रसंगः ॥ उपजीवकत्वमेव संगतिर्न तूपजीव्यत्वमिति पूर्वपक्षिणा आशयात् । अत एव सिद्धांतियोर्द्वयोरे
व संगतित्वमिति व्युत्पत्तिः । अन्यथोभयोरेव संगतित्वस्वीकारे द्वयोरित्युल्लिखनं निष्प्रयोजनमेव स्यात् । दीधितौ संगतिः संगतिः संगतित्व
विशिष्टा अनंतराभिधानव्याप्या अनंतराभिधानव्याप्यत्वघटिता । संगतित्वं नतद्व्याप्यत्वघटितमिति यावत् । तत्र प्रमाणाभावादुपजीवक
त्वेऽप्रसंगस्यत्वमेव दर्शितत्वाद्वेति हेतुः स्फुटत्वान्नोक्तः ॥ ननु प्रकारांतरेणासंगतिलक्षणमप्यनुपपन्नानंतराभिधानव्याप्यत्वघटित
संगतिलक्षणं न विरुध्यती सन्नतः प्रकारांतरेण संगतिलक्षणप्रदर्शकः आनंतर्येत्यादिग्रंथः ॥ हि । प्रसिद्धेरसाधारण्येनाहव्याख्यायां सं
गतिलक्षणेत्यादि । अपि ना पूर्वोक्तहेतुसमुच्चयः । तस्याः संगतित्वविशिष्टायाः अनंतराभिधानाव्याप्यत्वं तद्व्याप्यत्वाघटितत्वं सं
गतिलक्षणस्य तद्व्याप्यत्वाघटितत्वं अनंतराभिधानव्याप्यत्वघटितस्य संगतिलक्षणत्वाभाव इति यावत् । पद्मानंतराभिधानव्याप्यत्वस्य
संगतिलक्षणाघटकत्वाभावे हेतुमुपजीव्यत्वेऽप्रसंग इत्यभिधानं तस्य पूर्वपक्ष्यभिमतसंगतित्वनिराकरणपरत्वसाधारणसं
गतिलक्षणप्रदर्शकमानंतर्येत्यादि द्वयोरपि संगतित्वमिति तत्पक्षोऽयं ग्रंथः । हि शब्देन हेतुत्वव्याख्यायां शयेनाह संगतिलक्षणेत्यादि । आ
नंतर्येत्यादि । आनंतर्याभिधानप्रयोजकं सजिज्ञासाजनकं उपज्ञानं तद्विषयत्वार्थकत्वे प्रसक्षत्वादावतिप्रसंग इत्यत आह आनंतर्या
।भिधानेत्यादि । प्रयोजकं चैवं नो क्रांतिप्रसंगस्तथानुपदमेव पद्मीभविष्यति आनंतर्येति चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ् तेनानंतरं च तदभि
धानमित्यर्थलाभः ॥ जिज्ञासायाः आनंतर्यमित्यर्थः । पद्मा आनंतर्येणाभिधानमनंतराभिधानमित्यर्थलाभ इति । तत्र प्रसक्तानंत-भि
१ मुखेनाभिधानप्रयोजकतत्स्वरूपनायप्यनुघटितोक्तिः । ननु अर्द्धविपत्त्यादिवदभिधानस्यानंतर्य १

प.टी.
२२

सस्य क्रियाविशेषणतया ऽभेदेनाभिधानेन्वये न पदस्य स्ववित्वादिमूलस्य संगतित्वेन संगतिप्रदर्शकत्वानुपपत्तेः। एतेनोक्तरीत्या मूलस्य
संगतिप्रदर्शक[illegible]त्वानुपपत्त्यानंतर्यं इति पाठः। आमादिकस्य विनिरस्तः। अत एवानंतर्यं प्रयोजिकेति अभिधानानंतर्यप्रयोजिकेति वा
णोक्तमिति ध्येयं। जिज्ञासाजनकेति। किंतु टवदिति जिज्ञासाजनकस्य सामान्यतो बुध[illegible]ज्ञानस्याविषय इत्यर्थः। अतिव्याप्तिवारणाय प
प्रत्यक्षादिनिरूपतानुमानादिनिरूपसंगतित्ववारणाय प्रयोजकांतमिति। प्रयोजकत्वं चात्र जिज्ञासाद्वारकमिति ग्राह्यं। तेनानुमा
नादिजिज्ञासाद्वारानुमानाद्यभिधानप्रयोजिकां प्रत्यक्षादिजिज्ञासामादाय न प्रत्यक्षस्य तादृशसंगतिप्रसंगः। न चैवं शिष्यजिज्ञासाया गु
रुसंबंधिशिष्यीयज्ञानेच्छाद्वारकत्वात् संभवइति वाच्यं। स्वीयज्ञानेच्छाया एव संनंतजिज्ञासापदार्थतया द्वारीभूतोक्तेच्छाया जि
ज्ञासात्वस्यैवाभावात्। एतेनासंभववारणाय द्वारीभूतोक्तेच्छामादायैव लक्षणसमन्वयः स्वज्ञानेच्छाया इव परकीयज्ञानेच्छाया अ
पि तुल्ययुक्त्या सामान्यधर्मप्रकारकज्ञानस्य हेतुत्वात् तत्समानाधिकरणजिज्ञासाद्वारकत्वं वा प्रयोजकत्वे निवेश्यं। स्वपरजि
ज्ञासापरमिति परास्तं। केचित्तु आनंतर्यस्य विशेष्यान्वयिनान्वया जिज्ञासायाम् व्याप्तानंतर्यलाभेनैवोक्तरीत्याप्यत्र घटनया आ
नंतर्यमखेनाभिधानप्रयोजकत्वलाभेनैवोक्तातिप्रसंगे प्रयोजकत्वे जिज्ञासाद्वारकमिति तन्न देयमेवेत्याहुः तन्न। तथाविधप्रत्यक्ष
कार्यजिज्ञासैव यत्र फलेच्छाविधया प्रत्यक्षकार्यवत्जिज्ञासया जनिता तत्र प्रत्यक्षस्य कार्ये ऽतिप्रसंगवारणाय तदवच्छेदकत्वान्तरं। अतो
नंतराभिधानप्रयोजकफलत्वान्। विषयेफलत्वहेतोनिधर्मे ऽतिप्रसंगवारणाय जिज्ञासाजनकेति। फलेच्छया अप्यनंतराभिधानप्रयोजक
त्वात् जिज्ञासात्वानुधावनं। लक्षणस्य संगमनाय येनक्रमेण जिज्ञासाया अनंतराभिधानप्रयोजकत्वं तं क्रममाह प्रत्यक्षस्येति। उद्धरणाय प्रत्य गाम०
२२

निरूपिते सतीत्यादिः। इति क्रमेणा इतिज्ञानक्रमेणा कार्यत्व[illegible]कारतात्वावच्छिन्नयोः कार्यकारणभावसंबंधज्ञानक्रमेणेत्यर्थः। तत्र क्रमस्तु
संबंधज्ञानं ततः संस्कारः। न तदुद्बोधकसंपत्तिरिति। कार्यसामान्यज्ञानमिति। कार्यसामान्यस्मरणमित्यर्थः। यद्रूपावच्छिन्नयोर्यः प्राक्संबं
धोगृहीतस्तद्दर्शनोद्बुद्धसंस्कारसहकृतेन तद्रूपतद्रूपावच्छिन्नैकसंबंधिज्ञानस्य तद्रूपतद्रूपावच्छिन्नापरसंबंधिस्मारकत्वादितिभा
वः। सामान्यधर्मप्रकारकज्ञानस्येति। इष्टसाधनताज्ञानसहकृतस्येति शेषः। विशेषेति। सामान्येनोपस्थित्वादिज्ञानं विना कोऽर्थ इत्यादिप्र
श्नजनिकायाः पुष्टत्वाघवांतरधर्मप्रकारकजिज्ञासायाः अनुदयस्यानुभवसिद्धत्वेन निपतान्वयव्यतिरेकाभ्यां सामान्यधर्मप्रकार
कज्ञानस्य विशिष्टधर्मप्रकारकजिज्ञासाजनकत्वग्रहादितिभावः। विशेषवत्त्वमेव स्पष्टते। ततइति शाब्दप्रयोगे इष्टसाधनताज्ञानादिसह
कृतजिज्ञासाज्ञानद्वारेति शेषः। वाक्यप्रयोगे वाक्यार्थज्ञानस्य हेतुत्वात्। शाब्दप्रयोगः स्वजिज्ञासाबोधकशब्दवाक्यप्रयोगः। ततइति गुरोः
शिष्यीयप्रसक्तकार्यज्ञानेच्छादिद्वारेति शेषः। इष्टसाधनताज्ञानेन शिष्यीयप्रसक्तकार्यज्ञानरूपेष्टसाधनताज्ञानेन। अनुमा
नाभिधानेच्छादिद्वारेति शेषः। अनंतराभिधानपदसाक्षात्तदंशे स्वात्मकानुमानाभिधानं। इति एवं च गुरोः प्रसक्तस्य निरूपतां तत शिष्य
स्य कारणत्वेन प्रसक्तज्ञानं ततः कार्यत्वप्रकारककार्यसामान्यस्मरणं ततः कार्यत्वावान्तरधर्मप्रकारकज्ञाने इष्टसाधनताज्ञानं ततः
किं प्रसक्तकार्यमिति जिज्ञासा ततः जिज्ञानं ततः वक्ष्यमाणप्रमाणात्मशब्दप्रयोगे इष्टसाधनताज्ञानादिकं तत्त्वात् पमितिज्ञानं तेन किम
स्य कार्यमिति शिष्यस्य प्रश्नवाक्यप्रयोगः ततः गुरोः शिष्यजिज्ञासाज्ञानं ततो जिज्ञासालिंगकशिष्याज्ञानज्ञानं। ततः स्वेष्टसाधनताज्ञा
नात् शिष्याज्ञाननिरासेच्छा ततः शिष्यीयप्रसक्तकार्यज्ञानेऽज्ञाननिरासेष्टसाधनताज्ञानं ततः शिष्यं। प्रत्यप्रसक्तकार्यज्ञानं भवतीतीष्टं।

मु॰टी॰ ततः शिष्यीयप्रसक्तकार्यज्ञानरूपेष्टसाधनताज्ञानादनुमानाभिधानेच्छा ततः शब्दात्मकतदभिधानरूपेष्टसाधनताज्ञानात् कण्ठताल्वाद्यभिघा
२४ तारव्यसंयोगविशेषेच्छा ततस्तत्संयोगविशेषरूपेष्टसाधनताज्ञानात् कृतिसाध्यताधीसहकृतात् कण्ठादिचेष्टाविशेषे चिकीर्षा ततः कं
ठाद्यवच्छेदेन तदुपादानिका चेष्टाविशेषसाधिका प्रवृत्तिस्ततस्तादृशचेष्टाविशेषस्ततः कण्ठताल्वाद्यभिघातारव्यसंयोगविशेषस्त
तः शब्दात्मकमनुमानाद्यभिधानमिति करीत्या प्रसक्तानंतरानुमानाभिधानप्रयोजिका किमस्य कार्यमिति जिज्ञासा तज्जनकं का
र्यत्वरूपसामान्यधर्मप्रकारकं ज्ञानं तद्विषयः कार्यत्वमिति लक्षणसमन्वय इति भावः। तादृशजिज्ञासांशमपि। अनंतराभिधानप्रयो
जकतावच्छेदकधर्मविच्छिन्नजिज्ञासां प्रति तेन समव्याप्तत्वं वन जिज्ञासासामान्याधानवृत्तत्वादव्याप्तिः। समानविशेष्यकत्वेति। नन्वेवं
सति जिज्ञासापदं व्यर्थं। अनंतराभिधानप्रयोजकेच्छानिवेशस्यैव सम्यक्त्वात्। तथाविधफलेच्छाजनकीभूतफलज्ञानप्रकारेऽतिव्या
प्तेः कविवक्षयैव वारणादिति चेन्न। प्रकृते विवक्षितजनकताविशेषवत्त्वाभावेनैव तदुपादानात्। अत एवेति। यत्र केनचित् प्रसक्ताद्
कं निरूप्य शिष्यजिज्ञासां विनैव शिष्यस्य प्रवृत्त्वावांतरधर्मप्रकारकवृत्तज्ञानं भवति सा घाकारकस्वेच्छया प्रसक्ताद्यसंबद्धं वदादि
निरूपितं तत्र प्रवृत्त्वादावतिप्रसंगवारणाय तदुपादानमावश्यकं। तत्रेष्टसाधनताज्ञानादिद्वारा प्रसक्तानंतरवदाद्यभिधानप्रयो
जिकायां केच्छासामान्यधर्मप्रकारकज्ञानमुद्दश्य तज्जनकं वदनंतरवदादिज्ञानं तत्प्रकारत्वस्य वृत्तत्वादिसत्त्वात्। स्वज्ञानेच्छायामित्यप
रकीयेज्ञानेच्छायामपि तदुत्पत्त्युक्त्या सामान्यधर्मप्रकारकज्ञानस्य हेतुत्वात्। तदुपादाने तु केच्छायां जिज्ञासात्वाभावान्न दोषः। ज्ञाने राम॰
च्छा जिज्ञासेति मुख्यसामान्यज्ञानगोचरेच्छाया एव जिज्ञासात्वात्। अत एव ज्ञानेच्छेति विहाय सर्वत्र। जिज्ञासापदोपादानस्य सा २४

रस्यां। अथैवं समसमधुक्तस्थलेऽनंतराभिधानप्रयोजकायाव कुर्वद्रूपत्वादिना घटादिज्ञानानुकूला किंत्वपि सौरिकाद्यदादिजिज्ञासातज्जनक का
ज्ञानकत्वात्रविषये दुष्टत्वादावति प्रसंगो दुरुद्धर एवेति चेन्न। अभिधानविशेषणतानंतर्यस्य परंपरया विशेष्यान्वयिनाऽन्वयात्ति
ज्ञासायामपि तल्लाभे नोक्तस्थले किंतु इष्टतासादिवदादिजिज्ञासायाव कृतायाम् प्रलक्ष्याद्यभिधानानुत्तरत्वेनानतिप्रसंगात्। केचित्तु क्षाभि
प्रसंगवारणाय शिष्यजिज्ञासाया एव लक्षणघटकत्वमंगीकुर्वंति। तच्चिंत्यं। शिष्यवक्तृसाधारणजिज्ञासामात्रस्यैव जिज्ञासापदार्थत्वात्
शिष्यजिज्ञासाया एव। लक्षणाघटकत्वासंभवात्। जिज्ञासापदस्य शिष्यजिज्ञासापरत्वाभ्युपगमे तु इच्छापदस्य शिष्यगतेच्छापरत्वम
भ्युपगम्य तद्घटितलक्षणासंभवेन जिज्ञासापदस्यैव वैयर्थ्यात्। फलेच्छाजनकज्ञानप्रकारकफलवृत्तिधर्मादावतिप्रसंगस्य जिज्ञासापदानभ्यो
वेऽप्यारणीयत्वे नेष्टसाधनत्वाद्यतिप्रसंगवारणाप्रकारेणोक्तवारणादिति। तच्चिंत्यं। लक्षणो एकवाक्यत्वस्याग्रे निवेशनीयतया तेनैवोक्त
स्थलेऽनतिप्रसंगात्। वस्तुतस्तु एकवाक्यतापन्नं यद्यत्तदुद्देश्यकूटवृत्तित्वरूपैकवाक्यत्वस्य लक्षणे निवेशोऽक्तस्थले भेदकूटनिवेशस्यैवावि
त्वा गौरवेण जिज्ञासापरे पादानमेवोचितं। यत्र जिज्ञासापदे नातिप्रसंगवारणं न भवति तत्रैव भेदकूटनिवेशस्योचितत्वात्। अस्मादृशैकवा
क्यत्वस्य निवेशेऽपि लक्षणे इच्छात्वेन फलेच्छाद्यनिवेशलाघवेन जिज्ञासात्वेन जिज्ञासानिवेशाय जिज्ञासापदोपादानमावश्यकमत एव
ज्ञानेच्छात्वेनानिवेशः। व्यधिकरणज्ञानेच्छायाअनिवेशेन लाघवाज्जिज्ञासात्वेन निवेशस्यैवोचितत्वादिति। अस्मेतु ज्ञानं तर्याभिधानेषु आनंत
र्यप्रयोज्यत्वं। तच्च नाभिधानगतं किंतु जिज्ञासागतमेव तथा च यदभिधानप्रयोज्यापराभिधानप्रयोजकजिज्ञासातज्जनकज्ञानविषयो
र्थस्तत्त्वस्य संगतिरिति फलितं। तेन नोक्तस्थले दुष्टत्वादावतिप्रसंगः। न वा प्रसक्तत्वाद्यतिप्रसंगवारकजिज्ञासाद्वारकाभिप्रयोजके

म॰टी॰ सन्निवेशप्रयुक्तगौरवं। प्रयोजकत्वं च गुरोः प्रसक्तस्य निरूपणाभिसाधुप्रदर्शितप्रणाल्या ग्राह्यम्। तेन प्रसक्त्यादिजिज्ञासाभिर्द्वारा प्रसक्त्याद्य
२५ भिधानप्रयोज्यं शब्दाभिधानप्रयोजकं किंस्वरूपमानोपजीवकमिति। जिज्ञासामाह। यो यमानोपजीवकत्वस्यानशब्दे प्रसक्त्यादिसंगतिता
पत्तिरित्याहुः। तदपि हि स्वं। जिज्ञासायाश्चैव व्युत्पत्तिः। आनंतर्यपदस्य प्रयोजकत्वार्थकत्वेऽदर्शनात्। किंचोपदर्शितप्रणाल्या अनंतु
गमेन निर्णयस्य वृत्तितया गुरुत्वेन च निवेशासंभव एव। अपि वा प्रसक्त्यानंतरमनुमानं निरूप्य न इति मूले आनंतर्यस्य क्रियाविशेषणतयान
स्य संगतित्वेन संगतिप्रदर्शकत्वानुपपत्तिः। अत एव यथाश्रुतानंतर्यस्य [illegible] साविशेषमात्रम [illegible] पि प्रयुक्तं। तथा लेऽप्युपमानोप जिज्ञा
जीवकत्वस्य शब्दे प्रसक्त्यादिसंगतित्वापत्तिश्च। असंभवापत्त्या सामान्यतोऽव्यवधानस्याभिधानाय च धानस्य च जिज्ञासा। व्यवधानमा
त्रयविनिगमनाविरहेणानंतर्ये निवेशयितुमशक्यत्वात्। आनंतर्यस्याभिधानविशेषणत्वे तु असंभवापत्तेरेव विनिगमकत्वादभि
धानाव्यवधानस्यैवानंतर्ये निवेशसंभवादित्यलमप्रसक्तावेशेन। प्रत्यक्षकारकज्ञानत्वमिति। विवक्षणीयावच्छेदकतापर्याप्त्यधिकरणत्वस्य
संस्कारादिसाधारणकार्यत्वादिप्रकारकत्वेऽभावाहानत्वपर्यंतं। प्रत्यासत्तिरिति सामानाधिकरण्यस्य प्रत्यासत्तित्वे विशेष्यभेदेनानंत
हेतुतापत्त्या समानविशेष्यकत्वमेव प्रत्यासत्तिरित्यभावः। हेतुतापत्तिरिति। समानविशेष्यकत्वं प्रत्यासत्तिरित्यनुपपद्यते। दण्डज्ञानेपि
दण्डविशेष्यकज्ञानेपि इष्टापत्त्यादिति॥ विशेष्यतासंबंधेनेत्यादिः। एतदभावात् प्रत्यक्षकारकज्ञानत्वं प्रत्यक्षजनकतावच्छेदकतापर्याप्त्य
धिकरणांतत्वमित्यभिहितविशिष्टार्थलाभाय। ननु प्रत्यक्षकारकेत्यादिविशिष्टार्थाभिधानमेव किमर्थं विषयतस्य विषयताप ग्रं५०
तापर्याप्त्यधिकरणत्वरूपत्वेन कार्यतावच्छेदकैकदेशेऽनतिप्रसंगादत आह प्रत्यक्षकारकेति। प्रत्यक्षकारकेत्यादीत्यर्थः। नेति। तथा च यथा २५

प्रकृतस्योक्तरूपज्ञानविषयत्वस्य कार्यविशेषधर्मितापत्तिप्रसंगः।ता।स्वविशेष्यतापर्याप्त्यधिकरणत्वादिनिविशिष्टार्थाभिधानमिति भा
वः। न च विषयत्वस्य प्रकारतापर्याप्त्यधिकरणत्वरूपत्वेनायं दोष इति वाच्यं तथापि समूहालंबनमादाय पटत्वादावतिव्याप्तेरप
रीहारात्। यत्तु यथोक्तजनकतावच्छेदकप्रकारतापर्याप्त्यधिकरणत्वविवक्षणान्नोक्तदोष इति। तच्चिंत्यं। अवच्छेदककोटिप्रवि
ष्टत्वस्यैकदेशप्रकारतासाधारण्यात्। अवच्छेदकतापर्याप्त्यधिकरणत्वस्य च संस्कारादिसाधारण्यात् कार्यत्वादिप्रकारतायामप्यभा
वात्। एतेन प्रकारतासंबंधेन यथोक्तजनकतावच्छेदकतापर्याप्त्यधिकरणत्वमपि प्रत्युक्तं। कार्यत्वप्रकारकसंस्कारसत्वे विशेषध
र्मिप्रकारकजिज्ञासाप्रसा प्रकारतासंबंधेन कार्यत्वज्ञानत्वेनैव जनकतया कार्यत्वादावप्युक्तपर्याप्त्यधिकरणत्वाभावात्। तत्र प्र
कारतासंबंधेन कार्यत्वस्य समवायेन च ज्ञानत्वस्य विभिन्नजनकतावच्छेदकत्वान्न दोष इति वाच्यं। कार्यकारणभावद्वयकल्पने गौरवा
त्। उक्तसंस्कारसत्वे घटज्ञानसत्वे विशेष्यधर्मप्रकारकजिज्ञासायन्नेष्टत्वा। वस्तुतस्तु प्रकारतादीनां प्रकारतात्वादिनैव संबंधत्वं न तु
ज्ञानीयप्रकारतात्वादिनेति यमानंगीकारे ज्ञानीयप्रकारितात्वेन तदंगीकारे प्रकारितात्वेन सामान्यरूपेणैव तन्निवेशेपि तत्संबंधावच्छि
न्नयथोक्तजनकतावच्छेदकतापर्याप्त्यधिकरणत्वमेव सम्यक्। लाघवात्। एवं च संगतित्वस्य विशिष्टैकार्थरूपत्वमपि स्वरसतएव संग
च्छत इति ध्येयं। किंचित्तु इष्टसाधनत्वेऽतिप्रसंगवारणाय समानविशेष्यकत्वप्रत्यासत्त्यवच्छिन्नाजनकतैवात्र निवेशनीया। सर्वत्र सुखी
स्यामिति वत्र असिद्धोपरागेणासिद्धविशेष्यकेच्छाजायते तेन यावत्सिद्धकार्यत्वावांतरधर्मप्रकारकज्ञानं विशिष्टसिद्धकार्यादावेव वि
शेषणाभूतज्ञानविशेष्यकेष्टसाधनताज्ञानादिच्छातापत इति नेष्टसाधनताज्ञानहेतुता समानविशेष्यकत्वप्रत्यासत्त्यवच्छिन्ना। कार्यता

म.टी.
२६

दिसामान्यधर्मप्रकारकत्वानत्विच्छाविशेष्यकार्यादिविशेष्यकमिति तद्धेतुतासमानविशेष्यकत्वप्रत्यासत्त्यवच्छिन्नैवेति न कोपि दोष
इत्याहुः। तादृशेति। आनंतर्याभिधानप्रयोजके स्पष्टः। बुद्धेष्टादीति। नन्वेवं तन्मते घटेष्टादिसाधारणोपायेच्छात्वस्य जिज्ञासात्वाव्याप्य
त्वादेवेष्टसाधनत्वानभिप्रसंगे किं तादृशोऽस्य नेन घटाद्यव्यवतिप्रसंगस्य कार्यताव्याप्ततादृशजिज्ञासावृत्तित्वनिवेशेनापि वारणसंभवात्
इत्थं चैतन्मते तस्य मानवत्तोद्धारो पी पीतिचेन्न। एकोपायविशेष्यकेष्टसाधनताज्ञानादुपायांतरविशेष्यकेष्टावारणाय विशेषतो
पीष्टसाधनताज्ञानस्य हेतुतया जिज्ञासात्वाव्याप्यकार्यत्वावांतरधर्मप्रकारकजिज्ञासात्वावच्छिन्नकार्यतामादाय क्षतिप्रसंगवार
णायैवतदुपादानात्। आनंतर्याभिधानप्रयोजकसमूहालंबनेच्छामादायघटादावतिप्रसंगतादवस्थ्याच्च। [illegible]तेनेष्टसाधनताज्ञानस्य समान
विशेष्यतासत्त्वासत्त्वाहेतुत्वेनोक्तरीत्या तदुपादानसार्थक्यं संभवतीत्याशंकां निराकृत्यान एव तादृशजिज्ञासात्वसमानाधिकरणेति विहाय तादृ
शजिज्ञासात्वव्याप्येत्युक्तमिति ध्येयं। यत्स्वरूपजिधर्मप्रकारकफलेच्छायां नियमेनानंतर्याभिधानं तत्फलत्वादृजिधर्मेऽतिप्रसंगवारणा
येच्छात्वं विहाय जिज्ञासात्वानुधावनं। आनंतर्येति। यादृशकार्यत्वावांतरधर्मप्रकारकजिज्ञासायां यानानंतर्याभिधानं तादृशजिज्ञासायां व्य
भिचारादिति भावः। पूर्वं स्वप्रयोजककत्वं कल्पोपधानकत्वरूपमिति सभिप्रायेण प्रयोजककत्वस्य स्वरूपयोग्यतारूपत्वे तु शाब्दप्रमाणोपि प्रस
सोपजीव्यकत्वस्य संगतित्वापातः। उपदर्शितजिज्ञासायाः शाब्दप्रमाणाभिधानेपि स्वरूपयोग्यत्वात्। एवमुक्तविशेषकारणतामादायेष्टसा
धनताहावतिप्रसंगस्येति दूषणं बोध्यं। अनवच्छेदकत्वादिति। तथा चैतादृशकार्यकारणभावग्राहकमानाभावात् प्रकृते तत्रस्वागमतासंभव इति भावः।
नचकार्यत्वावांतरधर्मप्रकारकजिज्ञासायां नियमेनानंतर्याभिधानं कार्यत्वावांतरतद्धर्मप्रकारकजिज्ञासात्वावच्छिन्नकार्यतामादाय राम०
२६

प्रकृतलक्षणासंगमनीयमितिवाच्यं। कार्यत्वाद्यवान्तरधर्मभेदेन कार्यत्वादिप्रकारकज्ञानस्य जिज्ञासायामहेतुत्वात्। तादृशकार्यता
मात्रयोर्ज्ञानेऽतिप्रसंगतादवस्थ्याच्च। न चेति। अस्मन्निरूपितानिष्टसाधनत्वस्यानिरूपितत्वमिष्टसंगतित्वाभावादिति भावः। न चेष्ट
साधनत्वस्य प्रत्यक्षानुमानयोरसंगतित्वेऽपि संगतित्वान्न संगतिलक्षणातिप्रसंग इत्यत आह तथा चेति। एवंरूपेदिति। अप्यथावृष्टजहाद्यभिधा
नंतरवृत्ताद्यभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयवृत्तादौ प्रत्यक्षादिसंगतित्वापत्त्यनुद्धारादिति भावः। अपरीहारादिति। इष्टसाधनत्वस्य सा
मान्यतः संगतित्वेऽपि संगतिलक्षणस्य विभिन्नतया प्रत्यक्षानुमानसंगतिलक्षणातिव्याप्तिर्दुरुद्धरैवेति भावः। अपरे तु समानविशेष्यकत्वप्र
त्यासत्त्या इष्टसाधनताज्ञानस्य हेतुत्वे तत्कार्यतावच्छेदकमिच्छात्वमेव न तु विशिष्योपायविषयापि कार्यतावच्छेदककोटावन्तर्भावः। तथा च जिज्ञा
सात्वव्याप्यधर्मावच्छिन्नतादृशजिज्ञासावृत्तिकार्यताप्रतियोगिककारणताया एव निवेशान्न काप्यनुपपत्तिः इत्थं च जिज्ञासात्वेन लक्षणी
निवेशोऽपि स्वारस्येन संगच्छत इति प्राहुः। वस्तुतस्तु जिज्ञासात्वव्याप्यधर्मावच्छिन्नत्वेन कार्यतासमानविशेष्यकत्वप्रत्यासत्त्यवच्छिन्नता
दिनाजनकतावान् विवक्षणीया। आनंतर्याभिधानप्रयोजकजिज्ञासाजनकतावच्छेदकं प्रकारकज्ञानत्वं तत्त्वस्य ज्ञानीयप्रकारितासंब
धावच्छिन्नप्रयोज्यजनकतावच्छेदकत्वस्यैवावश्यकत्वात्। न चेष्टसाधनतेऽतिप्रसंगः। इष्टसाधनताज्ञानस्य समानविशेष्यकत्वप्रत्यासत्त्या
हेतुत्वे कार्यतावान्तरधर्मप्रकारकज्ञानत्वावच्छिन्नविशेष्यतासंबन्धेनेच्छात्वावच्छिन्नं प्रति इष्टसाधनताप्रकारतानिरूपितकार्यत्वावान्तरक
धर्मप्रकारकज्ञानत्वावच्छिन्नविशेष्यतासंबन्धेन ज्ञानत्वेनैव निरूढहेतुतया इष्टसाधनत्वस्य जनकतावच्छेदककोटावप्रवेशात्। जिज्ञासाप्र
प्रयोजनं तु पूर्वोक्तभेदेति रहस्यं। स्वातंत्र्येणेति। न वान्वयव्यतिरेकाभ्यां स्वातंत्र्येण सामान्यज्ञानस्य विशेषजिज्ञासाजनकत्वमिति वाच्यं। वि
र

म॰टी॰ शेषधर्मप्रकारकयद्यदिज्ञानं भवति तत्तत्प्रकारकजिज्ञासाजनकज्ञानस्य तादृशज्ञानत्वावच्छिन्नविशेष्यकेष्टसाधनताज्ञानस्य घटत्वादिरूपसामा
२९ न्यधर्मप्रकारकत्वात्तेन सामान्यधर्मप्रकारकज्ञानाभावस्थले तादृशेष्टसाधनताज्ञानाभावेपि यथेष्टविशेषजिज्ञासानुदयसंभवे
नेष्टसाधनताज्ञानविधयेव तस्य विशेषजिज्ञासाजनकत्वं न तु स्वातन्त्र्येणेत्याशयात् । नन्वस्तु तर्हि सामान्यधर्मप्रकारकज्ञानस्य स्वातंत्र्येण
विशेषधर्मप्रकारकजिज्ञासाजनकत्वमाद्याप्रमहत्तत्वस्यागमनासंभवमनुरुध्य कॢप्तिः इष्टसाधनताज्ञानात्मकसामान्यधर्मप्रकार
५ सा कज्ञानस्य तादृशजिज्ञाजनकत्वमावश्यकमेवमहत्तत्वस्यागमनसंभवादिति भावः ॥ नन्वेवं इष्टसाधनस्य स्वपदधर्मपदेनोपादानमशक्य
त्वादिति भावः ॥ केचित्तु स्वरसोद्भावनं । नह्यंत्र्ये घटत्वव्याप्यधर्मप्रकारकघटज्ञानेष्टसाधनत्वकार्यतव्याप्यधर्मप्रकारककीर्तना
नेष्टसाधनत्वयोस्समूहालंबनस्य यथोक्तसमूहालंबनजिज्ञासाजनकत्वेन बुद्ध्यारूढवृत्तिव्याप्तिः । न च यद्धर्मव्याप्यधर्मप्रकारकता
नेष्टसाधनताज्ञानत्वमानं तत्पर्यभिधानप्रयोजकतावच्छेदकधर्मावच्छिन्नजिज्ञासानिरूपितजनकतावच्छेदकं सधर्मः
संगतिरिति वाच्यं । असंभवापत्तेः । इष्टसाधनताज्ञानस्य समानविशेष्यकत्वप्रत्यासत्त्या हेतुतया कार्यत्वादेर्जनकतावच्छेदककोटाव
प्रवेशात् । यद्धर्मव्याप्यसाधयेप्सुपापत्प्रकारकज्ञानत्वस्यैव लघुत्वात्वाच्च ननु तद्वाधिसामान्यधर्मप्रकारकज्ञानस्य स्वातंत्र्येणाविशे
षधर्मप्रकारकजिज्ञासायामहेतुत्वात्संभवोऽपरिहार एवेति चेन्न । स्वातंत्र्येणान्वयव्यतिरेकाभ्यामेव तत्सिद्धेः ॥ न चेष्टसाधनताज्ञाने राम॰
ऽन्वयव्यतिरेकस्य व्याप्तिज्ञानादेरप्यनुमितिसाधारणहेतुतायैवेनेः ॥ समाधेरप्युपपन्नत्वात् । किंच +क्षीरादावन्वयव्यतिरेकाविरोधात् । २९
तथा सति यत्रामर्षादेरपि व्याप्तिविषयकतानियमेन तदुपक्षीरादौ +वृष्ट्यादि सामान्यधर्मप्रकारकज्ञानमन्यानंततन्तत्स्यागाव

च्छिन्नायांघटत्वादिविशेषधर्मप्रकारकघटादिजिज्ञासात्वावच्छिन्नाभाधिकरणतायांघटत्वादिविशेषधर्मप्रकारकघटादिज्ञानेष्टसाधनता
ज्ञानत्वावच्छिन्नाभावाधिकरणतायाः प्रयोजकत्वकल्पनापेक्षया घटत्वादिसामान्यधर्मप्रकारकज्ञानत्वावच्छिन्नाभावाधिकरणतायाः प्र
योजकत्वकल्पने लाघवात्सामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासायां स्वातंत्र्येण हेतुत्वसिद्धान्ननु मन्मतेऽसंभववसंभावना
पीति चेद्यां के विन्तु यत्र घटइति ज्ञानं स्वरूपतो घटत्वप्रकारकं घटत्वादिना घटत्वव्याप्यधर्मप्रकारकज्ञानमिष्टसाधनमिति ज्ञानं च वर्त्तते त
त्र घटत्वव्याप्यधर्मप्रकारकज्ञानं भवति साकाप्रेच्छो याद्वेन चिकीर्षायां हि कृतिसाध्यताज्ञानस्येव सामान्यधर्मप्रकारकज्ञानस्यापि स्वातंत्र्येण वि
शेषधर्मप्रकारकजिज्ञासायां हेतुत्वमावश्यकं अन्यथा घटइति ज्ञानं । नापि तादृशेष्टसाधनताज्ञानादिच्छा यन्ते इति वाच्यं एतेन शिष्य
जिज्ञासाया दाचो क्रमेणासंगति तत्र गासंगमनं नत्साधुसामान्यज्ञानस्य विशेषजिज्ञासायामहेतुत्वात् । शिष्यप्रश्नो तस्मात्सावधिकृतेनानाव
श्यकत्वेन च शिष्यजिज्ञासयां ग्रंथकरणानियमात् । किंतु प्रकारान्तरेणातथाहि । स्वीयत्वप्रवेशे गौरवाद्दृष्टपथ्यात्वे प्रकृते ताने छेवजिज्ञा
सा तथा च गुरोर्निरूपितप्रत्यक्षज्ञानाप्रत्यक्षकार्यस्य तिस्ततः प्रत्यक्षकार्यज्ञानत्वेन प्रत्यक्षकार्यज्ञानसामान्यज्ञानं ततो ज्ञाते शिष्यप्रत
क्षकार्यज्ञाने उभयोः स्वेष्टसाधनताज्ञानादिच्छा सैव प्रकृते जिज्ञासा ननु इष्टप्रत्यक्षकार्यज्ञानसाधनतया वाक्येच्छादिक्रमेणानंतरमिथा
न सिसेवरीसा प्रयोजिकायः प्रत्यक्षभाग्यज्ञाने छायाजनकं यत्प्रत्यक्षकार्यज्ञानमिष्टसाधनमिति ज्ञानं तद्विषयः प्रत्यक्षकार्यत्वसंगतिः
घ ।अत्रयेपि नादृशजिज्ञासाजनकज्ञानविषयत्वमिष्टसाधनत्वादेव निप्रसंक्तं तथापि तादृशजिज्ञासाजनकज्ञानस्य विषयतया विशेषणे वि
शेषणात्वरूपविषयत्वं विवक्षितं तथा च यत्प्रकारेविशिष्टविषयकज्ञानेष्टसाधनताज्ञानत्वेन तादृशजिज्ञासाजनकता सधर्मसंयतिरितिकुडि

म·टी·
२८

तथि।तथियरास्तां।उक्तरीत्यामस्य स्वकार्यत्वादेरिष्टसाधनताज्ञाननिष्ठजनकतावच्छेदककोटौप्रवेशेनासंभवात्।सन्नंतजिज्ञासापदस्य ज्ञानसामा
न्येच्छायामप्युपपन्नत्वात्।न च ज्ञानसामान्येच्छावाचीजिज्ञासाशब्दोऽखंड एवेति वाच्यं।योगाभावात्।इच्छाशब्दं ज्ञानेच्छाशब्दं वा विहाय तादृ
शशब्दोपादाने बीजाभावाच्च।उक्तरीत्यामस्य स्वाप्रसंबद्धघटाद्यभिधानस्येव घटत्वादिवति प्रसंगस्य शिष्यजिज्ञासामादाय संगतिलक्षणतासं
गमनेऽपिघटद्योद्भावनं न दोषः न समंजसं।उक्तपुरुषसामान्यधर्मप्रकारकज्ञानस्य विशेषधर्मप्रकारकजिज्ञासाहेतुत्वसिद्ध्या आघटत्वाभावा
त्।नाप्यसंगतः।आमादौ इच्छायाः पिन्निरूपणेन गुरोः शिष्यीयप्रश्नस्य कार्यज्ञानेच्छयापि यथकरस्याप्रियमानत्।शिष्यीयप्रश्नस्य कार्यज्ञाने गुरो
रिच्छाभावस्य लेसंगतिर्नास्त्येवेत्यादिसमाधानस्य।शिष्यजिज्ञासाभावस्य लेसंगतिर्नास्तीत्यादिरीत्यासमाधानस्यापि सुवचत्वात्।किंच प्रकृते जाय
ते चेत्यादिना किमस्य कारणं कार्यं चेति शिष्यप्रश्नजनकजिज्ञासामादाय यदीधितौ तत्संगतिलक्षणतासंगमनमप्यत्रेऽनुमानस्य एवमुत्सिततोः प्रथ
मंजिज्ञासानुरूहे।जिज्ञासोरपेक्षास्यादभिधानं च विरुद्धेत।न च तस्य शिष्यजिज्ञासाविषयपरतुरीष्ठौ विवक्षितत्वनादिना।तथर्यकत्वेन
जिज्ञासापदविरोधवद्विरोधवद्विरोधोपीष्ट एवेति वाच्यं।उक्तरीत्या अविरोधेनैवोपपत्तेरेवमपि विरोधांगीकारे निर्मानत्वापत्तेरिति।केचित्तु
सामान्यधर्मप्रकारकज्ञानस्य स्वानंतरं विशेषधर्मप्रकारकजिज्ञासाजनकत्वेपि इच्छायां ज्ञानहेतुत्वस्य क्लृप्ततया नेदानीमपैवं नुक्त
तासमन्वयः।ननु कार्यत्वादिज्ञानं ज्ञानमेव जिज्ञासाजनकं वृष्टेच्छायां घटज्ञानवन्न तु कार्यत्वादिज्ञानभिन्नसंभवं एवं नितिचेन्न।यथेच्छा
यामन्यत्र स्वविषयसिद्धत्वज्ञानस्य प्रतिबंधकत्वे पि ज्ञानेच्छायां स्वविषयसिद्धेरेव स्वरूपतः प्रतिबंधकत्वं तथान्यत्र स्वविषयविषयक राम० २८
ज्ञानस्य कारणत्वेपि ज्ञानेच्छायां स्वविषयीभूतज्ञानमेव कारणमिति सम्भिष्यायात्।पद्मा कार्यतादिज्ञानमेव जिज्ञासाजनकत्वं दर्पिकार्यता

द्विविधकमेवेतिनासंभवः। अत्रवस्तुतादृशजिज्ञासाजनकतावच्छेदकतावच्छेदकीभूततादृशज्ञानविषयतानतस्यार्थस्याधिकरणतांविवक्षितंयादृशविशि
शिष्टगोचरज्ञानज्ञानत्वेनतादृशजिज्ञासाजनकत्वंतत्त्वमितिफलितोर्थः।तेनकार्यत्वघटकेपुपरार्थेइष्टसाधनताहेतोनातिप्रसंगः।य
दिच्छांप्रतिघटादिज्ञानस्यनस्वातंत्र्येणतत्कारणताकिंतुघटेष्टसाधनमितिसैतादृशज्ञानत्वादिनैवतत्तादृशयद्विशिष्टगोचरज्ञानत्वसधर्मितावच्छे
दकतयातादृशजिज्ञासाकारणतावच्छेदककोटिप्रविष्टत्वंनतत्त्वलक्षणार्थोवाच्यः।काधिकीजिज्ञासामात्रायेवलक्षणासमन्वयः।तेनसर्वेषां
तादृशजिज्ञासानुरूपेपिनक्षतिः।पञ्चापूर्वस्यपलेकस्यापिजिज्ञासानोत्पत्त्यातत्तत्कार्यत्वादिकमलक्ष्यमेव।अनुकार्यत्वादिज्ञानेयेनरूपेणेच्छा
तेनरूपेणतत्स्वज्ञातंपदार्थान्तरितत्तत्कथमिष्टा।ज्ञानेच्छयोःसमानप्रकारकत्वेनकार्यकारणभावात्।यद्यक्तितत्तापिकयमिष्टा।तस्यैवतत्ता
दृशज्ञानत्वेनदृशज्ञानंमेजानामितिसिद्धेर्वाप्रतिबंधिकायाःसत्वात्।नचुशाब्दबोधत्वादिनासिद्धत्वेनरूपेणोच्छेतिवाच्यं।प्रकृतेशाब्दबोधत्वे
नोद्देश्यतायांमानाभावात्।कार्यमस्तीतिशाब्दबोधेनापितदन्विष्टस्यापत्तेश्चेतिचेन्न।रूपान्तरेणासुवर्णत्वादिनासिद्धेपिसुवर्णरूपान्तरेणास्वत्वेन
च्छा।तद्रूपात्समानप्रकारकत्वेनसिद्धेःप्रतिबंधकत्वेपितेनरूपेणावस्थांसक्ताविच्छातेनरूपेणानस्याः।सिद्धिरितिविषयोपिप्रतिबंधकंदिशानि
वेश्यतेअनुभवंसिद्धत्वाज्ज्ञानेच्छयोअनुरोधात्।एवंचयत्रसमानप्रकारकसिद्धोसत्स्वयपिप्रहृतातौनेच्छानिवर्त्ततेतत्रसासिद्धिर्नतद्विष
यिणीतिफलबलात्कल्पनेइतिप्रकृतेनकाप्यनुपपत्तिः।कार्यत्वज्ञानत्वेनरूपेणासिद्धेर्विशेषरूपेणानुमानंकार्यमितिज्ञानविशेषाविषय
कत्वात्तस्यैवचसामान्यरूपेणेच्छाविषयत्वादित्याहुः।एतन्मतेपिविधिपमिष्टप्रत्यासमाप्तिनुत्वेकार्यत्वादीनांजनकतावच्छेदकेऽप्रवेशोतय

म.टी.
२९

दृत्यादिकल्पोन समंजसरा वेति ध्येयं । न चात्र तादृशजिज्ञासा निरूपितायां ज्ञानविषयतानतिरेकछेदकत्वमेव लक्षणस्य सत्ता द्रव्यादिवाच्यं । यथा सं
निवेशे वैयर्थ्याभावात् । इच्छादीनां व्यावृत्तिमंडनस्यायेन विषयत्वमिति प्राचीनमते इच्छाजनकज्ञानविषयत्वस्यैवेच्छाविषयत्वरूपत्वाच्च ।
न च संगतमेतत्संगतिलक्षणं । किमस्य कार्यमिति प्रश्नजनिकजिज्ञासयानुमानानिरूपणात् । तथा सत्यनुमानत्वरूपेणास्य तावच्छेदकवि
शिष्टस्य प्रतिपादकस्य तत्करणमनुमानमित्युत्तरस्यासंगत्यापत्तेः । किमस्य कार्यमिति प्रश्नस्य कार्यत्वविशिष्टेऽनुमितिकरणत्वप्र
पविशेषधर्मवोधकत्वस्यानुमानं कार्यमितिवाक्यदेव निर्वहनेः । यद्धर्मविशिष्टे यद्धर्मविशिष्टसंबंधो यत्प्रश्नवाक्यात्प्रतीयते तद्धर्मविशिष्टे त प ५
द्धर्मव्याप्यधर्मविशिष्टसंबंधबोधकोत्तरवाक्यस्यैव तत्प्रश्ननिवर्तकत्वात् । आख्यातवादे किं करोतीति प्रश्ने पचतीत्युत्तरस्य प्रश्नार्थकत्ववि
नानुपपत्तेश्चेति वदतो दीधितिकृतोपीदं संमतमिति चेन्न । किमस्य कार्यमिति जिज्ञासयाऽहसनाऽनुमाननिरूपणां किं तु तादृशजिज्ञासया
नुमानं कार्यमित्याकारकं यथापनः सामान्यतोनुमाननिरूपणानन्तरं किमनुमानमित्याकारिका पुनर्जिज्ञासा तदनन्तरं च तत्करणमनुमानमिति वि
शेषतोऽनुमाननिरूपणं तथा च न लक्षणासंगतिः । सामान्यतोनुमानाभिधानप्रयोजिकां किमस्य कार्यमित्याकारिकां जिज्ञासामादायल
क्षणासामञ्जस्यात् । न चैवं विशेषतोनुमानाभिधानप्रयोजिकां किमनुमानमित्यादिजिज्ञासामादायानुमानत्वादेरपि संगतित्वापत्तिरिति वाच्यं । राम०
इष्टत्वात् । प्रसंगएवांतर्भावाच्च नाधिक्यमिति संप्रदायः । केचित्तु पचकोवटइति जिज्ञासया कोवटइति प्रश्ने कंवुग्रीवादिमात्रसेवोत्तरं तत्र प्र २९

प्नवाक्यस्यघटपदानुषंगेनोत्तरवाक्यस्यप्रश्ननिवर्तकत्वंतथा प्रकृतेपि किंप्रत्यक्षस्यकार्यमितिजिज्ञासयाप्रश्नेऽनु
मितिकरणमनुमानमित्युत्तरवाक्ये प्रत्यक्षस्यकार्यमित्यनुषंगेणानुमितिकरणमनुमानंप्रत्यक्षस्यकार्यमितिवाक्या
र्थसंपत्त्याप्रश्ननिवर्तकत्वमितिनोक्तदोषइत्याहुः। अन्येतुतद्धर्मविशेषधर्मप्रकारकजिज्ञासायाःतद्धर्मव्याप्यत्वेनगृही
तधर्मावच्छिन्नविशेष्यकतद्धर्मविशेषधर्मप्रकारकज्ञानादपिनिवृत्तेरनुभवसिद्धतयानुमितिकरणमनुमानमित्युत्तर
वाक्येनापिकिंप्रत्यक्षस्यकार्यमितिजिज्ञासाबोधकप्रश्ननिवृत्तिःसंभवत्येवजिज्ञासोरनुमानत्वस्यप्रत्यक्षकार्यत्व
व्याप्यतयाग्रहणवत्तथानिरूपणात्। नचप्रत्यक्षकार्यंकिमितिजिज्ञासायाविषयीभूतंज्ञानंकार्यत्वावच्छिन्नविशेष्यकमिति
तदजनकेनोक्तोत्तरवाक्येनकथंतस्यानिवृत्तिरितिवाच्यं। उक्तजिज्ञासायांकार्यत्वस्योपलक्षणतयाविषयत्वात्। नचानुमा
नत्वस्यप्रत्यक्षकार्यत्वव्याप्यताग्रहकालेकार्यत्वविशेषानुमानत्वप्रका[redacted]कज्ञानस्यसिद्धत्वात्कथमुक्तजि २
ज्ञासेतिवाच्यं। अनुमानत्वप्रकारकज्ञानस्यसिद्धत्वेपितद्भिन्नकार्यत्वविशेषधर्मप्रकारकजिज्ञासायाबाधकाभावा
दित्याहुः। नव्यास्तुपद्योक्तलक्षणस्यासंगत्याआनंतर्याभिधानप्रयोजकजिज्ञासाजनकनिरूप्यतावच्छेदकधर्मप्रकार
कस्मरणप्रयोजकनिरूप्यनिष्ठसंबंधःसंगतिरित्येवलक्षणंप्राहुः। प्रत्यक्षानुमानपदार्थयोरुपजीव्योपजीवकभावसं
बंधज्ञानादनुमानपदार्थस्वरूपप्रकृतलक्षणलक्ष्यतावच्छेदकप्रकारेणानुमानस्मरणादनुमानपदार्थःकइति

 विशेषजिज्ञासयानुमितिकरणमनुमानपदार्थ इति निरूपणादुपजीवकत्वे संगतित्वनिर्वाहात्। एवं च सर्वत्र पूर्वापरनिरू-
पणविषययोः संबंध एव संगतिर्न तु निरूपितावच्छेदकधर्मः। एतदनुसारेणैव प्रसंगादिसंगतिस्वरूपाण्यूह्यानीत्याहुः।
अपरे तु उक्तसंगतिनिरासाय आनंतर्येत्यादिलक्षणवाक्यमेवान्यथा व्याख्येयं। तथाहि। आनंतर्याभिधानप्रयो-
जकजिज्ञासाया आनंतराभिधानस्य यादृशानंतराभिधेयज्ञानजनकत्वं तादृशत्वेन ज्ञानस्येच्छायाः सामान्यधर्मप्र-
कारकज्ञानविधया जनकमभिधेयतावच्छेदकप्रकारेणाभिधेयस्मारणाद्यस्मात्तद्विषयोऽभिधेयतावच्छेदकावच्छेदेन
ज्ञातः उपजीवकत्वादिलक्षणोऽभिहितनिरूपितः संबंधः संगतिः। प्रत्यक्षत्वानुमानत्वावच्छिन्नयो रूपजीव्योपजीवकभा-
वरूपसंबंधज्ञानादभिधेयतावच्छेदकानुमानत्वप्रकारेणानुमानस्मरणात्किमनुमानमिति विशेषजिज्ञासया तत्करण-
मनुमानमित्यनुमानाभिधानादुपजीवकत्वलक्षणसमन्वयः। एवं च संगतिपदस्यान्वर्थतापि संगच्छते। अस्यानंत-
राभिधानप्रयोजकजिज्ञासाजनिका गतिरनंतराभिधेयतावच्छेदकप्रकारिकास्मृतिर्यस्मादनंतराभिधेयतावच्छेदका-
वच्छिन्नत्वेन ज्ञातादुपजीवकत्वादिलक्षणात्संबंधादिति व्युत्पत्त्या समीचीनाभिरूढानंतराभिधेयस्मृतिजनकसंस्कारजन-
कज्ञानविषयरूपा गतिः संबंधस्तु उपजीवकत्वादिरिति व्युत्पत्त्यावा संगतिपदस्य संबंधनिष्ठानंतराभिधानप्रयोजकजि-
ज्ञासाजनज्ञानविषयत्वस्य प्रवृत्तिनिमित्तत्वात्। एवं चाभिरूपितस्याभिरूपविषयमाणस्य वा निरूप्यमाणानसंबंधस्यैव सं-

गतित्वात्संबंधोप्यनुमानत्वादिः प्रसंगादावंतर्भवतीति चिंत्यमित्याहुरित्यलमतिशयविस्तरेण। आनंतर्यमादिकं
न संगतिलक्षणां [illegible] घटत्वादावतिव्याप्तेः किंतु संगतेरानंतर्याभिधानव्याप्यत्वाभावहेतुतयेदमुपन्यस्तं संगतिलक्षणानु
प्रसंगाद्यन्यतमत्वमेवेति वदतां मतं दूषयितुमुपन्यस्यति अन्ये वदंतीति। घटत्वेति घटपदवाच्यत्वे सम्पर्थेः। घटोस्तीत्यतो
घटपदवाच्यमस्तीति बोधादिति भावः। को घटः। को घटपदवाच्यः। घटः। घटपदवाच्यः। घटत्वे घटपदवाच्यत्वे। आद्येप
त्वादावपीति अतिव्याप्तिरित्यनुषज्यते। आदिमा प्रतियोगित्वपरिग्रहः। अभावत्वज्ञानानंतरं प्रतियोगित्वज्ञानात्को
स्य प्रतियोगीति जिज्ञासायां प्रतियोगिनोनंतराभिधानात्। संगतिरेवेति। तथा च घटपदवाच्यत्वादेर्लक्ष्यतयातिप्र
संगाभावेनानंतर्येसादेः संगतिलक्षणत्वेन दोष इति भावः। नन्वेवं संगतेः षोढात्वमाद्यानंतर्यमत आह उपोद्घातेति
। एकप्रकृतानुकूलत्वस्यापरप्रकृतसंगतित्वाभावादाह प्रकृतं चेति। ज्ञापकत्वमित्यादीति। आदिना व्यतिरेकप्रयुक्तम
तिरेकप्रतियोगित्वपरिग्रहः। इत्यत्र एतल्लक्षणे। घटकत्वं सप्तम्यर्थः। तस्याज्ञातव्याप्तिकेत्यत्राभावान्वयः। एतद्घ
लक्षणाघटकव्याप्तिज्ञानाभाववत्त्व इति फलितोर्थः। व्याप्तिनिरूपणाभिमिति अनुमितिलक्षणोपोद्घातसंगतेत्यादिः एवमग्रे
पि। ज्ञापकत्वं ज्ञानसंपादकत्वं तच्च क्वचिद्घटकोपस्थापनतया न तद्घटकोपस्थितिं विना तज्ज्ञानासंभवात्। क्वचिद्व्य
भिचारसहकारितया सहकारितां विना प्रयोजनज्ञानासंभवात्। तत्राद्यमाहरावमिति। द्वितीयमाहरादमिति। किंचा

किं

वर्कः प्रमाणासहकारिः। अनुमितीतीति। अनुमितिहेतुत्वसाधकप्रमाणसहकारित्वाद्वादितर्कनिरूपणमित्यर्थः। तद्घटि
रेकप्रयुक्तव्यतिरेकप्रतियोगित्वं यथा वेदे। आचारमूलत्वं व्यवस्थापमानं तरं प्र[redacted] वर्जकज्ञाननिरूपणं
।जनकतासंबंधेन प्रवर्त्तकज्ञानस्य स्वरूपसंबंधरूपप्रवृत्तिप्रयोजकत्वव्याप्यतया प्रवृत्तिप्रयोजकत्वरूपाचारमूल
त्वव्यतिरेकप्रयुक्तव्यतिरेकप्रतियोगित्वरूपो योग्यस्तस्य प्रवर्त्तकज्ञाने संभवादिति। तत्र घटकत्वाहेः। आधेयत्वादिनामा
धारत्वादिघटकत्वाद्यभावेनोपयोग्यतमध्येनिवेशासंभवादाह एवमिति। अत्र चघटकत्वं घटकीभूतघटपदवाच्य
त्वादिस्वरूपमित्यभिप्रायेणोवघटपदवाच्यत्वादीनामुपयोग्यतमध्येनिवेशः कृतः एवमनुपेक्षणीयत्वमनुपेक्षणी
यवृत्तिधर्मस्वरूपमित्यभिप्रायेणोवाधेयत्वादेः प्रसंगमध्येनिवेशः कृत इति ध्येयं। प्रसंग एवेति। एवकारेणाघ
टपदवाच्यत्वस्योपयोग्यत्वव्यवच्छेदः। आहुरित्यस्वरसबीजं तु आधेयत्वादेरुपयोग्यतत्वाभावेन प्रसंगत्वेपि घटपदवाच्य
त्वादेरुपोद्घाततमेव न प्रसंगत्वं पंचसंगतिभिन्नसंगतेरेव प्रसंगत्वात्। अन्यथा संगतिमात्रस्यैव प्रसंगत्वसंभवेनैक
संगतिपरिशेषायत्तिरिति। स प्रसंगउपोद्घातोऽवसरो हेतुतानथा निर्वाहकैककार्यत्वेषो ढा संगतिरिष्यते इति संगति
गतिगमानक्रमेणसंगतिविशेषलक्षणान्याह। तत्रेत्यादिनास्मृतानामिति अकाविति शेषः जिज्ञासेति। अनंतराभि
धानप्रयोजकजिज्ञासेत्यर्थः। एवमग्रेपि। केचित्विति। अत्र षष्ठातन्तत्रूपद्वयघटितपाठः प्रामादिकः। तथा सति व

कुरनुपेक्षणीयत्वज्ञानापेक्षेणोपि अस्मिन्नुच्छृङ्खलद्विप्रतिसंधीनविशेषापेक्षायामसंगतेः अस्मिन्निति अर्थ इति शेषः
जिज्ञासोदयादिति इदमुपलक्षणं स्वीयानुपेक्षणीयत्वज्ञानस्य जिज्ञासाजनकत्वसंभवाद्धेयपि द्रष्टव्यं अवसरसवीजं तु संभवं ना
त्मकप्रतिसंधानेन जिज्ञासानुदयः निर्णयात्मकं च तत्सर्वत्र दुष्करमिति। ननु जिज्ञासितार्थसिद्धत्वस्याभिधेयानिष्टत्वं तस्य स्वरू
पत एव जिज्ञासानिवृत्तावेवोपयोगेन तज्ज्ञानेपि वक्ष्यमाणज्ञाने आनंतर्याभिधानप्रयोजकजिज्ञासानुदयेन वसंगमितासंभव
ध्येसत आह तस्यापीति पूर्वोक्त एव वक्ष्यमाणत्वघटितएव पर्यवसानमिति। पूर्वोक्तस्य सिद्धत्वकार्यं जिज्ञासानिवृत्तिघटितत्वेनैतस्य
सिद्धत्वघटितत्वेन परंपरया भेदादिति भावः। एतदुत्तरं हेतुतापावक्ष्यत्वे पि उक्तशापत्वाभ्योऽीतत्र हेतुताकार्यत्वस्याप्युपलक्षिका
हेतुतापदस्याजहत्स्वार्थलक्षणयाकारणत्वं कार्यत्वं चार्थः। अन्यतरत्वेन विभागान्नयोढात्वभंगः। वक्ष्यमाणत्वस्य आश्रयतानिरूप
कतान्यतरसंबंधेन हेतुतावत्वमेव हेतुत्वं तेन हेतुत्वकार्यत्वयोर्द्वयोरपि संग्रह इति ध्येयं। ननु हेतुत्वस्यापि लाघवेनानन्यथा
सिद्धत्वाघटितस्यासाधारणस्य साधारणप्रयोजकत्वात्मकतया निर्वाहकत्वस्य तेनाभेद इत्यत आह निर्वाहकत्वमिति। सूचितेति।
एतेन हेतुत्वं कारणत्वं निर्वाहकं कारणता निर्वाहकं कार्यत्वमिति यावत् एककार्यत्वं एकं कार्यैयपोरितिमुससाएककार्यकारित्व
मिति कस्यचिन्मतमपि निरस्तं पंतुकस्यत्वे संगमनिर्वाहात्। हेतुतयेति। प्रयोजकत्वात्मकहेतुतयेत्यर्थः। एतेन निर्वाहक
त्वसुपपादकत्वमेव एतद्बकारणतत्कारणसाधारणं प्रयोजकत्वं अतो हेतुतयानगतार्थतेत्यपि परास्तं। कश्चित्तु एककार्यत्वमि

२

भा० टी०

सस्यैकंकार्यंप्रयोरित्यादिव्युत्पन्नस्यैककार्यकारित्वमर्थः। एककार्यप्रयोजकत्वमितियावत्। यथाव्याप्तिपक्षधर्मतयोरि
त्यादिग्रंथं पूर्ववदित्याह तन्निराकरणार्थमाह एवमिति। एककार्यत्वं नैककार्यकारित्वं निर्वाहकत्वेन गतार्थत्वात्।
उक्तस्थले संगत्यनिर्वाहात्। बहुव्रीहिलक्षणया तत्पुरुषस्यांतरंगत्वाच्चेति भावः। केचित्तु निर्वाहकैक्यकार्यैक्ये इति पाठः।
निर्वाहकैक्यं एकनिर्वाहकनिर्वाह्यत्वं तदन्यत्वे सति तन्निर्वाहकनिर्वाह्यत्वमिति यावत्। कार्यैक्यं एककार्यप्रयोजकत्वं
तदन्यत्वे सति तत्प्रयोज्यकार्यप्रयोजकत्वं। निर्वाहकैककार्यत्वे इति पाठस्त्विं तृतीयः। तथा सति एकनिर्वाहकनिर्वाह्यत्वा
लाभादित्याहुस्तच्चिंत्यं उक्तरीत्या निर्वाहकत्वस्यैककार्यप्रयोजकत्वार्थकत्वेन एककार्यत्वस्यैव निर्वाहकनिर्वाह्यत्वार्थ
कत्वेन दोषासंस्पर्शात्। ध्येयमिति। यथा चैवं संगतिलिंगकैकवाक्यतानुमानेन सिद्धसाधनं तथा मागेवोक्तं। अतिप्रसक्तत्वा
त्। यज्ज्ञानेनेरंतियमेननतादृशजिज्ञासान्नाव्याप्तिसत्वात्। सर्वत्रेति। तथा च यत्र शिष्यजिज्ञासांविनैव शिष्यीयज्ञाने छ
यालाभादीच्छायावाकेन विरुद्धः उक्तः संचकेनापि नाध्यापितस्तत्र तत्संगतावव्याप्त्यानंतर्यस्यादिकं न संगतिलक्षणमिति
भावः। एतेन यत्र निरूपणानंतरं जिज्ञासारूपफलोपधानस्यावश्यकत्वं जिज्ञासया निरूपणस्य जिज्ञासांविनाऽसंभवात्। न
चेश्वरकृतग्रंथस्थले कस्यापि जिज्ञासयाऽनिरूपणान्नत्र लक्षणासंगतिरिति वाच्यं। तत्रापि गुर्वादिभिः शिष्यादिजि
ज्ञासयानंतराभिधानान्नजिज्ञासामात्रस्याऽदृष्टद्वारेश्वरीयानंतराभिधानप्रयोजिकामस्मदादिजिज्ञासामादाय वा

राम०

लक्षणासामान्यादिति दूषणोद्भावनं यत्तत्तु प्रसंगेति। अथानंतमतत्वस्याविशेषेण संगतिमात्रस्यैव सर्वसंगतित्वाप
त्तिरिति चेन्न। एतस्य संगतिसामान्यलक्षणत्वेन संगतिमात्रस्य सामान्यतः संगतित्वापन्नाविष्टापत्तेः। अन्यनिरूपिताम
निष्टप्रसंगादेरन्यनिरूपितानिष्टसंगतित्वापत्तेर्यद्यपि धानानंतरं स्फुटतत्त्वस्य यद्यपि धेयस्यानुपेक्षणीयत्वं तस्य तत्र तत्व
संगत्यादिविशेषलक्षणादेव निरासात्। एतेन प्रसंगादावनंतमतत्वस्य संगतित्वे तदनंतरमनिरूपितेपितेषितकार्यत्वा
देः संगतित्वापत्तिरित्यपि निरस्तं। अर्थलभ्यनिरूप्यनिष्टत्वस्य तत्राभावाच्च। तादृशकार्यत्वादेर्वक्ष्यमाणसंगतित्वविरहेणा
नंतमत्वाघटकत्वाच्च। न च तथापि प्रमेयपदव्यक्तिमिति जिज्ञासया निरूपणे प्रमेयमात्रस्य संगतित्वानुपपत्तिस्तादृशान
तमत्वाप्रसिद्धेरिति वाच्यं। अनंतमत्वाप्रसिद्धिरहितद्घटकभेदाप्रसिद्धिनिबंधना सा च न संभवति प्रमेयस्य प्रसंगतित्वेन
प्रमेयत्वावच्छिन्नभेदाप्रसिद्धावप्यनुभवसिद्धप्रसंगत्वावच्छिन्नभेदप्रसिद्धेः प्रसंगत्वाद्यवच्छिन्नभेदस्यैवानंतमत्वघटकत्वा
त्। तावद्वृत्तिवस्तुभूतत्वान्यकस्यानंतमतत्वस्यानुवचत्वाच्च। कारणे व्यभिचारात्। कारणतामंतर्भाव्य व्यभिचाराभावात् कारणत्वे प्र
संगादिति यावत्। दीधितौ तुल्यत्वेपीति के कुत्रिकम्यापेन पूर्वमनुल्लतस्यैवोपपादितत्वेन तुल्यत्वाप्रसक्तेः। यत्तु तुल्यत्वे
पीति दृष्टद्वारकत्वादिविशेषणानिवेशेनोपजीवकतायास्तुल्यत्वेपीमर्थ इति तदुद्धारत्वादुपेक्ष्यं। नस्मृतिः नोपजीवक
त्वादिति संगतिप्रदर्शकपंचम्यनुपपत्तिः। पंचम्युपपत्तिमेवाह व्याख्यायां एवं चेति। न हेतुतायामिति। वस्तुतस्तु पंचम्यां

४

प०टी०

प्रयोजकतार्थकत्वेपिहेतुपंचमीत्वमेव। कारकज्ञापकोभयसाधारणप्रयोजकत्वस्यैवहेतुपंचम्यर्थत्वात्। अनुशास
नांतराभावेनप्रयोज्यत्वस्यस्वातंत्र्येणपंचम्यर्थत्वेऽसामंजस्याच्च। किंविति। एवंचसमानविभक्तिवेद्यतया आनंतर्याभिधा
नप्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपसंगतिलक्षणामपिमूलतएवलब्धमितिध्येयं। प्रमाणोपजीवकत्वात्प्रत्यक्षा
नंतरमित्यंशंव्याख्यायंवक्तुंवादिसंमतत्वादुपमानात्प्रागित्यंशंव्याख्यातुमवतारयतिदीधितौलाघवाद्वायेमादित्याख्यायांउ
पमानएवेतिउपमानग्रंथएव। सूत्रार्थः एतादृशशब्देनसंगतिबोधकावसरादिशब्देन। शब्दलाघवमिति। इदंतुवलस
तांतथासतिशब्दोपजीव्योपमानात्प्रागित्येवरीत्याशब्दनिष्ठोपमानसंगतिप्रदर्शनमप्यनैवोचितमित्यपिद्रष्टव्यं। अभि
धानेअनुमानस्येत्यादि। किंनियामकमितिप्रत्यक्षोपजीवकत्वस्याविशेषादितिभावः। औत्सर्गिकत्वेनबाधकंविनानियत
त्वेन। आकांक्षारेति। अनुमानानंतरमुपमानस्याभिधानेकिंनियामकमित्याकारकेत्यर्थः। शब्दस्यचरममभिधानेउपमानो
पजीवकत्वस्यनियामकत्वेनशब्दस्यचरममभिधानेकिंनियामकमितिशब्दसंगतिप्रदर्शनप्र[illegible]जकाकांक्षायाअभा
वेपुउपमानसंगतिप्रदर्शनप्रयोजकाकांक्षायाःसत्वादत्रोपमानसंगतिदर्शनेलाघवंउपमानग्रंथेतत्संगतिप्रदर्शने
त्वाकांक्षांतरकल्पनेगौरवमित्यखंडलार्थः। उपजुशिष्यावधानायैवोपमानग्रंथेसंगतिदर्शनसंभवान्नाकांक्षांतरकल्प
नागौरवमितितन्न। शिष्यावधानस्यानुपेक्षणीयत्वरूपस्यासंगतित्वादित्याशंकानिरासस्तदारैवसंगतिदर्शनफलत्वं एवंच राम०

प्रत्यक्षोपजीवकत्वाविशेषात्प्रत्यक्षानंतरमुपमानात्प्रागनुमानाभिधानमनुमानानंतरमुपमानाभिधानं वासंगतमिति
संगतत्वादिशंकायाः सत्वादत्रैवोपमानसंगतिदर्शने शिष्यावधानसंभवाच्च एवं तत्र तद्दर्शने त्वसंगतत्वादिशंकांतरक
ल्पनेगौरवात् । न संगतिरिति । संगतिगतोऽपाठादिति भावः । सुप्रतिपदत्वस्योपयोगमाह दुरूहत्वेनेति दुर्वोधत्वेनेत्य
र्थः । सुवोधत्वं सुप्रतिपदत्वं दीधितौ अप्रसिद्धत्वादिति । अन्यथा प्रसिद्धेव कुतरवृत्तिमतिपन्निकत्वस्य धर्मस्य ज्ञानं कथं सं
भवति । न च गुरुकर्तृत्या प्रसिद्धि [redacted] संभवतीति वाच्यं । अप्रसिद्धिविरोधादिति चेन्न । गुरुकर्तृक अप्रसि
द्धेः प्राग् अप्रसिद्धिसंभवेन प्रसिद्धिकाले निरुक्तधर्मज्ञानासंभवात् । अनुमानस्य चार्वाकातिरिक्तसकलवादिप्रसिद्धत्वेनो
पमानस्य नैयायिकादिमात्रप्रसिद्धत्वेन परतगुरोरस्तूपमानमिति कथं नंतदेव केषांचिदेवतत्संमतं । न तु सर्वेषामित्युप
देशात् । व्याख्यापीनानुज्ञातेति । तथा चावसरे संगतिलक्षणाव्याप्तिरिति भावः । प्रमाणोति । चिंतामणौ तत एव जानत्वा
न्देवाकरतयोक्तं । अत एव वक्तव्यत्वस्यावसरइत्यादेवग्रंथशेषे ग्रंथांते । इतिशब्दस्येतिसमाप्तिपर्यायस्येत्यादिद्युपनिबंध
इति । वक्तव्यत्वस्यावसरत्वे ग्रंथांते अग्रेवक्तव्यं नास्तीत्येवमवसरसंगतस्याभावस्त्वेनापसमाप्तिपर्यायेति शब्दद्युप
निबंधः संगच्छते । प्रमथातद्रूपधर्ममेवस्मादिति भावः । अत्र च मस्तेव दुर्वादिसंमतत्वादिति पंचम्यर्थो ज्ञानप्रयोज्य
प्राथमिकजिज्ञासाप्रयोज्यत्वमिति ध्येयं । केचित्तु सजन्मावांतरवाक्यार्थज्ञानद्वारमहावाक्यार्थज्ञानद्वारमहावा

कार्यार्थज्ञानजनकत्वरूपैकवाक्यताप्रतिपत्तयेनिरूप्यमाणोनिरूपितनिरूपितसंगतिप्रदर्शनवन्निरूपयिष्यमाणानि
रूपितसंगतित्वप्रदर्शनस्याप्यावश्यकत्वेनानुमानेउपमाननिरूपितसंगतिप्रदर्शकंबहुवादीतिमत्वंतद्याचष्टेला
घवायेति।लाघवायपूर्वोपदर्शितैववाक्यताप्रतिपत्तिर्लाघवायअत्रैवानुमानेप्रत्यक्षसंगतिप्रदर्शकवाक्यएवउप
मानसंगतिउपमानस्यसंगतिंतन्निरूपितांसंगतिंदर्शयतिअनुमानइतिशेषः।लाघवायआकांक्षादिलभ्यार्थमि
र्थतात्पर्यकत्वेनलाघवायअत्रैवअनुमानएवउपमानसंगतिंउपमाननिरूपितांसंगतिंनतूपमानेनुमाननिरूपि
तामितिवार्थः।सुप्रसिद्धत्वेत्यादि।अनुमानस्यबहुवादिसंमतत्वेनप्राथम्यंजिज्ञासितत्वेनावश्यवक्तव्यतयाप्रथम
स्यानंतरमुपमानात्पूर्वमनुमाननिरूपणस्यावसरः।अनुमाननिरूपणानंतरमुपमानस्यावश्यवक्तव्यत्वेनोप
माननिरूपणावसरः।प्रतिबंधकजिज्ञासाभावेसत्यवश्यवक्तव्यत्वमेवह्यवसरः।आनंतर्यमित्यादिकंहिनिरूपितनि
रूपितसंगतित्वंनिरूपयिष्यमाणानिरूपितसंगतित्वंचपूर्वाभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वमेवतु
त्स्यचित्तिवेद्यत्वात्।तेनानुमानगतावश्यवक्तव्यत्वस्योपमाननिरूपितसंगतित्वानुपपत्तिरित्यादिखंडनार्थः।कुचिद्बहु
वादिसंमतनिरूपयिष्यमाणात्पूर्वमत्वेवादिसंमतनिरूपणोवसरस्यसंगतित्वेपिनक्षतिरित्याह।औत्सर्गिकीमि
ति।भावार्थमुपसंहरतितथाचेति।आनुमानगतसंगतिप्रतिपादकवाक्ये।अवसरसंगत्याअवसरसंगतिप्रद

र्शनेन अत्रानुमाने अनुमानस्य वा अवसरसंगमोपमाननिरूपितावसरसंगसेत्यार्थः उपमाननिरूपयामितिपंच
मीतत्पुरुषः उपमानान्पूर्वं निरूपयामितिमर्थः। प्रमाआख्याने अनुमानस्येतिशेषः। इदमुपलक्षणं वहुवादिसंमतत्वरूप
प्रसंगसंगत्येमपिद्रष्टव्यं। अनुमाननिरूपणानंतरमुपमाननिरूपणोऽवश्यवक्तव्यस्यावसरत्वमलवादिसंमतत्वसव
प्रसंगत्वमितितत्र्थतः पर्यवस्यतीत्याहुः। उपमितीत्यादि। अतिरिक्तांतमंतरपदस्यार्थः। अतिदेशवाक्यांतर्गतोपमि
तिविषयगवयादिशब्दस्यशब्दस्वरूपलाभस्वीकृतयातच्छक्तिग्राहकानुमानस्यापेक्षानसंभवतीतितदुपादानं। न
च गवयपदस्यापिलक्षणयावटकशक्तिग्राहकानुमानस्यापेक्षास्त्येवेतिवाच्यं। तथापिगवादिपदवहुवचपदेविशिष्ट
शक्तिग्राहकानुमानस्याभावेऽस्वरसात्। अतएवोपमितिवैफल्यापत्तेः। केचित्तु। शब्दांतरेण अंतरपदव्यवसायेनशब्दसमर्या
तरग्राहकमित्यर्थः। उपमितम[illegible]त्याख्यातिदेशवाक्यस्यपदशक्तिग्राहकमिति। यावत्उपस्थितिग्राह्यस्यगवयादिपदश
क्तिग्राहकानुमानस्यानपेक्षणांदंतरंपदमित्याहुः। ग्राहकमिति। अनुमानमितिशेषः। किंवत्वमित्यतउपयोगीत्यनेनना
मपः। आपाततमानेतिमात्रपदेनोपमितादिव्यवच्छेदः। उपयोगीति। स्मृतिंप्रत्यनुभवस्यहेतुतयागवादिपदशक्तिग्राहका
नुमानंविनाशक्तिग्रहेणातिदेशवाक्यार्थशाब्दबोधानुदयेनातिदेशवाक्यार्थस्मृतिरूपव्यापारासंभवादितिभावः। इद
मपिद्धाविरोपयोगमात्राभ्यांमानसशक्तिग्राहकमूलकात्मसेकपदार्थो[illegible]पनयाधीनमानसविशिष्टप्रत्यक्षरूपाद्वा

तिदेशवाक्यार्थज्ञातादप्युक्तस्मृतिसंभवेन निरुक्तानुमानस्यानियमेनानुपयोगात्। न तूपमिताविति इदमुपल स्मरतां
नवोपमाने व्यस्यमागात्क्रमेण सादृश्यविशिष्टपिंडदर्शनस्यैवोपमानत्वादिति सपिंडदृष्टत्वं। गोसादृश्याहीनां गोसदृशादि
पदसमर्पणां। अविषयत्वात्। अविशेषणत्वात्। तत्र तेषां विशेषणत्वे शक्यांतरसंभवग्राहकानुमानस्य विशेष
णांशग्राहकतया साक्षादुपयोगः स्यादिति भावः। अत इति। अत्रेति रूपयोः फलस्वरूपयोः उपमित्युपमानयोरु
पधाने एवं संगत्युपपादकस्य निरुक्तानुमानीयोपयोगस्यापेक्षितत्वेन व्यापारमात्रोपधाने तस्य किंचित्करत्वादिति
ति भावः। यद्यपि व्यापारं विनोपमित्यनुदयेन व्यापारोपयोगिनोनुमानस्य परत्वोपमितावुपयोगोस्त्येव तथापि विशे शे
षणांशग्राहकतया साक्षादुपयोगसंभवे परंपराश्रयणमनुचितमित्याशयः। उपजीव्यत्वेन उपमित्युपजीव्यत्वेन। एवं
च दीधितिस्थोपमानपदं भावव्युत्पत्त्योपमितिपरं द्रष्टव्यं। सप्रवृत्तिनिमित्तकत्वबोधकानुमानस्योपमितिविशे
षणांशगवयपदप्रवृत्तिनिमित्तत्वाविषयकत्वेन विशेषणग्राहकत्वेनोपयोगो न संभवतीत्यत आह समानेति। किंचि
द्धर्मावच्छिन्नशक्तिमत्त्वं हि सप्रवृत्तिनिमित्तकत्वं तथा च गवयपदे किंचिद्धर्मावच्छिन्नशक्तिमत्त्वे गृह्यमाणे किंचि
द्धर्मे गवयपदशक्यतावच्छेदकत्वस्यापि ग्रहादिति भावः। साधुपदत्वादिति। अत्रेदमवधेयं। वर्णसमूहत्वरूपं पद राम०
त्वमत्र हेतुस्तथा चासाधुपदे व्यभिचार इति साध्वितियदिवशक्ति। तद्रूपपदत्वं हेतुस्तस्य तावन्मात्रमेव सम्यक्। एवमा

काशादिपदेपि सावच्छिन्नैव शक्तिः पदान्निर्विकल्पकोपस्थितेरभावादिति न तत्र व्यभिचारः। यदि च पदान्निर्विकल्पकोप
स्थित्यंगीकारेणानिरवच्छिन्नैवाकाशादिपदशक्तिस्तदावृत्त्यर्थमनुक्तत्वमपि हेतौ निवेश्यं। गवयपदं गवयत्वप्रवृत्तिनि
मित्तकं गवयपदत्वादित्याद्यनुमानस्य साध्याप्रसिद्ध्यादिनाऽसंभवात्संभवे वा बोधमिति चेद्वैयर्थ्यान्तरं सिद्धान्तः। अत एव दी
धीतौ सामान्यतो दृष्टमित्युक्तमिति। केचित्तु गवयपदस्य सप्रवृत्तिनिमित्तकत्वज्ञान एव कीदृग्गवयपदप्रवृत्तिनिमित्तं वा
मिति प्रश्नसंभवेन प्रश्नद्वारा सप्रवृत्तिनिमित्तकत्वबोधकानुमानस्यापेक्षा मास्तु तन्न संभवति प्रश्नस्य क्वाचित्कत्वे
न तदर्थं तन्नियतापेक्षानौचित्यादित्यतो विशेषणग्राहकत्वेन तदपेक्षामाह गवयमइति गवयपदप्रवृत्तिनिमित्तत्वस्ये
ति। क्वचित्तु गवयपदप्रवृत्तिनिमित्तस्येति पाठस्तत्र गवयपदप्रवृत्तिनिमित्तत्वविशिष्टस्येत्यर्थः। तद्ग्राहकस्येति। सप्र
वृत्तिनिमित्तकत्वबोधकानुमानस्येति शेषः। इदं च निरुक्तसप्रवृत्तिनिमित्तकत्वबोधकानुमानस्योपमित्युपजीव्यत्वं
चिंतामणिकारमते शक्यतावच्छेदकपरिच्छेदस्योपमितित्ववादिनश्चिंतामणिकारस्य मते। आचार्यमते त्विति ग
वयत्वावच्छेदेन गवयपदवाच्यत्वविषयिणी गवयो गवयपदवाच्य इत्याकारा शक्तिपरिच्छित्तिरेवोपमितिः। शक्य
तावच्छेदकपरिच्छेदस्तु सांसर्गिक इत्याचार्यमतं। तु शब्दोऽस्वरसे स च शक्तिपरिच्छेदस्य सप्रवृत्तिनिमित्तकत्वबोध
कानुमानादिनैव संभवाच्छक्यतावच्छेदकपरिच्छेद एवोपमितिः। न च सामान्यतः शक्तिपरिच्छेदस्यानुमानेन संभवेपि गवय

प॰टी॰ त्वावच्छेदेनशक्तिपरिच्छेदस्योपमितित्वमेवेतिवाच्यं। अनुमानेनसामान्यतःशक्तिपरिच्छेदानंतरंगवयत्वावच्छेदेनशक्ति
परिच्छेदस्यशब्दतावच्छेदकपरिच्छेदरूपपर्यवसानेनतस्यैवोपमितित्वौचित्यादिति। इत्येवेति। तथाचैतन्मतेनिरुक्तस
प्रवृत्तिनिमित्तकत्वबोधकानुमानस्योपमित्युपजीव्यत्वंनसंभवति किंगवयपदंक्वचिच्छक्तंसाधुपदत्वादित्याकारकार
कानुमानस्यैवेतिभावः। अतिदेशवाक्यार्थज्ञानस्यशाब्दात्मकस्योपमितिकरणत्वेनतत्रशब्दांतरसमभिव्याहृतकानुमानस्ये
वस्यैवसाक्षान्नद्वारत्वापारेफलेवोपयोगःसंभवतीतिसप्रवृत्तिनिमित्तकत्वबोधकाद्यनुमानापेक्षानुसरणाद्धिमर्थमि
त्युपमानस्याशाब्दत्वंबोधयितुमाह अत्रोपमिताविति अयंवक्ष्यमाणः। अगृहीतेतिविशेषणं इत्यादि अतिदेशवाक्या त
र्थज्ञानमिति गोसदृशोगवयपदवाच्य इत्युत्तरवाक्यादिति भावः। सादृश्यविशिष्टदर्शनंसादृश्यविशिष्टस्यगवया
दिपिंडस्यदर्शनं। इतीति। इदंचार्वमतानुसारेसामणिकारमतेसामान्यतोगृहीतगवयपदप्रवृत्तिनिमित्तकस्यकीदृगा
वयपदप्रवृत्तिनिमित्तवानितिप्रश्नः। गोसदृशोगवयपदप्रवृत्तिनिमित्तवानित्यतिदेशवाक्यार्थज्ञानंचयोगवय
पदप्रवृत्तिनिमित्तवानित्युपमितिरिति द्रष्टव्यं। अत्रचसाम्प्राचीनमतेऽतिदेशवाक्यार्थज्ञानंस्वजन्यातिदेशवा
क्यार्थस्मृतिव्यापारकंकरणंसादृश्यविशिष्टपिंडदर्शनंतत्सहकारितन्नसादृश्याविशिष्टपिंडदर्शनस्यसहकारि राम॰
तयावश्यकत्वात्तद्वोद्बोधकीनयास्वजन्यातिदेशवाक्यार्थस्मृतिव्यापारकंकरणमित्यभिप्रायेणसादृश्यविशि

वृपिंडदर्शनस्योपमितिकरणत्वाभिधानं नव्यास्तु प्राचीनमतं न साधु। सादृश्यविशिष्टपिंडदर्शनवतोऽतिदेशवाक्यार्थ
ज्ञानोत्तरमेव कस्यचिदुपमितिसंभवात्। नाप्येतन्मतं। अतिदेशवाक्यार्थस्मृतेरव्यवहितोत्तरमेव सादृश्यविशिष्टपिंड
दर्शने पुनः स्मरणापेक्षाभावेन तस्य व्यापारत्वासंभवात्। किंतु सादृश्यज्ञानमात्रमुपमितिकरणं अतिदेशवाक्या
र्थज्ञानं सादृश्यविशिष्टपिंडदर्शनं च व्यापारः। उभयत्रैव विशेषणीभूतसादृश्यज्ञानस्य हेतुत्वादित्याहुः। एतावता सप्र
वृत्तिनिमित्तकत्वबोधकानुमानोपयोगप्रदर्शनेन। उपमितिप्रतीतिः। इदमपि छायाविल्कोपयोगमात्रप्रत्येकपदार्थोप
नयाधीनमानससप्रवृत्तिनिमित्तकत्वज्ञानादप्युपमितिसंभवेन सर्वत्रानुमानोपयोगाभावात्। नन्विति। उपमितावे
व विशेषणताग्राहकत्वेनोपजीव्यत्वादितिभावः। यद्यप्युपमानस्वरूपेपि स्वाश्रयकरणत्वसंभवं येनानुमानोपजीवक
त्वमस्त्येव तथापि सा साक्षात्संबंधेन नास्तीत्याशयः। अदृष्टेति। अदृष्टजनिकाया प्रवृत्तिस्तदौपयिकत्वमित्यर्थः। उपमा
नोपजीवकत्वादिति विशेषणताग्राहकत्वेनेत्यादेः। अनुमानत्वावच्छेदेनेति। आनुषंगिकगंगाजलसंयोगादेरौपमान
जनकादृष्टजनकत्वमानाभावादितो नोपमानत्वावच्छेदेनादृष्टद्वारकानुमानोपजीवकताहानिः। वस्तुतस्तु तस्योपमानादृष्ट
जनकत्वेपि सत्यन्यदृष्टस्याजातत्वात्तदृष्टेति घ्राणानुमानोपजीवकत्वमस्त्येवोपमान इति ध्येयं। अन्ये त्वेवं वदंति शाब्दबोधकंस
फलमेव पक्षफलमित्यादि समर्थनीयं। अस्वरसेति। वस्तुतः बहुव्रीह्यादिसंभवत्वादिसत्त्वोपमानोपजीव्यतयानुमानोपजी

वकतयाचावकृत्वादिसंमतत्वादिमर्थान्तिकोप्यत्रास्वरसइतितत्त्वा।मूलस्योद्धरत्वापत्तेः।मूलकारस्योपजीवकत्व
संगतेरभिप्रेतत्वेलाघवेनोपजीव्यत्वादुपमानान्याग्निस्मेववनुमुवितत्वाच्च।निसस्येत्यादिग्रासेरभावेईश्वरज्ञानस्या
प्युपमानत्वेनोप[illegible]मानत्वावच्छेदेनोपजीवकत्वानुपपत्तेरस्वरसस्यदुरुद्धरत्वाच्च।अनियामकत्वेइति।अत्रापिदेह
लीदीपकन्यायेनानंतराभिधानइत्यस्यान्वयः।दीधितीसंभवतिचेति।प्रसक्तोपजीवकत्वादित्यादिग्रन्थस्यानुमानंप्र
त्यक्षनिरूपणानंतरंनिरूप्यंप्रसक्तोपजीवकत्वाद्यद्धुपजीवके[illegible]भवतितत्तन्निरूपणानंतरंनिरूप्यमुपमान
निरूपणानंतरंनिरूप्यशाब्दवादित्येवंरीत्याव्याप्तिपरत्वमुक्तेस्यानुमित्यादौव्यभिचारेउद्भावितेनव्याप्तिपरत्वेयंग्रंथः
किंत्वभिधानंसंगतिव्याप्यमित्येवंपरः।पंचमीचमिहन्कप्रयोज्यत्वेइतिपूर्वव्याख्यानमधुनानुप्रसक्तानंतरमित्यसमे
वप्रसक्तोपजीवकत्वादित्यत्रापिप्रसक्तपदस्यतन्निरूपणपरतयोपजीवकपदस्योपजीवकनिरूपणाविषयप
रतयानुमानंप्रसक्तनिरूपणानंतरंनिरूप्यंप्रसक्तनिरूपणोपजीवकनिरूपणाविषयत्वात्यघान्निरूपणोपजी
वकनिरूपणाविषयस्तन्निरूपणानंतरंनिरूप्यंदंडनिरूपणानंतरंदंडजन्यत्वेननिरूप्यघटवदित्येवंरीत्याव्याप्ति
परोयंग्रंथः।कार्यकारणयोःपौर्वापर्यस्योचितत्वात्पंचमीचधूमादित्यादाविवहेतौविभाषायाः।निरूपणयोरपी राम
ति।अपिनानिरूप्ययोःसमुच्चयः।तथाचनिरूप्ययोरिवनिरूपणयोरपिकार्यकारणभावःसंभवतितत्राद्यस्यानुमिता

दोषव्यभिचारेणानंतराभिधाननियामकत्वे प्यंशस्य बाधकाभावेन तथात्वमिति भावः॥ यद्वा अपिः कार्यकारणभावइत्यनं
तरं योग्यः संभवति चेत्तस्यानंतराभिधाने नियामकः संभवति चेत्यर्थः॥ एवं च निरूपणायोः कार्यकारणभावो प्यनंतराभिधा
ननियामकः संभवतीत्यर्थः मुनि॥ नापक्षस्य पूर्वकत्वेनानुमानाभिधाने प्यनुमानाभिधानस्य पक्षस्याभिधानानंतर्यंत
र्यं त्रानुमानपूर्वकत्वेनानुमानाभिधानानंतरमेव पक्षस्य किं नाभिहितमिति स्वतंत्रेच्छस्येति भावेन मुनेरिच्छैवाभिधान
नियामिकावाच्या एवं चानंतराभिधाननियामिकापि मुख्यतः सैवेति तदन्वाचयायापि शब्दः॥ अत एव मुख्यतइच्छा
या एव नियामकत्वे न कार्यकारणभावो पि नियामकः संभवति न तत्रैव निर्बंध इति सूचनाय संभवति चेत्युक्तं चस्त्वर्थे:
नास्य्यापामिति ध्येयं॥ ननु कार्यकारणभावस्यानंतराभिधाननियामकत्वे संगतेरेव तन्नियामकत्वं फलितं तथा चा
नुमित्या दोषव्यभिचारे दोषो दुष्परिहर इत्यत आह व्याख्यायां एवं चेति॥ संगतीति संगतित्वेनेत्यर्थः नोक्तः संगतिगणो इत्या
दिः न दोष इति तथा च संगतेर नियामकत्वेन नोक्त दोष इति भावः॥ यद्वा ननु निरूपणायोः कार्यकारणभावस्यानंतरा
भिधाननियामकत्वे तस्यैव संगतित्वमुपेयतदात्मकसंगतेस्तन्नियामकत्वसंभवे नकुतस्तत्यागइत्यत आह एवं चेति
नोक्तः केरपि नो दूषितः॥ निरूपणयोरेव कार्यकारणभावस्य सांप्रदायिकैः संगतित्वेनोद्भकत्वात् न दोषः न संगतेस्तन्नियाम
कत्वत्यागे दोषः निरूपणाकार्यकारणभावस्य संगतित्वाभावेन तदात्मकसंगतेस्तन्नियामकत्वासंभवादिति भावः॥ अथ

म.टी. वासंगतिगतो हेतुतामात्रस्य संगतित्वोक्त्या निरूपणाहेतुत्वस्यापि संगतित्वेन संभवति चेत्सा द्विनासंगतेरनंतराभिधाननिया
मकत्वमिदानीमुक्तमिति मन्वानस्यानुसंगतगताप्यहेतुतापदस्य निरूप्यहेतुतापरतया वस्तुगत्या निरूप्याभिप्रस्या
निरूपणयोः कार्यकारणभावस्य संगतित्वाभावान्नेप तत्कथने विरोधः। अनुमितौ व्यभिचारेणातद्दसंभवश्चेत्साशंकाया
मा ह एवं चेदिति। नोक्त इति किंत्वनंतराभिधाननियामकत्वं तयैवोक्त इति शेषः। नत्वेतेन विरोधः। तथा च संभवति चेत्सा
द्विनासंगतेरनंतराभिधाननियामकत्वं मया नोक्तं किंतु निरूपणयोः कार्यकारणभावस्यैवेति। मदाशयाज्ञाने विरोधोद्भाव
नमयुक्तं॥ असंगतेस्संगतित्वेकथन एव विरोधादिति भावः॥ क्वापि कथं चिज्जिज्ञासेति॥ प्रत्यक्षनिरूपणोपजीवकनिरू
पणाकं किमिति जिज्ञासेत्यर्थः। संगतिरेव परंपरया निरूप्ययोः संगतिरेवा क्वचिदित्यस्वरसबीजमनंतराभिधाननियामक
स्य निरूपणयोः कार्यकारणभावस्य संगतित्वे संगतेरेव तन्नियामकत्वपर्यवसानेनानुमित्यादौ व्यभिचारः निरूप्यका
र्यकारणभावात्मकसंगतेस्तन्नियामकत्वसंभवेन तन्त्यागनिर्बीजत्वं वा। यद्वा निरूपणयोः कार्यकारणभावस्यानंतरा
भिधानप्रयोजकत्वं जिज्ञासाजनकज्ञानाविषयत्वान्न संगतित्वं संभवति। प्रत्यक्षनिरूपणोत्तरं तदुपजीवकनिरूपणाविष
यजिज्ञासयानुमाननिरूपणतोच साक्षात्तादृशनिरूपणाविषयत्वमेव प्रसंगात्मकसंगतिर्न तु परंपरया प्रत्यक्षनिरूपणो राम ०
पजीवकत्वमित्यस्वरसः क्वचिदित्यनेन सूचितः। आदौ प्रत्यक्षमिति। न च शाब्दात्मकप्रत्यक्षाभिधानं विनापि प्रकारां

तरेणापरस्य ज्ञानसंभवाद्दोषस्य लक्षणाभिधानं कृतमिति वाच्यं। शिष्यस्य शब्दात्मकलक्षणाभिधानेनैव परस्य ज्ञानस्य सुकर
त्वात्। एतेन ज्ञानात्मकनिरूपणयोः कार्यकारणभावः शब्दात्मकनिरूपणयोः पौर्वापर्येऽर्थं नियामक इत्यपास्तं। शिष्यस्य
शब्देनैव ज्ञानस्य सुकरत्वात् पौर्वापर्यसंभवात्। प्रयोज्यप्रयोजकभाव इत्यर्थ इति। वाक्यार्थज्ञानसंपादनद्वारा निरूप
णयोः प्रयोज्यप्रयोजकभावादिति भावः। अत्रोद्देशत्वं वाक्यार्थज्ञानस्य प्रकारांतरेणापि संभवेनानुमानबोधकशब्दस्य
लक्षबोधकशब्दापेक्षणानियमान्निरूपणयोः प्रयोज्यप्रयोजकभावो संभवश्चास्वरसः कश्चिदिसनेन सूचितः। अ
थ तत्पूर्वकमित्यादिसूत्रमिति प्रतीकमधृत्वैवादिपादार्थ्यां तर्भावेणाभावष्टेऽप्ययेति। सूत्रार्थमाह अप्ययेत्यादिनाद इति शेषः इ
ति। सूत्रस्यानुमानपदस्यानुमितिपरतया व्याख्यानेऽनुमानमित्यस्यापि शेषांतर्भावेन यथाश्रुतार्थकत्वेनुमानमि
तिप्रतीकं ऽव्यतेऽस्येव शेष इति ध्येयं। पूर्ववदिति पूर्ववदित्यादेः पूर्वकारणां विघते। यत्र लिंगतासंबंधेनेत्यादिपुस्त्या
कारणलिंगकत्वादिलाभः। यथा सेतिरवंडपटाधिकरणानं तेऽस्मिन्वात्तदंतमयं। उपरिदेशे उपरिदेशावच्छेदेन वृष्टि
मदुपरिदेशवतीत्यसाध्यमित्यस्याहुः सामान्यतो दृष्टमिति अत्र च सामान्यतोदृष्टं कार्यकारणभिन्नत्वेन दृष्टं तद्धर्मीस्ती
मित्युत्पत्तामत्वर्थी यावत्स्वयेन विवक्षितार्थलाभः सूत्रस्थानामुरवतया कल्पांतरमाह। यद्वेति। वस्तुतस्तु सामा
न्यतः कारणत्वस्य कार्यत्वस्य वाऽव्यावर्तकत्वेन पूर्ववत्साध्यस्य कारणं तल्लिंगकं शेषः साध्यस्य कार्यं तल्लिंगकं सामान्यतो

दृष्टसाधनस्य कार्यकारणाभिन्नलिंगकं इत्येवार्थो वाच्यस्तथा च पार्थिवांउत्वादिसाधकानुमानस्य तुरीयतापत्तिरतः
कल्पांतरमाह यद्वेति। पूर्वमिति। अन्वयव्यतिरेकयोः पौर्वापर्याद्व्यतिरेकिणोः पूर्वशेषवत्त्वे सहचारेण गृ
हीतसहचारजन्यग्रहविषयः एतत्कल्पे च साध्यतासंबंधेन पूर्ववत्त्वादीत्याशयेनाह एवंचेति। ननु व्याप्तिप्रत्यक्ष
स्यैवानुमानतया धूमादिप्रत्यक्षस्य पूर्वकत्वमनुमितित्वलक्षणासंभवति नानुमानत्वस्य ग्रामत आह। अथ चेति। इत्ये
वं इत्यादि। अनुमितिकरणस्यैव लघिमानुमितिसमुच्चयः एवं चानुमानपदस्यानुमितिपरत्वात्प्रत्यक्षपूर्वकानु
मितिकरणत्वप्रकारेणानुमाननिरूपणे प्रत्यक्षपूर्वकत्वस्यापि प्रकारत्वाद्यानप्रत्यक्षपूर्वकत्वेनानुमाननिरूप
णादिति दीधित्यनुपपत्तिः इति मते चेत्यिमते वेति। मते चेत्यस्य रत्नकोशीयं तु पूर्वमेवोक्तं। यथाश्रुतार्थकमिति त्वती
यलिंगपरामर्शस्य धूमादिप्रत्यक्षपूर्वकत्वसंभवादिति भावः एतन्मते च पूर्ववत्त्वादित्रिविधयतासंबंधेन बोध्यं।
ननु सूत्रे प्रत्यक्षोपस्थापकपदाभावेन कथं प्रत्यक्षपूर्वकत्वेनानुमाननिरूपणमत आह दीधितौ तच्छब्देनेति। व्या
प्यादिप्रत्यक्षेति। प्रत्यक्षमात्रस्य पूर्वप्रक्रांतत्वेपि बुद्धिस्थपराम्नातत्वादेतद्व्याप्यादिप्रत्यक्षस्य ग्रहणसमर्थादिति भावः।
व्याख्यायां पक्षादीत्यादिना पक्षधर्मतापरिग्रहः। अत्रे चेतत्सूत्रे चेत्यादि इत्यादीति। इंद्रियार्थसन्निकर्षोत्पन्नं ज्ञान राम०
मव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षमिति हि सूत्रं। अत्रेंद्रियार्थसन्निकर्षोत्पन्नमव्यभिचारिज्ञानं प्रत्य

क्षमितिजन्यप्रत्यक्षस्यमालक्षणं। कारणलक्षणानुरोधेनफलीभूतप्रत्यक्षप्रमायाएवलक्ष्यत्वान्नेश्वरप्रत्यक्षाव्याप्तिः
संनिकर्षःसंबंधः। शाब्दप्रमायाएकपदार्थेऽपरपदार्थसंबंधात्मकयोग्यतारूपगुणजन्यत्वेनार्थसंनिकर्षजन्यत्वाद
तिव्याप्तिवारणायेंद्रियेति। त्वङ्मनोयोगजन्यानुमित्यादावतिव्याप्तिवारणायार्थेति। सर्वांशेसाक्षात्कारिणीसाद्यलौकिकप्र
त्यक्षेंद्रियार्थजन्यत्वाभावादव्याप्तिवारणायसंनिकर्षेति। चक्षुःकपालादिसंयोगजन्यचक्षुर्घटादिसंयोगवार
णायज्ञानमिति। नचैवमप्यात्ममनोयोगजन्यानुमित्यादेःकथंवारणमितिवाच्यं। ज्ञानपदमहिम्नाविषयतासंबंधा
वच्छिन्नेंद्रियार्थसन्निकर्षजन्यत्वलाभेनतद्वारणात्। भ्रमवारणायाव्यभिचारीतिमनमिन्नार्थकं। अत्रचक्षुःसंयो
गत्वाद्यवच्छिन्नकारणताप्रतियोगिककार्यतासमानाधिकरणानुमित्यन्यजातिमत्त्वेसतिभ्रमभिन्नत्वंचसति
जन्यत्वंनि–ष्कलक्षणंबोध्यं। हृन्यतेनशाब्दत्वादेरप्यनेनज्ञानत्वगुणत्वादेर्व्युदासः। एतेनेंद्रियार्थसन्निकर्षत्वस्यानुग
तानतिप्रसक्तस्यदुर्वचतयानतद्घटितलक्षणंसंभवतिनापिप्रमेकंचक्षुःसंयोगत्वादिघटितमव्याप्त्यापत्तेरितिनिरस्तं।
यद्वेंद्रियत्वेनार्थत्वेनसन्निकर्षत्वेनतज्जन्यमव्यभिचारिज्ञानंप्रत्यक्षमितिलक्षणात्रयेतात्पर्यं। अत्रजन्यप्रत्यक्षत्वाव
च्छिन्नेनेंद्रियत्वेनहेतुत्वं। इंद्रियत्वंहिनजातिःपृथ्वीगतत्वेपृथिवीत्वादिनासांकर्यात्। इंद्रियैकत्वगतत्वेएकत्वजन्यता
वच्छेदकमिसयात्तत्जन्यैकतमात्रवृत्तिवैजात्येनसांकर्यात्। इंद्रियपरिमाणगतत्वेमहत्त्वादिनासांकर्यात्। उपाधि

त्वेतद्रूपेणाहेतुत्वेऽप्तिगौरवात्। किंच चक्षुष्ट्वाद्यवच्छिन्ने चक्षुष्ट्वादिना हेतुत्वावश्यकत्वादिंद्रियत्वेन हेतुतायां मानाभाव
इत्यभिप्रेत्याह मर्थत्वेनेति। अर्थत्वं विषयत्वं। अथ विषयत्वेन रूपेण लौकिकप्रत्यक्षत्वावच्छिन्ने एव हेतुत्वादलौकिं
कप्रत्यक्षेऽव्याप्तिरिति चेन्न लौकिकविषयतासंबंधेन जन्यप्रत्यक्षत्वावच्छिन्नं प्रत्येव विषयत्वेन हेतुतया विषयत्वावच्छि
न्नहेतुताप्रतियोगिककार्यतावच्छेदकधर्मवत्त्वस्य विवक्षणेनाव्याप्त्यभावात्। विषयस्य हेतुत्वे विनष्टातिरिस
मभिप्रेत्याह सन्निकर्षत्वेनेति। अत्र संनिकर्षत्वस्यैक्याभावेन चक्षुःसंयोगत्वाद्यवच्छिन्नकारणतागर्भं पूर्वोक्तनिष्ट
ष्टलक्षणं एवतात्पर्यं। केचित्तु लालानुमित्यादावतिप्रसंगवारणायेंद्रियार्थसंनिकर्षोत्पन्नमित्यस्येंद्रियार्थसंनिक
र्षातिरिक्ताद्नुत्पन्नमित्यर्थः अतिरिक्तं वा यज्ज्ञानं तथा च ज्ञानाकरणकमित्यर्थः संपन्न इत्याहुः। तन्निर्विकल्पकसवि
कल्पकभेदेन द्विधा विभजते अव्यपदेश्यं व्यवसायात्मकमिति। अव्यपदिश्यतेऽनेनेति व्यपदेशो नामजात्यादिरूपं विशेष
णमुपलक्षणं च तत्कर्मकत्वद्विशेष्यं पव्यदेश्यं तच्छून्यमव्यपदेश्यं तेन जात्यादिस्वरूपावगाहि वैशिष्ट्यानवगाहिज्ञानं
निर्विकल्पकं। विशिष्टोऽवसायो व्यवसायः स एवात्मा स्वरूपं यस्य तद्व्यवसायात्मकं। तेन नामजात्यादिरूपविशेषणो
पलक्षणान्यतरवैशिष्ट्यावगाहिज्ञानं सविकल्पकमित्यर्थः। अत्र प्रत्यक्षपदस्य फलकरणयोरुभयत्र प्रयोगादु
भयपरतया यतस्सन्निकर्षादिसाधारणोद्देश्यप्रत्यक्षप्रमाणमिति करणलक्षणस्याप्यलाभ इति केचित्। राम॰

२

प्रत्यक्षानुमानेत्यादिविभागसूत्रादेवप्रत्यक्षादिप्रमाणलक्षणोविशेषणीभूतानामेवानेनसूत्रेणलक्षितेतिनध्याहाइत
त्याहुरितिदिक्।तेनेति।इंद्रियात्मकप्रत्यक्षस्वरूपज्ञानंविनेंद्रियार्थसन्निकर्षोत्पन्नत्वेनफलीभूतप्रत्यक्षज्ञानासंभ
वादितिभावः।अन्यथा।प्रत्यक्षमात्रपरामर्शोऽत्रासंगतिरिति।फलतः स्वरूपतश्चेत्युक्तदिशास्वरूपयोरनंतराभिधा
ननियामकस्याप्यपेक्षितत्वेनतदलाभादितिभावः।नन्वापिप्रत्यक्षंव्याप्तिग्राहकमितिप्रत्यक्षविशेष्यकबोधेपिहेतुः
उपजीव्यंप्रत्यक्षानिरूपणोत्प्रत्यक्षत्वेनप्रत्यक्षाज्ञानाद्दृशधातोर्वृत्तिग्रहासंभवेनविशेष्यतावच्छेदकप्रकारकज्ञानाभा
वेनचसहचारदर्शनंव्याप्तिग्राहकमितिवाक्यात्सहचारस्यसहचारप्रत्यक्षत्वविशिष्टेव्याप्तिग्राहकत्वेवैशिष्ट्यावगाहिशाब्द
बोधासंभवादितिभावः।केचित्तुसहचारदर्शनंव्याप्तिग्राहक।मित्युक्तावपितुल्यविधित्वेघटतयाव्याप्तिप्रत्यक्षेपिसहचा
रप्रत्यक्षजन्यत्वग्राहेणातथानिरूपणासंभवाद्विशेषणाज्ञानसंपादकतयैवप्रत्यक्षनिरूपणंहेतुरित्याहुः।ननुस
हचारदर्शनंव्याप्तिग्राहकमितिमूलेदर्शनपदंज्ञानमात्रपरंविशेषणाज्ञानस्योपासहचारज्ञानत्वेनैवहेतुत्वोक्तेर्ननुप्र
त्यक्षत्वेनव्यभिचारात्तथाचसहचारप्रत्यक्षेतिदीधितिसंगतिरितिचेन्न।व्याप्तिप्रत्यक्षत्वावच्छिन्नेसहचारप्रत्यक्षत्वे
नान्वयव्यतिरेकाभ्यांविशिष्यहेतुत्वंसहचारदर्शनंव्याप्तिग्राहकमितिमूलमपिदर्शनपदव्याप्तिग्राहकपदघटक
ग्रहपदयोःप्रत्यक्षपरतद्धेतुत्वप्रतिपादकमित्याशयात्।दर्शनपदंप्रत्यक्षपरमेवजनकत्वंतुव्याप्तिज्ञानत्वावच्छि

न्ने सहचारज्ञानत्वेनैव ममेदं तदित्याशयात्॥ अथवैतत्पक्षस्वरसाद्युक्तमादिनेति। आदिना। तच्च व्याप्तिप्रसक्तेर्हेतुरित्यादि
मूले व्याप्तिप्रसक्तत्यादिनानुमाननिरूपणानन्तरीयकः। अत्र निरूपणानंतरं लक्षणादिकथनमात्रं किं तु परीक्षादिस
धारणं। उक्तरूपेणानिरूपणं वानुमानप्रामाण्योपपादकतया न परीक्षात्मकं। तेन मूले उक्तरूपेणालक्षणाद्यकथ
नेपि न क्षतिः। केचित्तु। व्याप्त्यादिप्रसक्तेति द्वंद्वो न तु तत्पुरुषः। अत्र प्रसक्तं च स्फुरणादिकं न तु साक्षात्कारः। तस्यैवानु
मानत्वात्। तथा च व्याप्त्यादिपूर्वकत्वे सति च स्फुरणादिपूर्वकत्वमनुमानलक्षणं पर्यवसन्नं प्रतिपदव्याप्त्युनिरुक्तमु
ष्ठेव(आ)दिना लक्षणांतराभिप्रायेण सहचारलिंगादिपरिग्रहः। एवं च सहचारादिपूर्वकत्वे सति च स्फुरणादिपूर्वकत
लक्षणां सहचारादिज्ञानमेवानुमानं वरामर्षस्य व्यापारत्वादेवानतिप्रसंगादित्याशयः। सहचारस्य पक्षे सत्त्वापि प्रत्यक्षपरामि
ष्टपरः। सहचारपदं व्याप्तिपरं पूर्वोक्तादिपदग्राह्यसहचारमात्रपरं वा सहचारप्रत्यक्षजन्यत्वादिनेत्यस्य लक्षणतावच्छेद
केनेति शेषः। तन्निरूपणादि। तत्स्वतन्त्रलक्षणादित्यर्थः। अयं भावः। स्वतंत्रपूर्णानां पदत्रलक्षणां कृतं तदेवात्र लक्षणतावच्छेदको। लक्ष
सलक्षणां कृतं तल्लक्षणतावच्छेदकज्ञानार्थप्रसक्तनिरूपणां हेतुरेवेति। एवं च निरूपणात्स्वलक्षणादिकथनमात्रत्वेपि
न क्षतिरित्याहुः। तन्न। तथा सति स्वरूपनिरूपणापोरेव कार्यकारणभावलाभेन फलनिरूपणापोः कार्यकारणभावोक्ता रामः
भादुक्तदिशाऽसंगत्यापत्तेर्व्यारप्यनुमानपूर्वं निरूपणापत्तेश्चेति दिक्। ननूपमानमितरत्वेनानुमाननिरूपणामप्युप

मौनं प्रामाण्यवादिनां। अनुमानेनैव गवयपदं सप्रवृत्तिनिमित्तकं साधुपदत्वादिति सामान्यतो गवयपदप्रवृत्तिनिमि-
त्तकत्वसाधकानुमानेनैवोपमानकार्ये+न निरूपणाधीनमिति वैयर्थ्यं किं न स्यादत आह अनुमाननिरूपणास्ये-
ति। एकदेशिनां उपमा+ति उपमानाप्रामाण्यवादिनो ऽप्युक्तानुमानेनैवोपमानकार्यं विशेषतः प्रवृत्तिनिमित्तपरिच्छे-
दमुपगच्छन्ति। तेषामयमाशयः उपमानप्रामाण्यवादिनामप्युपमितित्वं विशेषणाआह कत्वेनोक्तानुमानस्याव-
श्यकं। एवं च गोसादृश्यस्य गवयत्वस्यैव प्रत्यक्षत उपस्थितौ गोसादृश्यस्य प्रवृत्तिनिमित्तत्वे गौरवं गवयत्वस्य तथात्वे
लाघवमिति लाघवज्ञानसहकृतेनोक्तानुमानेनैव विशेषतो गवयपदप्रवृत्तिनिमित्तकत्वानुमितिसंभवान्नोपमा-
नप्रामाण्यमिति निरूपितं सर्वैरुपमानप्रामाण्यवादिभिर्निरूपितं एतेषां चायमाशयः अनुमितेर्व्यापकताव-
च्छेदकप्रकारकत्वनियमेनोक्तानुमानाद्विशेषतो गवयपदप्रवृत्तिनिमित्तकत्वानुमित्यसंभवादुपमानप्रामाण्यसि-
द्धिः। न च महानसीयवह्नौ लाघवमिति लाघवज्ञानसहकृतात् पर्वतो वह्निमान् धूमादित्यनुमानात् कथं विशेषतो महान-
सीयवह्न्यनुमितिरिति वाच्यं। तत्र वह्नित्वेनैव महानसीयवह्न्यनुमितिस्वीकारात् न तु तत्र च वह्नित्वेनानुमितिस्वीकारे त-
दुत्तरं पर्वतो महानसीयवह्निमान्न वेति संशयापत्तिः समानप्रकारकबाधबुद्धेरेव विशिष्टबुद्धिविरोधितया वह्नि-
त्वप्रकारकानुमितेर्महानसीयवह्नित्वावच्छिन्नकोटिकसंशयविरोधित्वासंभवादतो लाघवप्रतिसंधानस्थले व्यापक-

तानवच्छेदकेनापि विशेषरूपेणैवानुमितिरूपेण यथा तथा च कथमुक्तरीत्योपमानप्रामाण्यसिद्धिरिति चेन्न तथाप्युपमि
नोमीत्यनुव्यवसायेनोपमितित्वसिद्धेस्तदवच्छिन्नकरणतयोपमानप्रामाण्यसिद्धेरावश्यकत्वात् । अनुव्यवसाया
नादरेऽनुमितित्वस्याप्यसिद्ध्या ज्ञानलक्षणादिनैवानुमानकार्यसम्भवासिद्ध्यानुमानप्रामाण्यस्याप्यसिद्धिप्रसंगा
त्तानवानुव्यवसायसिद्धस्याप्युपमितित्वस्यानुमितित्वव्याप्यत्वमेवास्त्विति वाच्यं । व्याप्याद्यप्रतिसंधानेनोक्तानुमा
नानवतारेऽप्युक्तानुव्यवसायोदयेनानुमितित्वव्याप्यत्वासंभवात् । न चोक्तानुमानानवतारे विशेषणज्ञानाभावा
दुपमितिरेव न संभवतीति वाच्यं । तदानीमानसविशेषणज्ञानादेवोपमितिसंभवात् । एवं च सांकर्य्यापत्त्यासामानाधि
करण्यस्याप्यभावेनानुमितित्वविरुद्धमेवोपमितित्वमिति मितावाधौवोपमानप्रामाण्यसिद्धिरिति तदर्थः । अनुमानभि
न्नत्वेनोपमाननिरूपणार्थं । एवं च बहुवादिसंमतत्वादिति मूलमनुमानस्य बहुवादिसंमतत्वेनोपमानस्य तदंतर्भाव
प्रसक्तिरिति तद्भिन्नत्वेनोपमानं निरूपितं न तूपमानाभिन्नत्वेनानुमानं अनुमानस्याल्पसंमतोपमानांतर्भावाप्रस
क्तेरिति तत्परं द्रष्टव्यं । अत्र च बहुवादिसंमतत्वादिति पंचम्यर्थः प्रयोज्यत्वं उपमानशब्दस्यानुमानभिन्नत्वेनोपमाननि
रूपणापरत्विति ध्येयं । दीधितौ अनुमानोपमानपदयोः करणसाधनत्वभावसाधनत्वं चनेन फलयोः करणमोक्ष
निरूपणास्य कार्यकारणभावत्वाभद् इति ध्येयं । अत्रेदमवधेयं । प्रसक्तोपजीवकत्वादिति मूलस्य संगतिपरत्वेन

स्मात्प्रसक्तोपजीवकत्वज्ञानजन्यजिज्ञासाप्रयोज्यप्रसक्तनिरूपणानंतरकालीनत्वरूपवादिसंमतत्वज्ञानप्रयोज्यप्राथमि
कजिज्ञासाप्रयोज्योपमाननिरूपणाप्राक्कालीननिरूपणाविषयोनुमानमित्याकारकः शाब्दबोधः पंचम्यंतद्यार्थस्य धा
त्वर्थनिरूपणेव्युत्पत्तिवैचित्र्येण यथाक्रममनंतरकालीनप्राक्कालीनत्वयोरन्वयः पदा च तस्यानंतराभिधाननिया
मकनिरूपणाका[illegible]र्यकारणभावपरत्वं तदा तस्मात्प्रसक्तनिरूपणोपजीवकनिरूपणाविषयत्वेहेतुकप्रसक्तनिरूप
णानंतरकालीनत्वरूपवादिसंमतत्वप्रयोज्यानुमानभिन्नत्वप्रकारकोपमाननिरूपणाप्राक्कालीननिरूपणाविषयोनु
मानमित्याकारकः शाब्दबोधः प्रथमपंचम्यंतार्थस्य धात्वर्थनिरूपणेऽन्वयः अथवोपजीवकपदस्योपजीवकनिरू
पणामात्रपरतया पंचम्यंतलभ्यस्य प्रसक्तनिरूपणोपजीवकनिरूपणात्वहेतुकत्वस्यानंतरकालीनत्वेऽन्वयः द्वितीयपं
चम्यंतार्थस्य च धात्वर्थनिरूपणेप्राक्कालीनत्वेऽनुपमानपदार्थनिरूपणे वाऽन्वयः निरूपणा च लक्षणास्वरूपप्रमाणप
दिभिर्ज्ञापनं तच्च लक्षणास्वरूपप्रमाणपादिप्रकारकज्ञानानुकूलव्यापारः व्यापारश्च शब्द एव विषयता चास्यापा
दानुबंधिनी। तेन शब्दस्य निर्विषयत्वेपि न क्षतिरिति। भिन्नानुपाथिनस्तु प्रसक्तोपजीवकत्वादित्यादिनिरूप्यत इत्येतद्ग्रंथो
[illegible]केन विकल्पितो न तु वास्तविकः पाठः तथा सति शब्दखंडेऽथ शाब्दो निरूप्यत इत्यत्राप्युपमानोपजीवकत्वादुपमानानंत
रं शाब्दो निरूप्यत इति पाठापत्तेः किं तथानुमानं निरूप्यत इत्येव वास्तविकः पाठः तावतैव सिद्धसाध्यसमभिव्याहारे सिद्ध

साध्यायोपयुज्यते इति मापलभ्यस्योपजीव्योपजीवकभावस्य प्रतिबंधकीभूतजिज्ञासानिवर्त्तकसिद्धत्वकथनेनावसर
स्यवासंगतित्वलाभसंभवात्। अत्राथशब्दार्थ अनंतरत्वस्यात्र वृत्तिः एतस्य चाभेदसंसर्गेणाधात्वर्थनिरूपणोऽन्वयः नामा
र्थस्य क्रियाविशेषणतात्वस्थलेऽभेदसंसर्गेणैवान्वयस्य साकांक्षतया द्वितीयाविभक्तिकाथशब्दार्थस्य नि
रूपणा क्रियाविशेषणतात्वेन स्तोकं पचतीत्यादाविवात्राप्यभेदस्य संसर्गत्वेन तत्वाभात्। तथा च प्रमस्य निरूपणानंतरस्य
साहृति निरूपणविषयोनुमानमित्याकारकः शाब्दबोधः। आद्याथशब्दस्य प्रमस्य निरूपणाद्यंतर्भावेत्राशक्तौ ना
नार्थतापत्या तदनंतर्भावे सोव शक्तिर्वाच्या तथा चात्र प्रमस्य निरूपणोपस्थापकपदाभावेन कथं प्रमस्य निरूपणा
नंतर्यलाभ इति चेन्न। अथशब्दस्य पदनिरूपणानंतरं प्रयोगस्तन्निरूपणावधिकानंतर्यबोधकत्वयुक्तत्वात्। अथशब्दा
देव प्रमस्य निरूपणानंतर्यलाभात्। यद्वानंतरस्यात्र वृत्तित्वमेवाथशब्दार्थः तादृशवृत्तित्वस्य शक्यतावच्छेदकत्वेना
घवात्। न त्वनंतरस्य स्ताहृत्तित्वं तथा सति तादृशवृत्तित्वत्वेन तादृशवृत्तित्वस्य शक्यतावच्छेदकत्वे गौरवात्। न थावाथ
शब्दार्थस्य तादृशवृत्तित्वस्याप्रपतासंबंधेनैव धात्वर्थनिरूपणोन्वयः न चैवं नामार्थस्य क्रियाविशेषणत्वस्थलेऽभे
दसंसर्गकान्वयबोधनियमभंगप्रसंग इति वाच्यं। लाघवेन धर्मवाचकाथशब्दस्य धर्मिप्रतिलक्षणापत्त्याऽव्याप्तिः स्वीकृता ना
मार्थस्यैव क्रियाविशेषणतात्वस्थले तादृशनियमांगीकारात्। अनेन एवचनामार्थपोर्भेदेनान्वयस्याव्युत्पन्नतयाऽथशब्दार्थ

स्यतादृशशक्तित्वस्य कथं भेदेन धात्वर्थनिरूपितोन्वय इत्यपि परास्तं। अथवा तिङ्क्तनामार्थयोरेव भेदेनान्वयस्याव्युत्पन्नत्वात
अथशब्दस्यानंतरलक्षणाएव शक्तिर्न तु तादृशशक्तित्वेपि गौरवात्। आनंतरत्वं च स्वाधिकरणक्षणध्वंसविशिष्टत्वं। स्वपदं च
पन्निरूपणानंतरमथशब्दप्रयोगः तत्परं। तदपि परिचायकमात्रं न तु शक्यतावच्छेदककोटौ प्रविष्टं तेन न नानार्थताशंका
पि। एवं चाथशब्दार्थस्यानंतरलक्षणस्याधेयतासंबंधेनैव धात्वर्थनिरूपितोन्वयः। वस्तुतस्तु। अथशब्दस्यानंतर्य एव श
क्तिः क्षणत्वाद्यप्रवेशेनातिलाघवात्। आनंतर्यं च ध्वंस एव। तस्य च समानकालीनत्वसंबंधेन धात्वर्थनिरूपितोन्वयः
एवं च प्रसक्तनिरूपणाध्वंससमानकालीननिरूपणाविषयोनुमानमित्याकारकः शाब्दबोध इत्येव सारमिति प्राहुः। वस्तु
तस्तु। अनंतराभिधानप्रयोजकजिज्ञासाजनकज्ञानविषयत्वरूपसंगतिलक्षणार्थप्रदर्शकतया प्रसक्तोपजीवकत्वा
दित्यादिपाठ एव युक्तः। एकत्र संगतित्वप्रसक्तोपदर्शितमतं तत्प्रदर्शनं तु अथेति संगतिमात्रमेव प्रदर्शनीयाभिति शब्दस्तत्र
दै अथशब्दो निरूप्यत इत्यादिपाठ एव युक्तः। अत्रैव तत्प्रदर्शने च प्राथम्यमेव विनिगमकमिति दीधितिकाराशयः
प्रतिभातीति कृतं पल्लवितेन। नानासत्संप्रदायागततर्कविद्यानिर्मत्सराभावनयास्मेनाः। व्याख्यां महीपामवलोक्य दद्या
वहंतु संतोषममंदमंतः १ संगतासंगतिग्रंथे व्याख्यापारचितामया। अमयं यद्विशिष्याथ्यासासांवचदर्शिता २
इति श्रीमत्पदवाक्यप्रमाणपारावारीणमुकुंदपंडितात्मजमहादेवपंडितविरचिते भवानंदीप्रकाशे संगतिप्रकाशः

नत्वाशंकरपादाब्जंभजतामखिलेष्टदं।भवानंदस्वचोव्याख्यांकुर्वेनुमितितत्त्वसरो १ किमितीति।पूर्वमनुमाननिरूप
णस्यप्रतिज्ञातत्वेनतद्विहायानुमितिनिरूपणेऽर्थान्तरापत्तेरितिभावः।विभागादीति।आदिनातच्चानुमानंपरार्थंस्यापक्षा
धर्मतादिपरीक्षापरिग्रहः।विशेषणत्वादिति।तथाचविशिष्टबुद्धिंप्रतिविशेषणज्ञानस्यहेतुतयाऽनुमितिनिरूपणं
विनानुमाननिरूपणासंभवादनुमितिनिरूपणमितिभावः।परंतुफलतःस्वरूपतश्चेत्यादिग्रंथपर्यालोचनयापूर्वंप्रस
क्तोपजीवकत्वादित्यादिनाप्रसक्तप्रमितितत्करणनिरूपणानंतरमनुमितितत्करणनिरूपणप्रयोजकत्वेनप्रसक्तोप
जीवकत्वस्यप्रसक्तनिरूपणोपजीवकनिरूपणाविषयत्वस्यचोक्तत्वादत्रविशेषणत्वस्यानुमितिनिरूपणप्रयोजकत्वो
क्तिर्व्यर्था।नचतस्यसविशेषणेहीतिन्यायेनानंतर्यप्रयोजकत्वमेवनतुनिरूपणप्रयोजकत्वमितिवाच्यं।तथापिप्रतिज्ञा
तप्रमाणतत्त्वविवेचनोपयोगिनःप्रमात्वेनानुमित्युद्देशस्यैवानुमितिनिरूपणप्रयोजकत्वसंभवेनविशेषणत्वस्यतदुक्तेर्वै
यर्थ्यानुद्धारादिति।तन्न।प्रसक्तप्रमितितत्करणनिरूपणानंतरमनुमितितत्करणनिरूपणेप्रसक्तेर्विनिगमकाभावेनादाव
नुमानमेवकुतोननिरूपितमित्यनुमितिनिरूपणप्राथम्यायविशेषणत्वाभिधानात्।तथाचविशेषणत्वादादावनुमिति
निरूपणमितिविनिगमकतयाविशेषणत्वस्यप्राथम्यप्रयोजकत्वपर्यवसितप्राथमिकानुमितिनिरूपणप्रयोजकत्वो राम०
क्तिरितिभावः।एतेनानुमितितत्करणोपायनिरूपणस्यैवपूर्वंप्रतिज्ञातत्वेनोभयलक्षणस्यैवकर्तव्यत्वेनानुमानलक्षणे

कर्तव्येऽनुमितिः किमितित्वस्थिते सत्संगतमित्यपि निरस्तं। विनिगमकाभावेनादावनुमानत्वस्यतो कर्तव्येऽनुमितिरेवादौ कि-
मितित्वस्थिते सत्यर्थे तात्पर्यात्। अत एवात्र यद्विशेषणतयानुमितेरादौ निरूपणं तदानुमितित्वलक्षणप्रविष्टत्वात्साध्यादेरे-
वादौ निरूपणमुचितमिति शंकाया अप्यनवकाश इति ध्येयं। ननु तथापि तत्करणमनुमानमिति लक्षणवाक्येन त-
द्व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानपरत्वस्य दीधितिकारेणावक्तव्यतया कथमनुमितित्वेनानुमितेर्विशेषणा-
त्वं। न चानुमितित्वेनानुमितेरविशेषणत्वेपि उक्तज्ञानत्वेनोक्तज्ञानात्मकानुमितेर्विशेषणत्वमस्त्येवेति वाच्यं। तथास-
ति तज्ज्ञानार्थमनुमितित्वं लक्षणतावच्छेदकीकृत्य लक्षणाकरणस्यानुपपत्तेरिति चेन्न। तस्य दस्योक्तज्ञानपरत्वे-
प्यनुमानपदस्यानुमितित्वावच्छिन्नानुमितिकरणपरतया लक्षणतावच्छेदकमध्येनुमितित्वेनानुमितेर्विशेषणत्वानपाया-
त्। प्रकारतायामिति। न च प्रकारत्वाद्यर्थे तृतीयानुशासनं नास्तीति वाच्यं। जटाभिस्तापस इत्यादौ वैशिष्ट्यरूपार्थे इत्थं-
भूतलक्षणे इति तृतीयानुशासनसत्त्वात्। प्रकारत्वादेरपि वैशिष्ट्यरूपत्वात्। ननु लक्षणादिप्रकारकशाब्दएव एव निरूप-
णोपपत्त्या कथं विदभिधाने निरूपितमित्यप्रयोगात् तथा च तृतीयान्तार्थानन्वय इत्यत आह। निरूपणं शाब्द इति विशिष्टवाच-
कपदस्य विशेषणावोधकपदसमभिव्याहारे विशेष्यमात्रबोधकताया व्युत्पत्तिसिद्धत्वादिति भावः। तथा च मूले निरूप्यत इ-
त्यत्रोक्तरूपालक्षणादिप्रकारकः शाब्दएव निपूर्वकरूपधातोरर्थः। अस्य यत्तच्छब्दस्य स्वपूर्वोपस्थितपरामर्शकत्वमुप-

त्रिभंगापत्तेः एतेनात्रत्य सप्तम्यादिप्रकारकत्वेन निरूपणास्याप्रक्रांततया दीधितिकृतो व्याख्यामध्येनजीयांतस्यागकथनविरोध
इत्यपि निरस्तं। निरूप्यते इत्यत्र निरूपणास्यार्थादेवलक्ष्यतादिप्रकारकत्वलाभ इत्यपि कश्चित्। ननु विशेषणते सप्तम्यनु
नुशासनात्कथं सप्तम्या विशेष्यतात्वमर्थ इत्यत आह। तथा चेति। अनुमानस्यानुमित्याधारत्वाभावादाह स्वविषयकेति। स्व
त्वगस्य स्वविषयकपन्निरूपणान्तात् प्रकारत्वमित्यर्थः। तथा च प्रकारतात्वेन निरूपकप्रकारत्वस्य संबंधत्वे पक्षप्रकारत्वमा
त्रस्य संबंधत्वं। अनुमानेऽनुमित्सप्रकारकत्वेपि विशेष्यतीभूतनिरूपणोनुमितिप्रकारकत्वेन विशिष्टेऽनुमितिप्रकार
कत्वमिति स्वत्वनायस्वविषयकनिरूपणोस्तु कः इत्यपक्षापि शास्त्रज्ञानमिति वृद्धे वयिकाधारसप्तमीयमिति भावः। एतेनात्र
सप्तमीनिरूपकप्रकारतायामिति निरस्तं। तथानुशासनाभावात्। स्वविषयकेत्यादिकं च विशेषणानिष्टसंबंधभानानामीकर्तव्या
चीनमते विशेष्यनिष्ठतत्स्थानमते तु स्वप्रकारकनिरूपणाविषयतासंबंधो बोध्यः। शब्दात्मकनिरूपणास्वनिर्विषयकत्वात्तत्प्र
कारत्वमिति। सतिसप्तमीति। एतन्मतेनुमानमात्रं तच्छरीरप्रवेशस्याप्यंतलक्षणतोस्वादिनिरूपणतावेदकसंतत्प्रसर्गादेवलभ्यतेन तु
विशिष्टं तच्छरीरप्रवेशस्याप्येवं तथा सति निरूपणास्य तत्सरे प्रवेशस्याप्यत्वेन क्रियात्वाभावात् प्रसज्यभावेनभावलक्षणायति
स्त्रानुशिष्टसतिसप्तम्यनुपपत्तेः। सतिसप्तम्यर्थस्य पूर्वकालीनत्वं द्विवाहेकर्तृकयोर्नादौ मुख्यं क्रियते रसाहे दृष्टत्वात्।
तथानुमितिनिरूपणाच्चितं। ननु प्रकृतसर्थानुमानपूर्वकालीनत्वस्यानुमितिनिरूपणतोऽप्रयोजकत्वात्कथमन्वय इत्यत आह अनु

मानेतिमविष्यत्वबोधककर्तव्य इति परेन सतिसम्प्रम्या पूर्वकालीनत्वे बोध्यत इति सूचितं। इत्यर्थः इति पर्यवसितार्थः। निरूपणी
यानुमान पूर्वकालीनत्वस्य सविशेषणो हीतिमायेनानुमान निरूपणा पूर्वकालीनत्व पर्यवसानान्तरो व इति भावः। निमित्तस
प्तमीति। निमित्तवाचकपदात्सप्तमी स्यात् तन्नैमित्तिकक्रियाकर्मयोगे सप्तमी सर्थकेन निमित्तात्कर्मसंयोगे इति सूत्रेणास प्त
मीत्यर्थः। अत्र नैमित्तिकी क्रिया अनुमितिरूपणा क्रिया त[redacted] स्याः कर्म अनुमितिः तया योगः सच पूर्वोक्त
एवात्र बोध्यः। विशिष्टे निमित्तत्वस्येति सविशेषणे हीतिमायेन विशेषणानिमित्तत्व पर्यवसितस्येत्यादिः। तयोः कं। अनुमान
निरूपणार्थमित्येतत्पर्यवसितमनुमाने निरूपणीये इत्युक्ते अनुमतद्वयेपि सम्प्रत्यर्थस्य कथमनुपपत्तिः स्थिते ऽनुमिति निरू
पणो ऽन्वयः। एवं पूर्वमते तत्र क्रियाभविसति सप्तम्यनुपपत्तिः द्वितीयमते चनैमित्तिकक्रियाभावे निमित्त सप्तम्यनुपपत्ति
रत आह अत्रेति। उभयमतेपि मतद्वयेपि। इत्यत्र यद् इति। अनुमितिरित्यस्य लक्षणावाक्यादपकर्षेणाध्याहारेणावा निरूप्यत इति पू
र्वोक्तक्रियानुषंगेणावतथात्र यद् इति भावः। यत्तु लक्षणावाक्ये ऽनुमितिरित्यस्य सत्वात्तत्रैव क्रियानुषंगेणाविवक्षिताऽपवा
श्यान्नापकर्षोऽध्याहारो वेति तन्न लक्षणावाक्ये निरूपणाप्रतिज्ञाया असंगतेः। अमन्दीधितिकृतापकर्षाघनुक्त्यापत्तेश्च।
लोल्लनेगौरवमनुमितिनिरूपणस्य पूर्वं प्रतिज्ञातत्वेनेदानीं प्रतिज्ञातत्वनुपपत्तिर्मतद्वयेप्यस्वरसो बोध्यः। सर्वत्रलक्ष
णासेश्च्यापि। व्याप्तिज्ञानत्वादिनापि। इदमुपलक्षणं। अनुमानस्य लक्षणघटकत्वेनानुमितेरनुमानपूर्वं निरूपणो

म.टी.

नुमितित्वलक्षणाघटकत्वेनव्यावृत्तेरपि। अनुमितिपूर्वं तिरूपणापत्तिरित्यपि द्रष्टव्यं। करणस्वरूपस्य क्रियभिदभिन्नत्वाभावादाहअत्र
त्रेतिक्रियाव्यक्तिभेदात्करणताभेद इत्यत आह भेद इति विभिन्नप्रमाणत्वमिति। प्रमाबीजास्य प्रमाणताभेदकत्वादितिभावः
ननुस्वरूपभेदादेवविभिन्नप्रमाणत्वमास्तामत आह व्याप्तीति। अत्रकेचित् दीधितौ अहितेति। अत्रैव विश्रामः मणिकार इति
शेषः। तथा च स्वानंशेणापलेखो न तु पाठधारणं व्याप्तिव्याप्तीतिपाठधारणासंगतेः अस्य क्रियात्वलक्षणमात्रत्वेन क्रिया
लक्षणघटकानुमानलक्षणसाकाङ्क्षावात्। न च व्याप्तीत्यस्य व्याप्तीत्यादीत्यर्थकत्वस्यावश्यकतया तथा पाठसत्त्वेन वादिप
दांतर्भावेनानुमानलक्षणस्यापि धारणांकृतमिति वाच्यं। तथा सति कोटिष्व मानासनत्वकरणमित्यत्र मानलक्षणधारणा
स्यासंगत्वापत्तेरित्याहुः। आदिपदांतर्भावेनाध्यवनयर्थस्यापि विविशिष्य पुनर्धारणासंप्रदायसिद्धमतो न दोष इत्यपि केचि
त्। अन्ये तु तत्र लक्षणामिसनंतरं वक्तुमितिपूरणीयं आह एतस्य क्रियालक्षणमाहेत्यर्थ इत्याहुः। अपरे तु भावक्तुसाप
थमलक्षणशब्दइतरज्ञानभेदपरः पूर्वशब्देजनकपरः षष्ठीतत्पुरुषसमासः स्वार्थे कः द्वितीयलक्षणशब्दःकरणा
पुस्त्यः तच्छब्देन क्रियापरामर्शः क्वचित्समस्तपदैकदेशार्थस्यापि तच्छब्देन परामर्शदर्शनात्। तथा च क्रियेतरभेदज्ञान
जनकं क्रियालक्षणमाहेत्यर्थो न कश्चिद्दोष इति प्राहुः। अत्रेदं बोध्यं दीधितौ तत्रैसार स्याहेसंतमेको ग्रंथः न तु मल्लस्य
तन्य हार्थव्याख्यानमिदं। तत्रेति तयोर्मध्ये इत्यर्थकं निरूपणीयइत्यनंतरंयोज्यं। अनुमाने निरूपणीये इति प्रथमाद्विव रामः

नंनतुसप्तमीकरणास्यैवादेहरूप एवार्थः तथाच पूर्वमनुमितितत्करणनिरूपणयोः प्रतिज्ञातत्वेनानुमितितत्करणोभयेपि स्मरणा
दिभिन्निरूपणीये परंतु तयोर्मध्ये करणस्यानुमानस्यानुमितिवैलक्षण्याधीनविलक्षणाकरणताकतया हेत्वनुमितिरूप
णमिति पर्यवसितार्थः शेषं पूर्ववदिति। वक्ष्यमाणार्थस्पष्टत्वबोधकपरार्थघटितत्वाभावादाह। अत्रेति दीधितौ व्याप्ती
त्यादि व्याप्तिविशिष्टत्वं व्याप्तिसंबंधः अत्र विशिष्टपदं भावकांतं व्याप्तेर्विशिष्टं पत्रेत्यादिमुखमोक्तसंबंधलाभः अन्यथा
अपार्थकत्वप्रसंगात विशिष्टपदेन वैशिष्ट्याभ्युपगमस्य विशिष्टत्वलाभासंगतेः पक्षधर्मत्वं पक्षानुयोगिकहेतुतावच्छे
दकसंबंधः तथाच पोरेकधर्मिसंबंधरूपसामानाधिकरण्यावगाहीत्यर्थः पर्यवसितः। नचैवं प्राचां नये संबंधसंबंध
स्वविशिष्टबुद्धौ भानेन पक्षविशेष्यकपरामर्शे व्याप्याप्तिसंबंधानुयोगित्वपक्षसंबंधप्रतियोगित्वयोर्भानेन निरुक्तसा तं
मानाधिकरण्यावगाहित्वात तस्य संग्रहेपि व्याप्यविशेष्यकपरामर्शसंग्रहः नचैवं व्याप्यपक्षानुयोगिकव्याप्यप्रतियोगि
कसंबंधावगाहितया नासंग्रह इतिवाच्यं। तथासति प्राचां नये भासमानवैशिष्ट्यप्रतियोगित्वानुयोगित्वयोरेव प्रकारत्व वि
शेष्यत्वरूपतया तस्य व्याप्यप्रकारकत्वपक्षविशेष्यकत्वापत्तेः नचतस्य पक्षप्रतियोगिकत्वेन व्याप्यानुयोगिकत्वेन च सं
बंधावगाहितया नोक्तापत्तिर्निर्णयस्संग्रह इति वाच्यं तथासति पक्षव्याप्ययोरनुयोगित्वप्रतियोगित्वयोरेव सत्वेन प्रतियोगि
त्वाभावेन तस्य अप्रमत्वात्तेरितिचेदत्र केचित् व्याप्यविशेष्यकज्ञाने स्वानुयोगिकसंयोगप्रतियोगित्वादिरूपाधेयतेव संसर्ग

भ०टी०

तथा च तस्य व्याप्ये व्याप्तिसंबंधानुयोगित्वसंयोगप्रतियोगित्वाद्यवगाहनेन नासंग्रहो न वोक्तदोष इत्याहुस्तन्नत्विं संबंध्यास
ति पक्षविशेष्यकज्ञानेपि स्वप्रतियोगिकसंयोगानुयोगित्वादिरूपाधिकरणत्वस्यैव संबंधमानत्वात् संयोगादेः संबंध
त्वविरहापत्तेः न चेष्टापत्तिरनुभवविरोधात् इतरथा विरोधाच्च । अत एव सिद्धान्तानुसारिणां सरणिः पक्षविशेष्यकज्ञा
ने अधिकरणत्वावच्छिन्नसंयोगादिः संसर्गतया भासते अधिकरणत्वस्य प्रतियोगित्वमनुयोगित्वं च क्रमेण प्रका
रे विशेष्ये च भासते व्याप्यविशेष्यकज्ञाने चाधेयत्वावच्छिन्नसंयोगादिः संसर्गतया भासते आधेयत्वस्य प्रतियोगि
त्वमनुयोगित्वं च प्रकारे विशेष्ये च भासते तथा च सर्वत्राधेयताधिकरणत्वान्यतरावच्छिन्नसंयोगादेरेव हेतुतावच्छेद
कसंबंधतया तदन्यतरप्रतियोगित्वानुयोगित्वभानेन हेतुतावच्छेदकसंबंधसंबंधभानमिति न कस्याप्यसंग्रहो न वो
क्तदोषः पक्षविशेष्यकज्ञाने व्याप्ये व्याप्तिसंबंधानुयोगित्वपक्षसंबंधप्रतियोगित्वयोर्व्याप्यविशेष्यकज्ञाने च व्या
प्ये व्याप्तिसंबंधानुयोगित्वपक्षसंबंधानुयोगित्वयोर्भानात् । न चैवमपि आधेयत्वाधिकरणत्वयोरुक्तस्वविनिवेघ
नामते तादृशज्ञानयोराधेयताधिकरणत्वोभयविषयकतया प्रत्येकमुभयविशेष्यकत्वमुभयप्रकारकत्वं च दुर्वा
रमिति वाच्यं । तन्मतेन योरुभयविषयकत्वेपि तदन्यतरप्रतियोगित्वानुयोगित्वयोरेव भानेनोभयप्रतियोगित्वानु राम०
योगित्वयोर्भानेनोक्तापत्त्यसंभवात् अधिकं चैतन्मतेन प्रपंचयिष्यते अर्थ इति चरमज्ञानपरस्य सर्वमतेसमाना

र्यकता नद्धिनिर्मुक्तार्थोक्तिरिति ध्येयं। पदार्थतावच्छेदकेति। न च व्याप्तिविशिष्टसाध्यः पदत्वाभावेन व्याप्तिविशिष्टत्वप
क्षधर्मत्वयोः कथं पदार्थतावच्छेदकत्वमिति वाच्यं। पदार्थतावच्छेदके सन्नेनान्वयितावच्छेदकस्य विवक्षितत्वात्। व्या
ख्यायां। अतन्त्वपादितिः एकविशेषणतावेसादिभुक्तानुरोधेन स्वातंत्र्येण विशेषणतया तच्छाब्दबोधे प्राधान्ये
न तदुपस्थितेर्हेतुतया तदभावेन तदन्वयबोधासंभवादिति भावः। लक्षणेति। न च नीलादिपदस्य गुणे शक्तत्वान्न तत्र ल
क्षणेति वाच्यं। प्रकृते तस्य गुणि[illegible] निरूढलाक्षणिकतया प्राधान्येन गुणोपस्थित्यर्थं लक्षणाङ्गीकारे बाधकाभा
वात्। केचित्तु गुणवचनान्मतुपो लुगिष्ट इति मतुपो लुप्तत्वेन नीलादिपदस्य नीलरूपादिसंबंधविशिष्टार्थकतया
नीलरूपादिसंबंधस्यैव पदार्थतावच्छेदकत्वान्न दोष इत्याहुस्तन्न गुणवचनादिसादेनी लक्षणादिसादिप्रयोगस्यासा
धुतामात्रज्ञापकत्वेन नीलादिसंबंधस्य पदार्थतावच्छेदकत्वे मानाभावात्। माभाशिकाग्गौरश्वस्यादो ऽश्वत्वादीनां
लब्धोसत्वस्य योरिति। बाधितत्वादिति। तथा च भावप्रत्ययस्य कर्मधारयोत्तरत्वानुपपत्तिरिति भावः। अनुभवविरोध
मप्याह। नीलेत्यादि। अवच्छेदकतासंबंधेनेति प्राचीनमतेन। नव्यमते ऽवच्छिन्नत्वसंबंधः कस्मद्धन्वसाधारणदोषमाह
एवमिति। युक्तिभेदकत्वमेव। समस्त्रिव्याहारज्ञानकार्यकारणाभावमेदकत्वमेव। लक्षणशक्तेरिति यं चमी। नापि सा
दिपत्त्वे नेतरसाकल्यमन्तिमस्त्रिध्येश्शक्तिः स्वतरत्वनिमित्तो विरद्धपमन्वयेनेवेष्टसिद्धेरिति। तत्र पदार्थानां वारद्धपम

भ.टी. न्वयेमानाभावात् । न चैवं घटपदार्थस्य कथं वा रहृत्वमन्वय इति वाच्यं गगनतरविरहे कुत्रचिज्जद्दंगीकारेपि गगनांतरसत्वेस
र्वत्र तद्दनौचित्यादिसाशयात् । अतिप्रसक्तत्वादिति । इतरवृत्त्यावपि वैशिष्ट्यस्यासत्वृत्तिधर्मावच्छिन्नप्रतियोगिताकस्ये
तरवृत्तित्वाभावस्य सत्वादित्यर्थः । अप्रसिद्धत्वादिति ॥ न च गगनेप्रसिद्धिः लघुसमनियतगुरुरूपस्य प्रतियोगिता
नवच्छेदकत्वेन वृत्तितत्समनियते तरवृत्तित्वावच्छिन्नप्रतियोगिकाभावस्याप्रसिद्धेस्तामर्यात् । गुरोरप्यवच्छेद
कत्वांगीकारेणाप्रसिद्धिरत आह बाधादिति इतरत्वस्य केवलान्वयितया घटादेरपीतरत्वादिति भावः । न चेतरत्वेप्र
कृतसर्थघटान्वयवत्त्वस्य घटेतरवृत्तित्वावच्छिन्नप्रतियोगिताकाभावसत्वात्सत्वान्न बाध इति वाच्यं ।
तस्य गगनमात्रवृत्ती तरवृत्तित्वावच्छिन्नप्रतियोगिताकाभावातिरिक्तत्वेन शक्यतावच्छेदके तरवृत्तित्वावच्छि
न्नप्रतियोगिताकाभावत्वामात्रात्तत्वेन शाब्दबोधे भानासंभवादित्यत्र तात्पर्यात् । न चैवमपि सकलवृत्तिमतो विशि
ष्टस्यैवशक्यत्वमस्त्विति वाच्यं । साकल्यापरस्य घटादेरप्यलाभ्यत्वेनतत्रापि विशिष्टान्वयसंभवात् । ननु हरिप
दोपस्थितयोः सूर्यास्वयोः परस्परमन्वयबोधाभावेनैकपदार्थानां परस्परमनन्वयेनेतरवृत्तित्वादीनां कथमं
रसरान्वय इत्यत आह मुख्यविशेष्यत्वेति । पचतीत्यादावेकपदार्थानां कृतिवर्तमानत्वादीनां परस्परमन्वय राम०
स्पष्टत्वादितिभावः । न च तत्र पाकादावेवर्तमानत्वाद्यन्वय इति वाच्यं । पाकादेः सिद्धत्वेपि पचतीत्यादिप्रयोगास

पत्तेः तत्र घटत्वमित्यादौ। तद्वेत्यादि। अत्र च नीलत्वसमवायी तस्य समवायेन नीलरूपवानर्थः अभिन्नसमवेतेति चोत्पन्नत्वेनो
लरूपवतोऽभेदाधिकरणासमवेतत्वरूपसंबंधप्रदर्शनपरं। तथाच समवायेन यो नीलरूपवान् स्वाभेदाधिकरणासमवेतत्वसंबं
धेन तद्विशिष्टोऽसत्त्वं मत्वर्थतावच्छेदकं मत्वर्थजन्यबोधे ऽसत्त्वयार्थतं भेदानीलगुणावत उत्पन्नत्वे प्रकारत्वादिति पर्यव
सन्नं प्रथाऽस्य तं तन्नासंगच्छते नीलपदस्य नीलरूपप्रकारकसमवायसंसर्गकबोधजनकत्वे समवायस्य प्रकारत्वासंभवात् अ
भिन्नसमवेतत्वस्य मत्वर्थत्वासंभवाच्च उपाधितया। कारणत्वव तत्त्वंडोपाधितया स्वरूपसंबंधेनैव उक्तमत्वर्थता
वच्छेदकरूपस्वरूपसंबंधेनैव तेन संबंधेन निरूढत्वरूपसंबंधेन। तदुक्त्वभिधानेन। नीलोऽसत्पद नीलेन नीलोत्पलपदमुक्तमत्व
मर्थतावच्छेदकप्रतियासने नभानमिति किंचिदंशो प्रकारतया किंचिदंशो संसर्गमर्यादयेत्यादि। एवं च दीधितौ सामानाधिक
रण्यवचनत्वादित्यस्य एकधर्मिवृत्तिमत्वसंबंधरूपसामानाधिकरण्यबोधकत्वादित्यर्थः बोधकत्वं चैकधर्मिवृत्तित्वांशे प्र
कारतयोभयसंबंधांशे संसर्गमर्यादयेति विवेकः इति ध्येयं नीलत्वेत्यादि। एकधर्मिवृत्तित्वसंबंधेन सामानाधिकरण्य
तया एकधर्मिवृत्तित्वे भिन्नत्वसमवायस्योक्तो सत्त्वत्वसंबंधस्य च भानादिति भावः। इदं चोत्पत्तत्वसमवायघटितोक्तो सत्त्वत्व
संबंधभाने ऽसत्त्वसमवायस्यापि भानमित्याशये नोते दितरासमवेतत्वस्येत्यग्रे तन्मप्यनयैव दिशा समर्थनीयं। अमथाप्र
तिनेत्यादिविवक्षया मारादिशाऽसंगतेः अभासतइति यथा वलयदर्शिष्टानजुबंधितत्वनसाध्यत्वेन साधनतानां त्रयाणां लिङ्गऽर्थ

म॰ टी॰ तेपि श्येनेनाभिचरन्यजेतेत्यादौ बलवदनिष्टाननुबंधित्वांशस्यायोग्यत्वाद्भानेपीतरांशो भासते योग्यतात्तथा प्रकृतेऽपीतरावृत्ति
त्वांशस्याप्रसिद्धत्वाद्भानेपि सकलवृत्तित्वांशभाने न विरुद्धमिति भावः। गुरुत्वस्य स्वरूपसंबंधेनैव विशिष्टनिरूपितायाः समवा
यसंबंधावच्छिन्नाधिकरणतातादात्म्यकसंबंधेन। तस्या विशिष्ट[illegible]निरूपितसमवायरूपत्वं तस्य च विवक्षितविवेकेन
विशिष्टरूपत्वमितिरीत्या विशिष्टस्वरूपत्वात्स्वरूपसंबंधत्वात्। तदितरासमवेतत्वस्य निवाधादित्यग्रिमेणान्वयः। गुरुगान्य
त्वविशिष्टसदितरस्मिन्गुणे समानाधिकरण्याद्विशिष्टसत्तायाः समवायेनावृत्तित्वस्यासंभवात् विशिष्टाधिकरणत्वस्य गु
णेऽसत्वे विधिविशिष्टाधेयत्वस्यानतिरिक्तत्वेन गुणोपि सत्त्वादिति भावः। इदं च विशिष्टनिरूपितसमवायसंबंधावच्छिन्नाधिक
रणात्वस्य विशिष्टसमवायरूपत्वं तस्य च विशिष्टानतिरेकितया समवायरूपत्वमित्यभिप्रेत्य। एतदेवाभिप्रेत्य सामान्यतए
व विशिष्टस्यानतिरेकितयेत्युक्तं। एतेन महत्त्वमर्थं तावच्छेदकताघटकसंबंधेनैतदितरासवृत्तित्वस्य तद्वृत्तेश्चाभिधानेनात्र
निरूक्ताधिकरणात्वस्यैव तत्वेनासमवेतत्वस्यैवाभिवेशानदितरासमवेतत्वस्येसंगतमसंगतं च पूर्वोक्तं नीलत्वसमवायि
समवायस्याभावादितीति निरस्तमित्याहुः। तदितरत्वेसादि। अत्रापि खंडशः शक्तिसंसर्गी कृत्यबोधप्रकारः सुधीभिरूह्यः। विव
क्षितत्वादिति। नचैवमुक्तरीत्या सामानाधिकरण्याभावः आशंकितस्य च एवेतद्विवक्षणो नास्यत्र पूर्वोक्तस्यैवादरात्। यद्वे राम॰
तद्विवक्षणोपि प्रकृतत्वर्थाश्चितवृत्तिमतोभावप्रसया र्थत्वमावश्यकं अन्यथा संयोगविशिष्टबोधकमहोतरस्मा यप्रसेन

संयोगवोधोपपन्नयेन वृत्त्यंताभावे प्रतियोगिवैयधिकरण्यस्यावश्यं निवेशनीयतया गगनाभावस्य तथात्वेन घटत्वविशिष्टसंयोग
गादिवोधापत्तेः तथा चोक्तरीत्या सामानाधिकरण्यवोधो निरावाध एव । वस्तुतस्तु । तत्त्वे साहित्यं येन नीलोत्पलत्वविशिष्टत्वविशिष्टत्वोक्तस्व
रूपसंबंधेन नीलोत्पले तादृशवृत्तित्वे सति सकलनीलोत्पलवृत्तिनीलाकारकत्वे निरूक्तवृत्तित्वप्रकारेण नीलोत्पलत्वावच्छेदेनोक्तस्वरूपसंबंधा
तर्गतत्वेन सर्वांशे संसर्गमर्यादयैव बोधः सामानाधिकरण्यभानं दुर्वचमभिप्रेतं । नीलोत्पलत्वमित्यादौ प्रकृतिप्रत्ययार्थतावच्छेदकं तच्चे
त्यादिना निरुक्तस्वरूपं नीलत्वावच्छिन्नोत्पलत्वं तच्च विशिष्टत्वसामानाधिकरण्यघटितं तस्य प्रकृत्यर्थतावच्छेदकताघटकसंबंधोपि
स्वरूपमेवेति तेन संबंधेन तद्वृत्तित्वलाभादेव सामानाधिकरण्यलाभ इति प्रकृतसंगतेः तथा चैतद्विवक्षणोपपत्तिप्रसंगासंभववार
णाय तद्वृत्ये प्रतियोगितायां प्रकृत्यर्थतावच्छेदकताघटकसंबंधावच्छिन्नत्वस्य निविष्टतया तत्संबंधांतर्गतत्वेन तादृशसामाना
धिकरण्यभानमयावश्यकमिति स्वारस्यं संबंधेनैव प्रकृत्यर्थतावच्छेदकताघटकसंबंधेनैव वृत्तिरितिरेतिद्वंद्वपक्षाश्रुताभिप्रायेण ।
कस्तुतस्तु एकत्वादेराश्रयभेदेन भिन्नतया कस्याप्येकत्वादेः सकलैकवृत्तित्वाभावेनैकत्वादेरप्यसाभाषस्योक्तनिवेशस्यावश्य
कत्वेन तद्वृत्ये प्रतियोगितायां तत्संबंधावच्छिन्नत्वबोधं अनंतेति । प्रकृत्यर्थतावच्छेदकभेदेनेत्यादि । इदं च तत्तत्संबंधस्यापि विश
क्यतावच्छेदककोटौ निवेशाद्युपगमेनेन प्रातिस्विकरूपेणाघटत्वविशिष्टे घटत्वत्वादिना तत्तद्व्यक्तित्वादिना वा गुरुत्वविशिष्टे वा गुरु
त्वत्वादिना वस्तुतो घटत्वविशिष्टे वाकाशादिपदवाच्यत्वविशिष्टाकाशत्वादिनापि निरुक्तनिवेशाद्ये । अनुगतसंबंधसत्त्वे न सममभिव्याहा

म.टी. रलघुत्वेनानन्तमप्येकैव शक्तिरिति नानन्तशक्तिकल्पनेत्यत आह यद्वेति। धर्मत्वेनैवेति। एवकारेणेन तादृनित्वादिधर्मावच्छेदःत
स्याचानंतशक्तिकल्पनाभावे पीतादृनित्वादौ केति पपशक्तिकल्पनायेक्षयाधर्मत्वावच्छिन्नैकशक्तिकल्पनेत्याद्यपसितिभावः
नच धर्मत्वमाधेयत्वं तच्चाननुगतं तत्स्मातिरिक्तत्वेपि संबंधभेदेन भिन्नं तथा च शक्त्यैक्यमितिवाच्यं अतिरिक्ताधेयतावस्यत
दनुगमकत्वात्। परं यस्याऽधिपतत्वमेव धर्मत्वमिसपिकच्छिन्नानिरूपितसंबंधेन निरूपितत्वविशिष्टप्रकृसर्यतावच्छेद
कताघटकसंबंधेन। तत्र धर्मेनेनघटत्वनिरूपिततत्वविशिष्टसमवायसंबंधेन घटीयो धर्म इत्यान्वयबोधेन। एतेन धर्मत्वेने
शक्तौ घटे घटत्वमित्यादिवाक्यस्पनिराकांक्षतापत्तिः घटधर्मत्वावच्छिन्ने घटे प्रमित्वरूपतद्धर्मत्वान्वयबोधेनोद्देश्यतावच्छेदकवि मा
धेयघोरैक्यादितिनिरस्तं निरूक्तसमवायेन घटस्यैवोद्देश्यतावच्छेदकत्वात्। प्राङ्निर्दिष्टत्वादि[illegible]ये न घटत्वावच्छिन्नस्यैवोद्देश्य
तया सामान्यविशेषभावेनाकांक्षासत्त्वाच्च। अभ्यदेतदिति तादृप्येसाम्प्रतीतौ नानाशक्तिपक्षः तत्रदिवादेत्याद्यवाद्धर्मत्वेनैक
शक्तिपक्ष इति भावः एतेनेन तादृनित्वादिप्रकारेणानुभावादितरादृनित्वादिगौरवसहिष्णुतो वितैतिवदंतः प्रतिक्षिप्ता नं त
थानुभवे मानाभावात् विशिष्यशक्तौ चैतिनानाशक्तिपक्ष इत्यर्थः धर्मत्वेनैकशक्तिपक्षे बोध्रकरीत्यासंसर्गमर्यादयैव नीलोत्प
लत्वसामानाधिकरण्यभानमित्याशयः नीलत्वोत्पलत्व सामानाधिकरण्यं नीलत्वोत्पलत्वसामानाधिकरण्यत्वावच्छिन्नं प्रकृते राम०
नीलोत्पलत्वमित्यादौ भावप्रत्ययार्थ इति। एवं च दीधितौ सामानाधिकरण्यवचनत्वादित्यस्य सामानाधिकरण्यवाचकत्वादित्य

र्थो विरोधः। ननु नीलत्वोत्पलत्वसामानाधिकरण्यस्य भावमप्यपार्थत्वे नीलोत्पलपदयोर्निरर्थकत्वेन साकांक्षत्वानुपपत्तिर्नीलोत्प
योरभेदान्वयानुभवापलापश्चेत् न आह नीलोत्पलस्येति नान्त्रकेवित्तन्नाशङ्क्यपक्षे नीलोत्पलत्वमित्यादौ सामानाधिकरण्यसं
बंधेन नीलत्वविशिष्टोत्पलत्वादिकमेव भावमप्यपार्थो लाघवात्। न तु नीलत्वोत्पलत्वयोः सामानाधिकरण्यादिकं गौरवात्। एवं
सामानाधिकरण्यवचनत्वादिति दीधितिग्रंथस्य संसर्गमर्यादया सामानाधिकरण्यवाचकत्वादित्यर्थ इत्याहुस्तदसत्। सामाना
धिकरण्यसंबंधेन नीलत्वविशिष्टस्योत्पलत्वं उत्पलत्वविशिष्टनीलत्वं वा भावमप्यपार्थ इत्यत्र विनिगमकाभावात्। किंच भावम
स्यपस्य तन्नसार्थतावच्छेदकसामानाधिकरण्यत्वावच्छिन्नवाचकत्वे लक्षणावाक्यस्य ध्वस्य व्याप्तिवैशिष्ट्यपक्षधर्मत्वोभय
सामानाधिकरण्यावगाहिज्ञानजन्यत्वस्य लक्षणात्वस्य लक्षणात्वं संभवति उपाध्यायमते विशिष्टबुद्धित्वस्य संबंधसंबंधवि
षयकत्वव्याप्यत्वया परामर्शस्य सूक्ष्मादृष्ट्या व्याप्तिसंबंधवैशिष्ट्यानुयोगित्वपक्षसंबंधप्रतियोगित्वविषयकत्वेन व्याप्तिवैशिष्ट्य
पक्षधर्मत्वोभयसामानाधिकरण्यावगाहित्वसंभवात्। संसर्गमर्यादया सामानाधिकरण्यवाचकत्वे तु लक्षणावाक्यलभ्य
स्य सामानाधिकरण्यसंबंधेन व्याप्तिवैशिष्ट्यवत्पक्षधर्मतावगाहिज्ञानजन्यत्वस्य लक्षणात्वासंभवः संबंधसंबंधग्रहे विषयताम
र्शस्य पक्षधर्मतांशे सामानाधिकरण्यसंबंधेन व्याप्तिवैशिष्ट्यविषयकत्वे मानाभावात्। एवं चानायत्या प्रामाणिकगौरवस्या
दोषतया नीलत्वोत्पलत्वयोः सामानाधिकरण्यमेव भावमप्यपार्थो न तु सामानाधिकरण्यसंबंधेन नीलत्वविशिष्टोत्पलत्वमिति

४०

२२

भ॰टी॰ अथैवं नीलोत्पलमुत्पलत्वेइति वाक्यस्यायोग्यतापत्तिः भावप्रत्ययार्थसामानाधिकरण्यस्यावच्छेदकतासंबंधेनैवेतरत्राद्वयेसांका
क्षत्वस्योत्सर्गिकत्वमभ्युपेत्यैतादृशापत्तिर्वारणीया विनीलत्वविशिष्टोत्पलत्वस्याधाराधिरूपतया तस्या समवेतत्वेन भवन्मते य्ये तद्वा
क्यस्यायोग्यत्वापातात् यद्विद्विशिष्टस्यातिरेकितयाऽङुत्पलत्वरूप+लोत्पलत्वमुत्पलसमवेतमितिवाक्यस्यायोग्यत्वाप
नी त्तिर्दुर्वारैवेति चेन्न। सामानाधिकरण्यसंबंधेन+प स[illegible]त्पलसमवेतत्वेनैतद्वाक्यस्यायोग्यत्वेनाप्यापि
त्तसत्तिः भवन्मते विनीलोत्पलत्वं न जातिरित्यस्यायोग्यत्वापत्तेः नीलोत्पलत्वं च्येतोत्पलसमवेतमित्यस्यायोग्यत्वापत्तेश्च। किं
चोत्पलस्याभावः उत्पलत्वं नीलत्वं च तदुत्पलत्वं च नीलोत्पलत्वमिति भावप्रत्ययोत्तरं कर्मधारयेनीलपदस्य सामानाधिकर
ण्यसंबंधेन नीलत्वविशिष्टपरतामंगीकृत्यस समस्तस्य सामानाधिकरण्यसंबंधेन नीलत्वविशिष्टोत्पलत्वार्थकतयोक्त
वाक्यायोग्यत्वानपापातात् कर्मधारयोत्तरभावप्रत्ययपदशायां तादृशवाक्यस्यायोग्यत्वमिष्टमेव नन्वेवं कस्येवं वाक्यस्य
दृशामेदेनयोग्यत्वमयोग्यत्वंवक्तव्यमिति वाच्यं पयसा सिंचतीति वाक्यस्य साधारणजलचरत्वसमुद्रमध्यस्थितजलप
रत्वाभ्यां योग्यतायोग्यत्वयोर्दृष्टत्वात्। अत एव शब्दमणौ पदार्थपक्षकानुमानप्रस्तावे एकार्थवाक्यस्यापि बाधकसत्वा
सत्वाभ्यां योग्यायोग्यत्वादि स्फुटं। एवं नीलोत्पलत्वमुत्पलत्वइति पूर्वोक्तवाक्यस्यापि कर्मधारयोत्तरभावप्रत्ययपदशाभ्यां राम ०
योग्यत्वं भावप्रत्ययोत्तरं कर्मधारयदशायां चायोग्यत्वं द्रष्टव्यं। इति न नीलोत्पलत्वमित्यत्र भावप्रत्ययस्य नीलत्वोत्पल

त्वसामानाधिकरण्यबोधकत्वे नीलो सत्तत्त्वमुत्सत्वभिन्नमितिवाक्यस्य योग्यत्वापत्तिरित्यपि केषांचित्स्खलितमपास्तम्।उक्तरीत्या
तस्यापि दशाभेदेन योग्यत्वायोग्यत्वयोः संभवात्।एतेनुनीलो सत्त्वे नीलो सत्त्वं नास्तीति प्रयोगापत्तिः।अवच्छेदकतासंबंधस्यावृ
त्तिनियामकत्वेन संसर्गाभावप्रतियोगितानवच्छेदकत्वादिति तन्नीलो सत्त्वे नीलो सत्त्वमित्यादिप्रतीत्या तस्यापि वृत्तिनियामक
त्वात्।वस्तुतस्तु तत्र अननुगतविनिर्मोकस्य निरूपकपर्याप्त्यत्वसंसर्गकबोधोद्देश्येन न तत्समभिव्याहारे तत्संबंधावच्छिन्नप्रति
योगिताकाभावस्यैव बोधात्मकोपि हेतुः।न च विनिर्मोकेऽवच्छेदकतया महत्त्वस्य पर्याप्तिस्तस्य सामानाधिकरण्यस्यावच्छेदकत
याद्वयेनिराकांक्षत्वादिति सूक्ष्मं।विशिष्टशक्तौ चैत्रादिपदानां तरमाह घटत्वपटत्वमित्यादिना।केचिदीशंनेन सामान्यशक्तेऽति
भावप्रत्ययवाच्छिन्नायातानां व्येताशक्येस्तर्थः मुख्यविशेष्यान्वये संभवतीति भागस्यानौचित्यमिति त्वाशयेनाह अवच्छेदके
त्वसंबंधेनेति।युगपद्वृत्तिद्वयविरोध एकशक्तेपि वनिर्वाहः एवं केचिदित्यस्वरसस्य वीजं।इदमपबोध्यं।विशिष्टशक्तौ चैत्रा
दिकमनुशासनविरोधादनादेयं तस्य भावत्वतलावितमनुशासनेन भावप्रत्ययस्य प्रकृतसमर्थतावच्छेदकबोधकत्वानुशासनात्।अथ
कृन्नद्धितसमासेभ्यः त्वतलभ्यां संबंधावगम इति कालापवचनेन कर्मधारयोत्तरभावप्रत्ययस्य संबंधकत्वानुशासनान्न दोषः
सामानाधिकरण्यस्यापि संबंधत्वेन भावप्रत्ययस्य सामानाधिकरण्यबोधकत्वेपि संबंधबोधकत्वानपायादिति चेन्न।उक्तकालाप
वचनं हि भावप्रत्ययविशेषस्य स्वात् श्रीतासंबंधकत्वं न प्रतिपादयति किंतु तस्य भावत्वतलौ इत्यनुशासनसिद्धस्य भावप्रत्ययस्यै

भ॰ टी॰

प्रकृत्यर्थतावच्छेदकबोधकत्वस्यानुवादकं घटत्वमित्याद्यसमासस्थले भावप्रत्ययस्य प्रकृत्यर्थतावच्छेदकघटत्वादिरूप
सामान्यबोधकत्वं कृत्तद्धितसमासस्थले तु ण्यवकत्वं ददित्वं राजपुरुषत्वपितृत्वादौ संबंधप्रतीत्या संबंधस्यैव प्रकृत्यर्थतावच्छेद
कतया तद्बोधकत्वमिति रीत्याऽनुवादकत्वात् तथा च कर्मधारयोत्तरभावप्रत्ययस्य प्रकृत्यर्थतावच्छेदकद्वयसामानाधिकरण्य
बोधकत्वेऽनुशासनविरोधो दुष्परिहर एव तत्समभिव्याहृतिजन्यबोधे प्रकारत्वाभावेन प्रकृत्यर्थतावच्छेदकत्वाभावात् तस्य व्याख्या
नेनसङ्गच्छतोऽस्वरसोऽयमेव कर्मधारयोत्तरभावप्रत्ययस्येत्यादिदीधितिग्रंथस्य एकशक्तिपक्षाभिप्रायकः एवं च अ
नुशासनस्य नानाशक्तिपक्षाभिप्रायकतया न तद्विरोधोऽपि॰ वस्तुतस्तु क्वाप्ययनवचनं नानुवादकं नानाभावात् कृद
न्तकृत्यादेरेव प्रकृत्यर्थतावच्छेदकतया कर्मधारयेन नीलघटत्वमित्यादौ तत्पुरुषे च संबंधस्य प्रकृत्यर्थतावच्छेदकत्वे न तदसंभवा
त्वात्॰ किंतु नानाशक्तिपक्षे स्वातंत्र्येण कृत्तद्धितसमासोत्तरभावप्रत्ययं स्वसंबंधबोधकत्वानुशासनपरमेवेति न किंचिदसमं
जसं॰ अत्रेदं तत्त्वं न हि कर्मधारयोत्तरभावप्रत्ययस्य सर्वत्रैव प्रकृत्यर्थतावच्छेदकद्वयसामानाधिकरण्यबोधकत्वमिति बमाभि
प्रायकः कर्मधारयेत्यादिदीधितिग्रंथः किंतु क्वचित्सत्त्वे शाब्दबोधे लक्षणापातत्याज्याभिप्रायकः एवं च नीलोत्पल
त्वमित्यादौ भावप्रत्ययस्य प्रकृत्यर्थतावच्छेदकमात्रबोधकत्वे विशिष्टविशेषणत्वादिलक्षणावाक्यस्य व्याप्तिवैशिष्ट्यप्रवृत्त राम०
धर्मतोभयसामानाधिकरण्यबोधतात्पर्ये कृतेऽन्यपदेन भावप्रत्ययलक्षणाया न तथा बोधसंभवे नोपदर्शितलक्षणार्थ

करणेऽबाधकाभावात्। व्याकरणस्य शक्तिग्राहकतया पादविज्ञातपर्येण पदस्य लक्षणया वार्थान्तरबोधकत्वेपि न विरोधः। कोऽपेशां
गापदस्य प्रवाहे शक्तिबोधकेपि लक्षणया तीरप्रतिपादनादिवत् समतिसूक्ष्मानुधावनेन इत्यर्थः। इति भावार्थः। शङ्कार्थ
स्फुटबाधितमसत् अबाधितं सत् तत्साधारण्यं न हास्यकं पत्तत्सामानाधिकरण्यं तस्य ज्ञानलाभादिति पदार्थे विरुद्धबाधितं
द्व विरुद्धबाधितं पदद्वयं यतः यात्तत्साधारणाय नञ्ज्ञानं सामानाधिकरण्यज्ञानं तस्य लाभादिति नव्यात्राव्याप्तभावे बाधितसा
धारण्यज्ञानस्याप्यस्य वहेतुतया ऽबाधितोक्तिः किमर्थमिति वाच्यं। बाधिते पुनः साधारण्यमिति पुनस्ता बाधितमात्रे साधारण्या
भिमर्थशंकानिरासाय ऽबाधितोक्तेः सार्थक्यात् तत्साधकतद्धेतुकसकलोपाधिसाधारणां चेदमिन्दुपाधितो नाद्दशा दीधि ६
र्थस्य दृष्टत्वात् इत्याशयादिति। सामानाधिकरण्यानुयोगि प्रतियोगिवाचकपदेन रूपं यत्सामानाधिकरण्य वाचकं पदं त
दुत्तरं पदज्ञानादि यदन्तरमन्तरस्मिन्नन्तरसामानाधिकरण्यावगाहिज्ञानं बोधयतीति प्रयुञ्जते रनुसरणादिति भावः। नञ
नएव सोधितो ज्ञानपरो पात्तानेति विहाय ज्ञानपरोपस्थानेन मुक्तं समाप्तिव्याहारपर्याप्त्योपसंहार पदस्य पुनः सत्ति स्वरूप
कत्वा तथा एवं च बाधिते साद्दशबाधितावाधितसाधारण्याय नञुभयोरेकतरसामानाधिकरण्यापरांशे तदवगाहि भ्रमप्रमा
साधारण्यज्ञानलाभादित्यर्थः। अन्नएवेति उक्तयुक्त्या नौमानाभावे नो कार्यलाभादेवेत्यर्थः। अनैनैव दोषेणाभ्यांतानुमिति
व्याप्तिहोवेण एदं मतं निराकरिष्यति भ्रमस्य लेचेत्यादिना हूषयिष्यतीन च लोहितवह्नि तज्ज्ञानं पानं प्रमितिवाक्य समामा

म॰टी॰ रापानुरोधेनोत्वयुक्तत्वावश्यकीतिवाच्यं। तादृशवाक्यप्रामाण्यस्य च तथा निर्वाहात् पातस्य प्रामाण्ये इष्टापत्तेरित्यभिप्रा
यात्। पद्धा इत्यादि नञर्थादिति यादृशविशेषणविशेष्याभावपरत्वस्य विशिष्टस्यार्थस्य लक्षणावाक्यात् तथा बोधस्तादृशविशि
ष्टविशेषणाभावान्नस्यैवार्थस्य लक्षणात्वमिति न नियमः। किंतु लक्षणाघटकीभूतानां निखिलानामेव पदार्थानां य
थाकथंचिद्विलक्षणावाक्याद् उपस्थितिमात्रमपेक्षितमित्यभिप्रायादित्यर्थः। पक्षधर्मत्वांशे व्याप्तिवैशिष्ट्यस्य सामानाधि
करण्याद्यवगाहिज्ञानजन्यत्वस्य लक्षणात्वात् यावद्विघटकीभूतानां सकलपदार्थानां उक्तलक्षणावाक्याद् उपस्थितत्वादि
ति भावः। अत एव उक्तार्थलाभादेव। अयमाशयः। लक्षणावाक्याद्यादृशविशेष्यविशेषणभावापन्नपदार्थानां लक्ष
णावाक्याद् उपस्थितिस्तादृशविशिष्टार्थशाब्दबोधत्वस्यैव लक्षणात्वोपदर्शिते लक्षणावाक्याद् व्याप्तिवैशिष्ट्यस्य प
धर्मत्वोभयविशेषितसामानाधिकरण्यविषयिताशालिज्ञानजन्यत्वस्यैव लाभात्तस्यैव लक्षणात्वं न तु पक्षधर्मत्वांशे
व्याप्तिवैशिष्ट्यसामानाधिकरण्यावगाहिज्ञानजन्यत्वस्य तस्योक्तलक्षणावाक्याद् लाभात् अस्ते उक्तलक्षणावाक्यप्रतिपाद्य
स्यापि लक्षणात्वोपगमे कर्मधारयोत्तरेषां द्विनापदार्थव्याख्यानोच्छित्त्यादिति व्यक्तं तु कृत इत्याशङ्क्यादिदूषणाभ्यां पर्या
ख्यावाक्याभिप्रायेणाह तथा चोपायाभ्यां पर्याख्यावाक्ये व्याप्तिविशिष्टत्वस्य पक्षधर्मत्वे सामानाधिकरण्यावगाहितिस राम॰
मासात्मयत्नोनोक्तार्थलाभ इति भावः। अत एव मूलीयलक्षणावाक्यादेतादृशार्थलाभादेव निराकरिष्यतीति। एवं चात्रैन

न्विसादिकमर्वान्तरेसस्यावतरणमुपाध्यायव्याख्यावाक्यस्योक्तार्थकत्वमित्याशयेनैतादृशलक्षणवाक्यप्रतिपाद्यमित्य
स्य। व्याख्यावाक्यलक्ष्यलक्षणांशघटीपत्त्सूपवाक्यप्रतिपाद्यं नेत्यर्थः तथा च व्याख्यावाक्यलक्ष्यलक्ष। तास्याव्याख्याभावे
पिमूलवाक्यप्रतिपाद्यस्याव्याप्तिर्दुरुद्धरैवेति भावः एवं व्याख्याने अत्र सामानाधिकरण्यज्ञानपदार्थइत्यस्याभेनन
स्य सामानाधिकरण्यज्ञानपदप्रतिपा[illegible]घमित्यस्य च स्वारस्यमिति नतत्केचिदिति एतन्मते पक्षधर्मताज्ञानिस
त्र प्रमात्वमुपेक्ष्य ज्ञानत्वस्य विवेशः किमर्थं कृतइत्यत्र बीजमप्रदर्शनपरो ज्ञानपदेसादिग्रंथः नदर्थप्ववज्ञानत्वनिवेशो
न भ्रमप्रमासाधारणा तद्विषयकज्ञानलाभाय भ्रमजन्यानुमितावव्याप्तिरिति ज्ञानसामान्यनिवेशोपि सामानाधि
करण्यप्रसिद्ध्याऽव्याप्तिपरो भ्रमस्थलेवेति ग्रंथः अव्याप्येत्यादिग्रंथस्तु इंधनत्वाद्यवच्छिन्नवन्ह्यादिव्याप्यप्रसि
द्ध्याऽव्याप्तिपर इति बोध्यं संदर्भविरोधादिति भ्रांतोऽलोकादौ प्रसिद्धमिति एकधर्मिधर्म्युभयसंबंधस्यैव सामानाधिकरण्य
तयाभ्यालोकादिरूपैकधर्मिणि व्याप्तिवैशिष्ट्यपक्षधर्मत्वोभयसंबंधस्य सत्वादिति भावः। ज्ञानपदोपसंहाननेनेसा
दिनाभ्रमानुमितौ आपाततउद्धृतासामानाधिकरण्यप्रसिद्धिनिबंधनैवाव्याप्तिर्दीधितिकृता भ्रमस्थलेवेत्यादिनोद्धृ
पराल्वेनोद्भाविता सामानाधि। न चात्रेत्यादिनाभ्रमानुमितेरलक्ष्यत्वं मंगीकृत्योद्धृता यांभ्रमानुमितस्यात्तौ अव्याप्येत्या
दिनापर्वतोवह्निमान्नद्धूलीपटलादित्यादौ प्रमानुमितौ सामानाधिकरण्यप्रसिद्धिनिबंधनैवाव्याप्तिरूपरात्वेनोद्भावि

भ०टी० नेति सामानाधिकरण्याप्रसिद्धिपरत्वेपि ज्ञानपदोपसंहारेनेत्यादि दीधितिसंदर्भः एतन्मते च तस्य विरोधः एतन्मतेऽनुकूलरीत्या
ग्रंथासंगतेः एतन्मते ज्ञानपदोपसंहारेनेत्य [redacted]
असामानाधिकरण्याप्रसिद्धेरनुद्दंकनेन तद्रूपस्य प्रमात्वोपेक्षाप्रदर्शनपरतया योजनेन भ्रमस्य लघुत्वे तस्य हेतुरुपसके
सामानाधिकरण्याप्रसिद्धिपरतया योजनेनाव्याप्त्यादेरिंधनवाघयह्विजवह्निव्याप्यप्रसिद्धिपरतया योजने
न ज्ञानपदोपसंहारेनेत्यादिसंदर्भस्य विभिन्नतात्पर्यकतापासंभवस्य कृतास्य सर्वकत्वे विभिन्नतात्पर्यकत्वस्याप्यपत
प्रोपेक्षागौरवमिति भावः एवं च प्रविशेषस्य गुरोर्वा निवेशस्तत्रैव सामान्यस्य लघोर्वापेक्षायां बीजाकांक्षानतुप
न सामान्यस्य लघोस्त्वनिवेशस्तत्र विशेषस्य गुरोस्त्वोपेक्षायां साम्प्रत्ते च प्रमात्वापेक्षायां सामान्यस्य लघोस्त्वज्ञान
त्वस्य निवेशो प्रमात्वोपेक्षा बीजस्यानाकांक्षितत्वेन तत्कथनस्यापुनरुक्तत्वं भ्रमप्रमासाधारणस्य च लघुत्वज्ञानत्वादुपेक्षावी
जस्यापि दर्शयितुमुचितत्वात् एवं ज्ञानपदेन भ्रमप्रमासाधारणज्ञानत्वाभावेऽस्तु प्रज्ञानपदोपसंहारेनेत्यादिसंदर्भ
नैविसंपचमेतन्मते भ्रांतानुमितिसव्याप्तिदित्यभ्रांतानुमितिपदं प्रमानुमितिपरं सविशेषणपरामर्शादपि भ्रांतानुमि
तिरित्यभ्रांतानुमितिपदं प्रमानुमितिपरमित्यतोपि संदर्भविरोधः इदमुपलक्षणं तत्स्वरूपं कर्मधारयस्य लघुत राम०
या भ्रांतानुमितिपदस्य कर्मधारयेणाप्रमानुमितिपरत्वमेवोचितं तनुतत्पुरुषेणाप्रमानुमितिपरत्वमित्यपि द्रष्टव्यं ना

मत एवेति । न च धूमेव क्रियाप्तिवैशिष्ट्य पर्वतवृत्तित्वोभयसंबंधभाने पि तत्रैकधर्मिवृत्तित्वस्याभानात्कथं सामानाधिकरण्यभा
नमिति वाच्यं । एकधर्मिवृत्तित्वस्योभयसंबंधे ऽलक्षणतया ऽविशेषणत्वेन तद्भाने पि सामानाधिकरण्यभानसिद्धेः संबंध
भानवदिति । संबंधसंबंधभानवदित्यर्थः । क्वचित्तथैव पाठः सामानाधिकरण्यभानमपीति संबंध [redacted]
संबंधभानस्यावश्यकतया एकधर्मिवृत्तित्वस्याप्युभयसंबंधसंबंधतया भानेन सामानाधिकरण्यभानसिद्धेः सामानाधिक
रण्यभानसिद्धेः पृथक् सामानाधिकरण्यभानसाधनासंगत्वेः केचित्तु तस्वरसबीजं तदुभयसंबंधे स्वैकधर्मिवृत्तित्वस्या
पलक्षणतयोभयसंबंधभानेनैव सामानाधिकरण्यभानसिद्धेः पृथक् सामानाधिकरण्यभानसाधनसाधनवैयर्थ्यमि
ति वस्तुतस्तु संबंधभानवदिति पाठे संबंधपदं यथाश्रुतमेव संबंधभानसामानाधिकरण्यभानयोः समानत्वमप्रयोजकत्वाभावप
वास्वरस्वरस इति ध्येयम् ।। विषयतावैलक्षण्यापादेवेति । अन्यथा विशिष्टज्ञानस्य संबंधसंबंधविषयकत्वे पि संबंधसंबंधवि
षयकसमूहालंबनाद्वैलक्षण्यानुपपत्तेरिति भावः । अत्र केचित् संबंधसंबंधाग्रहेपीत्यादिग्रंथः संबंधसंबंधग्रहप्रयुक्तसा
मानाधिकरण्यभाननिरासपरा ऽव्याप्युपपादकतयोक्तिसानावनारणीयः संबंधसंबंधग्रहप्रयुक्तसामानाधिकरण्
भानेपि गौरवेणोक्तसामानाधिकरण्यविषयकत्वस्य हेतुतानवच्छेदकतयोभयसामानाधिकरण्यज्ञानेन जन्मत्वलक्षणोः व्याप्ते
र्दुरुद्धरत्वात् । घटादिविषयकसमूहालंबनात्मकपरामर्शजन्यघटवत्त्वादिज्ञाने परामर्शानुव्यवसाये चातिव्याप्तिवारणायता

दृशज्ञानत्वेन हेतुत्वस्यावश्यं वक्तव्यत्वात्। किंतु प्रकारांतरेण। तथाहि। अनुमानसामानाधिकरण्यविषयकत्वस्य गौरवेणाहेतुतान
वच्छेदकत्वे व्याप्तिप्रकारतानिरूपितविशेष्यताभिन्नहेतुप्रकारतानिरूपितपक्षविशेष्यताशालिनिश्चयत्वमेव हेतुतावच्छे
दकं वाच्यं। एवं चात्राप्युभयसामानाधिकरण्यविषयताया अनुप्रवेशोऽस्त्येव। भासमानयोर्वैशिष्ट्यप्रतियोगित्वानुयोगि
त्वयोरेव प्रकारताविशेष्यतारूपतया हेतुरूपैकधर्मिनिष्ठप्रतियोगित्वानुयोगित्वात्मकोभयसंबंधविषयताया अनुप्र
वेशात् विशिष्टज्ञाने समूहालंबनव्यावृत्तसप्रकारकत्वरूपविशिष्टज्ञानत्वानुपपत्त्या भासमानयद्वैशिष्ट्यं न तत्प्रतियोगि
त्वानुयोगित्वयोः प्रकारताविशेष्यतारूपत्वासंभवादत आह संबंधसंबंधाग्रहेपीति। विशिष्टज्ञानत्वस्य समूहालंबनव्या
वृत्तसप्रकारकत्वरूपविशिष्टज्ञानत्वस्याऽपपादितत्वात् प्रकारताविशेष्यतयोः स्वरूपसंबंधरूपतयाऽपपादितत्वात्सं
बंधसंबंधविषयसमूहालंबनव्यावृत्तसप्रकारकत्वानुपपत्त्या तयोरुक्तरूपत्वासंभवेनास्मदुक्तहेतुतावच्छेदके स्वरूपसं
बंधरूपयोस्तयोरनुप्रवेशेनोक्तरीत्योभयसामानाधिकरण्यविषयताया अनुप्रवेशाभावान्नोक्तदोष इत्याखंडलार्थ
इत्याहुः। वस्तुतस्तु संबंधसंबंधेत्यादिग्रंथस्योक्तरीत्यावतारणोपि न दोषः। उक्तातिव्याप्तिवारणाय तादृशज्ञानत्वनिय
तानेकवृत्तिधर्मावच्छिन्नहेतुस्यैव वक्तव्यतया संबंधसंबंधग्रहप्रयुक्तसामानाधिकरण्यभानेऽप्यसंभवादिति ध्येयं।
जितमित्ति। ज्ञानातिरिक्तविषयानभ्युपगंतृसाकारवादिना विषयावैलक्षण्येपि आकारवैलक्षण्येनैव ज्ञानवैलक्षण्योपगमस्य स्व

पयादत्वादिति। इति प्राचीनमतानुरोधादित्यर्थः। एतेनानुभवसिद्धज्ञानातिरिक्तविषयस्यापह्नोतुमशक्यत्वेनैव साकारवादि
निरासे संभवे गविषयावैलक्षण्येपि ज्ञानवैलक्षण्योपगमेन कोपि हेव इति शंका निराकृता। अनुयोगित्वमित्यादि परस्परनिरू
प्यनिरूपकभावापन्नमनुयोगित्वं प्रतियोगित्वं चेत्यर्थः। तेन केवलानुयोगित्वप्रतियोगित्वयोः समूहालंबनविषयत्वसं
भवेपि न दोषः। वस्तुतस्तु केवलानुयोगित्वप्रतियोगित्वयोरपि न समूहालंबनविषयत्वं अन्यथा प्राचीनमते भासमाने ये वैशि
ष्ट्यप्रतियोगित्वानुयोगित्वे तयोरेव प्रकारताविशेष्यतारूपतया दंडपुरुषसंयोगप्रतियोगित्वानुयोगित्वानीलादिस
मूहालंबनस्य दंडप्रकारकपुरुषविशेष्यकविशिष्टबुद्धित्वापत्तेः। अत एव समूहालंबनाविषय इति सायासमत एवो
क्तमिति पथ्याकृतमेव सम्यक्पुक्तीति। न चासद्वैशिष्ट्यभानमते शुक्तिविशेष्यत्वावच्छिन्नरजतत्वप्रकारत्वस्य यत्किंचित्स्व
मात्वघटकप्रकारतानियामकसंबंधनिरूपितत्वाप्रसिद्ध्या कथमेतादृशैनियमवत्त्वेनार्थनस्तन्निरास इति वाच्यं परस्परसादे ६
रजतत्वप्रकारतासामानास्य वेलुक्तेः यद्वातन्मते शुक्तिरजतयोरिमे रजते इति ज्ञाने शुक्तिविशेष्यत्वावच्छिन्नरजतत्वप्रका
रत्वस्य ~~[illegible]~~ यत्किंचित्स्वमात्वघटकप्रकारतानियामकसंबंधनिरूपितस्य रजतवि
शेष्यत्वावच्छिन्नरजतत्वप्रकारत्वस्य वैकल्याभिप्रायेणोक्तं। तत्रोभयविशेष्यतावच्छिन्नैकप्रकारत्वाभ्युपगमे तस्य ज्ञानांतरे
रूपतयातिरिक्तविषयताकल्पनप्रसंगेन प्रकारताभेदाभ्युपगमस्यावश्यकत्वमभिप्रायेणालाघवाभिप्रायेणावरजतत्वप्र

म॰ टी॰ कारतासामान्यस्यैवेत्युक्तिः तन्मतेपि समरजतीयरजतत्वप्रकारत्वस्य सद्धेतुवैशिष्ट्यनिरूपितत्वान्नोक्तदोषः अर्थांतरस्तु तन्मेव वि
हृदो निश्च सद्दितिः अत एव यः दीधितिकृता असतः ख्यातिनिरासादिति वक्ष्यति ननु यथोक्तवस्तुतोसत्ख्यातावपि प्रकृ
तेन निस्तारः अलीकस्य संसर्गतयैव ज्ञानादिविषयत्वेन तन्मतेपि असत्वाव्याप्तिवैशिष्ट्यस्य समानाधिकरण्यपक्षधर्म
ता यास्तत्र असत्येनाप्रतिपादनात् अपारमार्थिकधर्मप्रतियोगिकहेत्वनुयोगिकवैशिष्ट्यावगाहि अमात्मकप
रामर्शजन्यत्वस्य लक्षणावाक्यतोऽलाभात् लक्षणास्यासद्धेतुत्वेनाभ्यंतस्मततदितरभेदानुमानासंभवाच्चेति वदंति
तन्निंसाः अलीकस्य संसर्गतयैव विषयत्वे तन्मते सिद्धासद्विषयकत्वरूपभ्रमत्वस्य दुर्ज्ञेयतापत्तेः तथासतो विशेषणा
तयेदमानात् लक्षणास्यैसाद्यपिनसत् दीधितिकृतैवाथांतरे स्यादिनास्याभिहितप्रायत्वात् अपाधादिति सामानाधि
करण्यस्य व्याप्तिविशिष्टत्वपक्षस्य हेत्वितोभयनिरूपितत्वाभावे विज्ञानस्य पक्षहेतित्वांशे व्याप्तिविशिष्टत्वसामानाधि
करण्यावगाहित्वसत्वेनतद्द्वयसंभवादितिभावः एतादृशलक्षणं एतादृशलक्षणत्वेनाभिमतं नैतादृशेनिश्चयोप
ता निर्णायेन प्रतिदंधात् लक्षणावाक्यजन्यप्रतिपत्तेरसंभवेन एतादृशलक्षणस्य लक्षणावाक्यजन्यप्रतिपत्तिविष
यत्वरूपलक्षणावाक्यप्रतिपाद्यत्वासंभवेन लक्षणत्वासंभवात् लक्षणासर्वरूपा व्याप्तिदुर्ज्ञेयेतिभावः दुर्ज्ञेयलक्षणाघ राम॰
टकपदार्थानां यथाकथंचिदुपस्थितिमाश्रमयेक्षितमित्याशयेन अन्यथाज्ञानविशेषणातयापक्षहेतित्वादीनां स

णावाक्यादनुपस्थितेस्तेव तादृशज्ञानजन्यत्वस्य लक्षणत्वासंभवे नायोग्यत्वानिर्णयानुसरणवैयर्थ्यात्तान्न च तथापि व्याप्तिविशि
ष्टत्वसामानाधिकरण्यं न ह्रदे वह्नित्वीयमित्ययोग्यतानिर्णये व्याप्तिविशिष्टत्वसामानाधिकरण्यविशेषणतानापन्नह्रदवृत्ति
त्वस्य ज्ञानान्वयासंभवेपि स्वातंत्र्येण तस्य ज्ञानान्वयेन दोष इति वाच्यं एकविशेषणतयोपस्थितस्यान्यत्र स्वातंत्र्येण विशेष
णा। तथान्वयस्याव्युत्पन्नत्वेन तस्य स्वातंत्र्येण ज्ञानान्वयासंभवात् इदं तु पद्याभ्रतानुरोधाद्व्याख्यानं न तु वस्तुतस्त्विसा
दिना पूर्वमेवोक्तं कश्चित्तु इति अस्वरसबीजं तु व्याप्तिव्याप्यासंभवानामेव लक्षणे दोषतयावांतरे त्वस्याशाब्दबोधानुपपत्ति
परत्वे लक्षणदोषपरत्वासंभवः महावाक्यार्थज्ञानानुदयाद्वेतत्त्वं उत्का महावाक्यार्थज्ञानानुत्पत्तिप्रयुक्तापूर्वविरहसेनावक्ता
र्यपूर्वोक्तदोषपरत्वस्यैव स्वरससिद्धतया दोषांतरपरत्वे सामंजस्यं चेति ध्येयं। विषयतासामानाधिकरण्येन शशसंबं
धाभावनिश्चयेपि विषयतासामानाधिकरण्येन शशसंबंधावगाहिशाब्दबोधबाधकाभावादाह विषयतानावच्छेदेनेति दीधितौ श
शसंबंधाभावनिश्चयदशायामिति। षष्ठीतत्पुरुषस्थले पूर्वपदस्य स्वार्थसंबंधिनि लक्षणया शशविषाणजन्यमित्यादिवाक्या
त् शशसंबंधिविषाणजन्यमित्याद्याकारकस्यैव शाब्दबोधो भविष्यतीति तत्र च विशेषणांशे शशस्य प्रकारतयान्तरभावनिश्चय
स्याप्रतिबंधकत्वेन तदभावमुपेक्ष्य तत्संबंधाभावपर्यंतानुधावनं ननु तादृशशाब्दबोधे संबंधिनस्तादात्म्येन विषाणीशेप्रका
नयातत्र संबंधिभेदरूपतादात्म्यावच्छिन्नप्रतियोगिताकतदभावनिश्चयस्यैव विरोधितया संबंधाभावनिश्चयस्यातथात्वेन

मं.टी.

संबंधाभावनिष्ठप्रकारतायामित्यसंगतमित्यत आह आख्यातांशशविषयतोल्लेखेति विषयार्थलक्षणायाच स्वार्थसंबंधवतिल
क्षणाया इति शाब्दबोधे इत्याकारकशाब्दबोधे इत्यर्थं च दीधितौ इति शाब्दबुद्धेरित्यस्येति शाब्दजन्यबुद्धेरित्यर्थः अन्यथा शश
विषाणे तत्र देशे शाब्दबुद्ध्याकारत्वाभावेनासंगतेः व्याख्यायां विरोधीति व्याख्याभावानवगाहित्वेपि अनुभवानुरोधेन त्वा
तंत्रेतात् विरोधीतिभावः केचित्तु शशशसंबंधाभाववत्त्वस्यैव शशसंबंधेनाभाव इति मुख्यस्य शशसंबंधोऽभावो यस्येति व्युत्प
त्या वा शशसंबंधिभेदार्थः प्रथमे तृतीयार्थोऽवच्छिन्नप्रतियोगिताकत्वं द्वितीये षष्ठ्यर्थः प्रतियोगित्वमित्याहुः शशस्य
संबंधो यत्रेति सप्तमीसमासान्तत्वाभ्युपगम इत्यपि कश्चित्। यत्तु शशविषाणेत्यत्र लुप्तषष्ठीस्मरणादन्वयबोध इति मा
चीनमताभिप्रायेणेदमिति पदविशेषणस्य विषाणजन्यमिति वाक्यजन्यसंबंधप्रकारकबोधाभिप्रायेणेदमिति तदुभयप
मप्यसत्। उक्तरीत्या इति शाब्दबुद्धेरिति दीधितिग्रंथात्वारस्यात्। बोधाकारलिखनं तु शशसंबंधवद्विषाणेत्याद्येव लिखने
सयोग्यत्वात्। केचित्तु उपाध्यायमते धर्मिभेदस्य धर्मिसंतानाभावान्तरिक्ततया संबंधिभेदस्यापि संबंधासत्ताभावरूप
पत्वेन तन्मताभिप्रायेणैव संबंधाभावनिष्ठप्रकारतायामित्युक्तमित्याहुः अन्ये तु संबंधिनः प्रकारतायां तद्विशेषणतायै
भस्य संबंधस्यापि विशिष्टाणां शेप्रकारत्वं एकत्रविशेषणतेनोपस्थितस्यापरत्वं तेन परत्र विशेषणतया न्वये बाधकाभा राम
वादित्यभिप्रायेणेदमित्याहुः अपरे तु समासस्थासयोः समानप्रकारकानुभवजनकत्वानुरोधेन षष्ठीतत्पुरुषस्थले

वैयदस्य समसंबंधलक्षणासंसर्गासंभवसतिवै। विशेषणतानामार्थयोरपिभेदान्वयबोधाभ्युपगमादित्याशयेनेदमित्याहुः। अ
न्यमहावाक्यार्थबोधेऽवांतरवाक्यार्थयोग्यतानिश्चयस्य सतं येणप्रतिबंधकतानकल्प्यते। अवांतरवाक्यार्थबोधे
स्थलीयतादृशायोग्यतानिश्चयप्रतिबंधतावच्छेदकीभूतविषयतावाघवच्छिन्नविशेष्यतानिरूपितशशसंबध्याहि
प्रकारतायामहावाक्यार्थबोधसाधारणपेनमुख्यविशेष्यतायाश्चप्रयोजनविरहेणानिवेशात्स्थलीयप्रतिब
धकभावकल्पनेनैवोपपत्तेः। नवायोग्यतानिरापिस्यशाब्दजनकयोग्यताज्ञानंप्रत्येवप्रतिबंधकतापाशाब्दबोधप्रति
बंधकत्वासंभवइतिवाच्यं। योग्यताज्ञानस्यशाब्द[illegible]बोधेनहेतुत्वेऽपितु योग्यतानिर्णयस्यप्रतिबंधकत्वे
मेवेत्याशयात्। अयोग्यतानिश्चयस्यशाब्दबोधजनकयोग्यताज्ञानप्रतिबंधद्वाराशाब्दबोधंप्रतिफलानुमजिनेय
त्वलक्षणाप्रतिबंधकत्वमित्याशयाद्वा। अत्रेयमस्तिभाति। दीधितौ इति शाब्दबुद्धेरित्यस्य इत्याकारकशाब्दबुद्धेरित्यर्थः
समासेव्युत्पत्तिवैचित्र्येणनामार्थयोर्भेदान्वयेनविषयाणोशशस्यप्रकारतयाशाब्दबोधेतादृशाकारत्वेसंभवात्।
नचैवंशशसंबंधाभावनिश्चयदशायामसंगतं। शशप्रकारकबोधेशशाभावनिश्चयस्याप्यनुभवानुरोधेनप्रति
बंधकत्वात्। नचतथापिशशाभावमुपेक्ष्यशशसंबंधाभावपर्यंतानुधावनेकिंबीजमितिवाच्यं। शशस्यविषाणेऽध्याधे
यतासंबंधेनप्रकारतयातस्यदृष्टत्वनियामकतयाप्रतियोगितावच्छेदकत्वेननसंबंधावच्छिन्नप्रतियोगिताकशशा

म·टी·

भावप्रसिद्धेः अथवाऽवांतरेत्यादिना यद्बाधनिर्णयविधया प्रतिबंधकत्वमयोपितं तन्निर्णयस्योक्तं तन्न शाब्दबोधे योग्यता
ज्ञानस्य हेतुत्वात् तत्प्रमाणाभावात् । किंतु योग्यताज्ञाने तत्प्रतिबंधादेव शाब्दबोधानुदयात् । एवं च एकपदार्थज्ञाने ऽपरप
दार्थसंसर्गवत्त्वस्य योग्यतात्वे न विबाधो शशसंबंधवत्त्वरूपयोग्यताज्ञाने वा बाधनिर्णयविधया शशसंबंधाभावनि
श्चयस्यैव विरोधित्वं न तु शशाभावनिश्चयस्येति तत्पुष्येस्य शशासंबंधाभावनिश्चयपदप्राप्तिस्तु क्रमिति ध्येयं
इत्यतः । इति यतिज्ञानत्वात् । प्रमाकरणत्वलक्षणो यद्योगिनीति । परिभ्रांतिः प्रमाकरणलक्षणो यद्योगिनी स्या
न्न हि प्रमायाश्चरणस्यास्यान्नत्वे च मितसाशमः इत्यर्थः इति भावार्थः प्रमाकरणलक्षणानुपयोगिनीति पाठे इत्य
र्थ इति यथाश्रुतमेव साधु ॥ अत्र प्रमानुमितेरलक्ष्यत्वोपगमे गंधप्रागभावावच्छिन्नो घटो गंधव्याप्यपृथि
वीत्ववानित्यादिपरामर्शजन्यायां गंधप्रागभावावच्छिन्नो घटो गंधवानित्याद्याकारिकायां गंधप्रागभावाद्यवच्छेदेन घ
टादौ गंधाद्यवगाहिन्यामनुमितावतिव्याप्तिः पक्षतावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदके ऽवच्छेदकतासंबंधे
न पक्षस्यैव वा ऽवच्छेदकताघटितसाध्यतावच्छेदकसंबंधेन साध्यस्य भानात् तादृशानुमितौ पक्षतावच्छेदकगंधप्रागभा
वादौ पक्षस्यैव वा साध्यस्य गंधादेरवच्छेदकतया तद्घटितसाध्यतावच्छेदकसंबंधेन वा भानात् तत्र तेन संबंधेन तस्य बाधित राम०
त्वेन तत्प्रमात्वेनालक्ष्यत्वात् उपदर्शितपरामर्शस्य [illegible]त्व पृथिवीत्वादिनिष्ठगंधादिव्याप्तिविशिष्टघटादिपक्षधर्मत्वो

भयसामानाधिकरण्यावगाहितयोपदर्शितलक्षणस्य तत्र सत्वाच्चोक्ताशंकायां तदुद्धारपरो यदि चेत्यादिग्रंथस्तत्र सल्लिं
गपरामर्शाद्व्याप्तानुमित्युत्पादस्य सर्वसंमतत्वाभावेन विवादास्पदत्वसूचनाय यदि चेत्युक्तं। दीधितौ। तमेव विवादं विवृणो
ति व्याख्यातावाडुपाध्यायमत इति। पक्षतावच्छेदकसामानाधिकरण्येनैव पक्षतावच्छेदकाधिकरणे पक्षे शुद्धसाध्यताव
च्छेदकसंबंधेनैव। एवकारव्यवच्छेद्यमाह ननु पक्षतावच्छेदकावच्छेदेनापीति साध्यमनुमितिविषयइत्यनुषज्यते। ननु प
क्षतावच्छेदके ऽवच्छेदकतासंबंधेन पक्षे वा तद्घटितसाध्यतावच्छेदकसंबंधेन साध्यमनुमितिविषयइत्यर्थः। अवच्छे
दकत्वस्यावच्छेदकतासंबंधस्य तद्घटितसंबंधस्य वा व्यापकताघटकत्वेन व्यापकतासंबंधत्वाभावेन भानासंभवादिति पक्ष
तावच्छेदके पक्षे वा इत्यादिः। व्यापकताघटकसंबंधेनैव व्यापकस्यानुमितौ भानादिति भावः। यदि चेतीति। अथोपाध्यायैरवच्छे
दकावच्छेदेनानुमितेरनभ्युपगमेपि महानसीयवह्न्याद्येवं महानसीयवह्निमान्नीलीसादित्याद्यवेतरबाधप्रतिसंधानसहकृ
तादृग्व्याप्यधूमवान्पर्वत इत्यादिसल्लिंगपरामर्शी सर्वतोमहानसीयवह्निमानिसाध्याकारकपर्वतादिपक्षकमहानसीय
वह्न्यादिविधेयकव्याप्तानुमित्युत्पादस्य सर्वसंमततया यदि चेत्यस्यासंगतिरिति चेन्न। उपाध्यायानामवच्छेदकावच्छेदेनानुमि
त्यनुपगमे व्यापकतावच्छेदकेन व्यापकस्यानुमितौ भानं ननु व्यापकतानवच्छेदकेनेति नियमात्तु गंधत्वाद्यवच्छिन्ननिरूपित
व्याप्तिविशिष्टे हेतुमत्परामर्शजन्यानुमितौ व्यापकतानवच्छेदकावच्छेदकतासंबंधेन तद्घटितसंबंधेन वा गंधस्य भानं न

३०

म. टी. संभवतीत्येव वीजं एवं चावच्छेदकत्वस्य संबंधप्रकारस्साधारणेन वीजसाम्याद् उक्तत्वादित्याह नन्वमानुमितौ महानसीयवह्नित्वादि
नावच्छिन्नादेर्भानं न संभवतीति शुद्धवह्नित्वादिनैव तत्र महानसीयवह्न्यादिभानस्य तेषामनुमतत्वात् अत एव मयुक्तानुमितेर्महान
सीयवह्न्यभाववति महानसीयवह्निप्रकारकतया भ्रमत्वं दुरुद्धरमेवेति यदि वेत्यस्यासंगतिपरिहार इति वाच्यं। गुणाको
र्मान्यत्वविशिष्टसत्तावान् गुणाद् इति मतीते भ्रमत्वोपपत्तये भ्रमत्वस्य प्रकारतावच्छेदकघटितत्वस्यावश्यकत्वेनात्र भ्र
मानुमितिपदस्य प्रकारतावच्छेदकघटिततद्धर्मावच्छिन्नाभाववद्विशेष्यतानिरूपिततद्धर्मावच्छिन्नप्रकारताशालित्वरूप
भ्रमत्वाश्रयपरत्वात्। तादृशलाघवादिज्ञानाधीनशुद्धवह्नित्वादिप्रकारकमहानसीयवह्न्याद्यनुमितिश्च नैतादृशभ्रम
त्वाश्रयः तस्याः प्रकारतावच्छेदकीभूतवह्नित्वाद्यवच्छिन्नाभाववद्विशेष्यकत्वात्। तथा चैतादृशभ्रमत्वाश्रयानुमितेः
उपाध्यायमते सल्लिंगपरामर्शादनुदयेन विवादास्पदत्वात् तत्र यदि वेत्यादिकथनं नासंगतं। अथ तथापि वह्निव्याप्यधूमवा
न्पर्वत इत्यादिसल्लिंगपरामर्शाद् वह्निव्याप्यधूमवान् ह्रद इत्यादिपरामर्शसहकृतात्पर्वतो वह्निमान् ह्रदो वह्निमानित्याद्याका
रकसमूहालंबनात्मकभ्रांतानुमित्युत्पादस्य सर्वसंमततया यदि वेत्यसंगतमेव। न च सल्लिंगपरामर्शादित्यस्य सल्लिंगपराम
र्शमात्रादित्यर्थान्न दोष इति वाच्यं। दुरूहत्वापत्तेरिति चेन्न। उपदर्शितभ्रमत्वशरीरे तद्धर्मावच्छिन्नवद्विशेष्यतानिरूपिततद्ध राम०
५२ र्मावच्छिन्नप्रकारताश्रयत्वस्यापि निवेशेनोपदर्शितानुमितौ उपदर्शितभ्रमत्वाक्रांतत्वाभावात्। लक्ष्यत्वे अतिव्याप्त्यसंभवेन तत्रातिव्या
प्तेरित्याममकं प्रमात्वमपि उक्तभ्रमत्वशून्यज्ञानत्वमेवात उपदर्शितानुमितेरप्येतन्मते लक्ष्यं।

क्षिवारणाय चरमज्ञानपदं सप्रमापरतापाश्च्यपि नावश्यकत्वेतिन तद्देसादिर्यथासंगतिः अथ जलपर्वतो वह्निमान् पर्वतो जलवह्नि
मानित्याद्यनुमितौ स्वरूपतो भासमानविषयांशे भ्रमरूपायामुक्तप्रमा-रूपलक्षणतावच्छेदकाक्रान्तत्वेन लक्ष्यायां विशिष्टपक्षा
द्यप्रसिद्ध्याऽव्याप्तिर्दुर्वारैवेति चेन्न। तद्भाववति स्वरूपतस्तत्प्रकारकभ्रमभेदमपि प्रमात्वशरीरे निवेश्य तस्या लक्ष्यत्ववारणास
म्भवात्। अन्ये लक्षणानिवेशनीयं प्रमात्वमपि उक्तभ्रमत्वशून्यज्ञानत्वमेव तेनोक्तसमूहालंबनानुमितेर्लक्ष्यत्वेपि तत्र प्रमा
त्वाभावप्रयुक्ता नाव्याप्तिः। एतेन लक्षणप्रविष्टप्रमात्वमात्रस्य यावद्भ्रमभिन्नत्वरूपत्वे उक्तसमूहालंबनानुमितावव्याप्तिः
लक्षणानियामकप्रमात्वमात्रस्य यावद्भ्रमभिन्नत्वरूपत्वेऽक्तानुमितावतिव्याप्तिः उभयपक्षतद्द्वयत्वेन तद्देसादिर्यथा संग
तिः सल्लिंगपरामर्शाद्यनुमितिसंभावेपि उक्तानुमितावतिव्याप्तिवारणाय चरमज्ञानपदस्य प्रमापरत्वावश्यकत्वात् उभ
यस्योक्तभ्रमत्वशून्यज्ञानत्वरूपत्वे च यावद्भ्रमभिन्नत्वं प्रमात्वमित्यस्मिन्मते ग्रंथासंगतिः। यावन्तो भ्रमास्तत्तद्भिन्नत्वमिति विव
न्तसा तेन भ्रमसामान्यभिन्नत्वस्य लाभादिति निरस्तं यावद्भ्रमभिन्नत्वमित्यनेन यावन्ति सर्वविशेषसर्वधर्मिणीति यावत्तः यो भ्र
मस्तद्भिन्नत्वमित्यर्थस्यापि क्रोडीकारेण यावद्भ्रमभिन्नत्वस्य विवक्षित [illegible] विवेकेनोक्तभ्रमत्वशून्यत्वात्मकत्वलाभे न तदुभयप्र
मात्वस्याप्युक्तभ्रमत्वशून्यज्ञानत्वात्मकयावद्भ्रमभिन्नत्वरूपत्वेन सर्वसामंजस्यात्। अत एव भ्रमसामान्यभिन्नत्वं विहाय यावद्भ्र
मभिन्नत्वोक्तिः स्वारस्यात् केचित्तु यावन्तो भ्रमास्तत्तद्भिन्नत्वरूपं स्वाधिकरणावृत्तिवृत्तिस्वनिरूपितप्रकारताकविशेष्यताश्र

मत्वरूपं वाप्यासक्तमेव व्याबद्धत्वमभिन्नत्वमित्यादि विवक्षितमित्याकूतत्त्रिंसं ऽ करीत्याप्रदिचेत्साति ग्रंथविरोधात। केचित्तु अप्रड
त्वप्रकारता भूम्यत्वे सतित द्धर्मावच्छिन्नाभाववद्वृत्तित्वशेष्यता निरूपितत द्धर्मावच्छिन्नविधेयताशा। लित्वरूपविधेयताव
च्छेदकघटितभ्रमत्वाश्रयानुमितिपरंश्रांतानुमितिपदं तादृशभ्रमत्वश्च स्वज्ञानत्वरूपप्रमात्वमेव च लक्ष्यतानियामकं
लक्षणप्रविष्टं च एवं च लाघवज्ञानादितो व्यापकतावच्छेदकधर्मो व्यनुमितौ व्यापकांशे प्रकारीभूय भासते अन्यथा
स्मितिकर्तुरेकत्वे लाघवमित्यादिलाघवज्ञानादिकालीनस्मितिकर्त्र्यनुमितित्वानंतरं स्मितिकर्त्तृ एको ऽनेको वेति
संशयप्रसंगादित्यादि युक्तौ च लाघवज्ञानादिजन्यानुमितौ महानसीयवह्नित्वादिना महानसीयवह्न्यादिभानोपग
मेपि गुरुवह्नित्वादेरेव तत्र विधेयतारूपविलक्षणविषयतायामवच्छेदकतया तादृशानुमितेर्घृतद्वच्छिन्नाभाववव
द्विशेष्यतपासह्लिंगपरामर्शाजादृशभ्रमत्वाश्रयानुमितित्वसाद्दृश्य विवादास्पदत्वेन यदि चेत्स्वयं वा संगतिरिति। तच्च ताद
शभ्रमत्वस्य स्वतात्पर्यलक्ष्यताप्रयोजकत्वे लिंगोपहितलैंगिकभानमते पि वह्निव्याप्यधूलीपटलवान् पर्वत इत्यादिपरा
मर्शजन्यानुमितेस्तथाविधभ्रमत्वानाश्रयतया अव्यलक्ष्यताप्रसक्तिविरहान्नेलिंगोपहितलैंगिकभाननिराससे नैसा
स्वग्रंथेन लिंगोपहितलैंगिकभानमतं प्रसाख्याव्याख्यातिसंगमनार्थता दृशानुमितेर्लक्ष्यतासंपादनस्यासंगतिरिति
वाच्यं। अत्र भ्रांतानुमितिपदस्य विधेयतावच्छेदकघटितोक्तभ्रमत्वाश्रयपरतया व्याख्याने पि अव्याप्यापक्षधर्मयो

रित्यादिपङ्क्तिकाव्याख्यानानंतरं ननु विशेषेयतावच्छेदकघटितोऽप्रमत्वमुपस्थितं न लक्ष्यताप्रयोजकं अपि तु प्रकारताव
च्छेदकघटितप्रमत्वमुपस्थितमेव एवं च गंधप्रागभावावच्छिन्नो घटो गंधवान् पृथिवीत्वादित्यादाववच्छेदकावच्छेदेनानुमितेरनभ्यु
पगमेऽपि लाघवज्ञानादिजन्यानुमितावतिव्याप्तिवारणाय परमज्ञानपदस्य प्रमापरताऽस्वरसमुपगंतव्यात्तथा च लिंगोप
हितलैंगिकभानमते वह्निव्याप्यधूलीपटलवान् पर्वत इत्यादिविपरामर्शजन्याया अनुमितेर्वह्निव्याप्यत्वादिना धूलीपटलाव
गाहितयाप्रकारतावच्छे[illegible]दकघटितप्रमत्वमुपस्थितत्वरूपलक्ष्यताप्रयोजकरूपविरहेतानाव्याप्तिरित्यत आह लिंगोपहितेति
एवंसीमालिंगोपहितलैंगिकभाननिरासेनेत्यादिग्रंथस्यावतारणीयत्वेनोक्तासंगतेरभावात् शेषं दर्शनदिशाऽवसेयमित्याहुः न
व्यिंत्यं। एकविधप्रमात्वमादायोक्तरीत्योपपत्तौ द्विविधप्रमात्वमादायव्याख्यानानौचित्यात्। नव्यास्तु ज्ञानयत्किंचिद्भेदेन विषयता
भेदानभ्युपगमेन प्रमामात्रवृत्तिविषयत्वमेव प्रमात्वमिह विवक्षितं पर्वतो वह्निमानिति ज्ञानवृत्तिविषयतायाः ह्रदः पर्वतपक्षकवह्न्य
नुमितौ सत्वादप्रमत्वाल्लक्ष्यत्वं ह्रदो वह्निमानित्यनुमितिविषयतायाश्च प्रमामात्रावृत्तित्वेन यानतस्या लक्ष्यत्वं। प्रत्यक्षपरामर्शजन्यता
वच्छेदकविषयतायाः प्रमामात्रवृत्तित्वं विवक्षितं तेन लिंगोपहितलैंगिकभानमते वह्निव्याप्यधूमवान् पर्वतो वह्निमानित्येतादृशानु
मितिविषयताघटकपर्वतो वह्निमानित्येतादृशविषयतायाः प्रमामात्रवृत्तित्वेऽपि नातिव्याप्तिः तन्मते परामर्शजन्यतावच्छेदककोटिलिं
गघटितविषयतायाः प्रमामात्रावृत्तित्वात् लाघवज्ञानजन्यानुमितेस्तु लक्ष्यतासंभवेन यदित्यादिग्रंथस्य नासंगतिरिति वदं

म.टी.

तानद्वह्निसंबन्धित्वेनघटावगाहित्वाप्रमात्वेनमीनावगाहिपर्वतत्वेनह्रदावगाहिपरामर्शजन्यायांपर्वतत्वेनह्रदविशेष्यकवह्नित्वेनघट
विधेयकपर्वतोवह्निमानित्यनुमितौवस्तुतःसाध्यवत्पक्षानवगाहिन्यामप्यव्याप्तिसत्त्वेनवस्तुतःसाध्यवत्पक्षावगाहित्वेतिग्रं
थासंगतेःतादृशानुमितित्वस्यपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयतायाअप्रमात्मवृत्तित्वेनतस्यालक्ष्यत्वात्ता
दृशग्रंथस्वारस्येनउक्तानुमित्यादेर्नोक्तभ्रमत्वशून्यत्वरूपप्रमात्वमेवात्रविवक्षितमितितात्पर्यावगमाच्च।एतेनतद्ग्रंथस्योपलक्ष
णत्वांगीकारेणवस्तुतःसावस्तुतःसाध्यवत्पक्षावगाह्यनुमितिसमानाकारानुमितावित्यर्थो टीकाकारेणकुशकाशावलंबनेपिन
निस्तारइत्यपरेकेचित्तुविधेयतावच्छेदकावच्छिन्नतदवच्छिन्नविधेयतानिरूपितोद्देश्यतावच्छेदकताश्रयेतदुभयांशेप्रमात्व
मिहविवक्षितंलिंगोपधानपक्षेलिंगस्योद्देश्यतावच्छेदकतयातदंशेभ्रमत्वेनालक्ष्यत्वमित्याहुरितिकूटश्चानुभवविरुद्धत्वादिति।
एतेनप्रकृतानुमितौपक्षतावच्छेदकसाध्ययोर्विशिष्यवैशिष्ट्यागाभावानुभवादवच्छेदकताघटितसाध्यतावच्छेदकसंबंधेनसा
ध्यानुमितेश्चाननुभवात्कथंतयोस्संसर्गतयासंसर्गघटकतयावाऽवच्छेदकत्वभानमितिशंकानिरस्ता।ननुव्यापकतघट
कसंबंधेनैवसाध्यस्यानुमितौभानात्पक्षतावच्छेदकेपक्षेवासाध्यस्यावच्छेदकतासंबंधेनतद्घटितसाध्यतावच्छेदकसंबंधे
नवाभानंतत्संभवतीत्यतआह असंसर्गग्रहादीति।बाधाभावादीत्यर्थः।तथाचव्यापकत्वाघटकसंबंधेनसाध्यस्याभानेतद्भास राम ०
कसामग्र्यभावएवबीजंप्रकृतेचबाधाभावादिरूपायास्तद्भासकसामग्र्याःसत्त्वेनतद्भानेनकोपिदोषइतिभावः।अवच्छेदकत्वंभास

तद्भिन्नस्थले स्वरूपसंबंधरूपावच्छेदकत्वं पर्वतो वह्निमानित्याद्यनुमितौ वानतिरिक्तत्वेन तद्रूपावच्छेदकत्वं भासत इत्यर्थः। यत्तु सा
ध्यस्यावच्छेदकतया पक्षतावच्छेदके भानपक्षेऽनुमितेर्वह्निमद्वह्निमानित्याद्याकारकतापत्तिरिति केनचिदुक्तं तन्न स्वातंत्र्येण साध्य
स्य पक्षतावच्छेदके भान एवानुमितेस्तादृशाकारकत्वोपगमेन पक्षविशेषणतापन्नस्यैव साध्यस्य पक्षतावच्छेदके भानेऽनुक्तदोषा
भावात्। ननु तथापि बाधाभावादिसामान्यसामग्रीमात्रादवच्छेदकत्वस्य संसर्गतया संसर्गघटकतया वा भानसंभवे तत्र तेन सं
बंधेन साध्यानुमितौ तत्संबंधघटितव्यापकत्वावगाहिपरामर्शस्य हेतुतया विशेषसामग्र्यभावादिति चेन्न। संबंधत्वस्यैकस्या
भावेन संयोगसमवायादिना साध्यानुमितौ संयोगसमवायादिसंबंधघटितव्यापकत्वावगाहिपरामर्शस्य हेतुताकल्पनेऽप्यवच्छे
दकतासंबंधेन तद्घटितसाध्यतावच्छेदकसंबंधेन वा साध्यानुमितौ तद्घटितव्यापकत्वावगाहिपरामर्शस्य हेतुत्वाकल्पनात्। अथ
पर्वतत्वं वह्निमदित्याद्यनुमितावच्छेदकतासंबंधेन पर्वतत्वादौ वह्न्यादिसाध्यस्य विधेयीकरणादवच्छेदकतासंबंधेन वह्न्याद्यनुमि
तिं प्रति अवच्छेदकतासंबंधेन व्यापकत्वावगाहिनः अवच्छेदकतासंबंधेन हेतुमत्तावगाहिनश्च वह्निव्याप्यधूमवत्पर्वतत्ववदित्याद्याका
रकपरामर्शस्य कारणत्वमवश्यं वाच्यं तादृशपरामर्शं विना तादृशानुमितेरनुदयात् तथा च तादृशपरामर्शरूपविशेषसामग्रीं विना
कथं बाधाभावादिसामान्यसामग्रीमात्रादवच्छेदकतासंबंधेन साध्यानुमितिरिति चेन्न। लिंगभेदेन परामर्शहेतुताभेदमतेऽप्यलिं
गकानुमितौ व्यभिचारात्। तादृशपरामर्शजन्यतावच्छेदककोटावव्यवहितोत्तरत्वसंबंधेन तादृशपरामर्शविशिष्टस्य नि

भ.टी वेशनीयतया महानसस्थलीयानुमितेस्तादृशपरामर्शजन्यतावच्छेदकानाक्रांतत्वात् लिंगभेदेन परामर्शहेतुताभेदाभावमतेपि भ्रमप
सकानुमितौ व्यभिचारवारणाय पर्वतत्वादिपक्षकत्वस्य जन्यतावच्छेदककोटौ निवेशेन महानसस्थलीयानुमितेः पर्वतत्वादि
पक्षतावच्छेदकत्वेपि पर्वतत्वादिपक्षकताभावेन तज्जन्यतावच्छेदकानाक्रांतत्वेनादोषात्। एतेन पक्षेऽवच्छेदकताघटितसाध्य
तावच्छेदकसंबंधेन साध्यभानपक्षे पुरस्कारीत्याहृदयास्योक्तरीत्यैवोद्धारो बोध्यः ननु कीदृशं प्रमात्वं विवक्षितं न तावत् तद्वति त
त्प्रकारकत्वं तादृशानुमितावपि घटत्वगंधत्वाद्यंशे तत्सत्वात् नापि भ्रमभिन्नत्वं भ्रमत्वस्य विषयविशेषनियंत्रितत्वेन घ
टत्वाद्यंशे योभ्रमस्तद्भिन्नत्वस्य तादृशभ्रमानुमितावपि सत्वात् न च विशिष्टे यांशे प्रमात्वं विवक्षितं लिंगोपहितत्वादिप्रकारानु
मितेरत आह यावदुमेति। तत्वं च प्रागेवोक्तं। अव्याप्यत्वादि। अव्याप्ये व्याप्यत्वावगाही वह्निव्याप्यधूलीपटलवान्पर्वत
इत्यादिपरामर्शः अपक्षधर्मे पक्षधर्मतावगाही वह्निव्याप्यमहानसत्ववान्पर्वत इत्यादिपरामर्शः तत्र प्रथमपरामर्
शो धूलीपटलादिरूपलिंगांशे तदधिकरणकपक्षधर्मतासंबंधावगाहीत्याद्यः न तु तदंशेपि भ्रमात्मकः एवं द्वितीयोपि परामर्शो
महानसत्वाद्यंशे महानसत्वाद्यधिकरणक एव यो व्याप्तिवैशिष्ट्यसंबंधस्तदवगाही याद्यः न तु तदंशेपि भ्रमात्मकः एवं च
तत्र धूमादौ व्याप्तिवैशिष्ट्यपक्षधर्मत्वसामानाधिकरण्यप्रसिद्धावपि नैतादृशपरामर्शः एकमात्राधिकरणकतादृशोभयसंबंध राम०
रूपतदुभयसामानाधिकरण्यावगाही प्रथमस्य धूमाद्यधिकरणकव्याप्तिवैशिष्ट्यसंबंधे धूलीपटलाद्यधिकरणकपक्षधर्मता

संबंधावगाहितयाद्वितीयस्यचमहानसत्वाद्यधिकरणताकव्याप्तिवैशिष्ट्यसंबंधेधूमाद्यधिकरणकपक्षधर्मतासंबंधावगाहितया
ताभ्यांविभिन्नधर्म्याधिकरणताकोभयसंबंधस्यैवविषयीकरणादितितज्जन्यानुमितावव्याप्तिरित्यारवंउक्तार्थः दीधितौवस्तुतइत्यादि
प्रमायामित्यंतंलक्ष्यतास्फोरणायव्याख्यायांवस्तुतोवस्तुगत्येत्यादितथाचासल्लिंगपरामर्शजन्यत्वेपिविषयाबाधात्तादृशानुमि
तेःप्रमात्वमितिभावः। नचानुमितिप्रमायांसल्लिंगपरामर्शस्यगुणतामुद्दिश्यहेतुत्वात्कथमसल्लिंगपरामर्शात्प्रमानुमितिस्तुस्या
द्विरितिवाच्यं। साध्यवत्पक्षविशेष्यकत्वरूपसल्लिंगपरामर्शत्वमेवप्रमानुमितिजनकतावच्छेदकंनतुभ्रमभिन्नपरामर्श
त्वरूपमित्युपदर्शितंपरामर्शयोर्भ्रमत्वेपितथाविधसल्लिंगपरामर्शत्वस्याक्षततयाताभ्यांप्रमानुमितिजननेबाधकाभावा
त्। विषयाबाधएवप्रमात्वेतंत्रंनतुगुणजन्यत्वमित्याशयेनेदमित्यन्ये। विशेष्यसंबद्धविशेषणाज्ञानमेवगुणइत्याशयइत्यपरे
दीधितौलिंगोपहितलैंगिकभानविरहेणेतिलैंगिकभानस्यनियमेनलिंगविषयकत्वनिरासेनेत्यर्थः तेननसिद्धसिद्धिर्व्याघा
ती तःव्याख्यायांप्रमाणाभावादिति। एतत्तत्वमग्रेस्फुटीभविष्यति। नादृशंज्ञानंव्याप्तिवैशिष्ट्यपक्षधर्मत्वोभयसामानाधिकर
णविषयकंज्ञानंनाव्याप्तिरितितथाचोपदर्शितभ्रमात्मकपरामर्शस्यव्याप्तिवैशिष्ट्यपक्षधर्मत्वोभयसामानाधिकरण्या
नवगाहित्वेपिधूमादौतदुभयसामानाधिकरण्यमस्तिघ्यातदवगाहीश्वरज्ञानजन्यतामादायैवतत्रसानुमितौलक्षणसम
न्वयोभविष्यतीतिभावः हेतुताभावादित्यस्येत्यादिव्याप्तिवलात्कृतोपधानापत्तिभयेनेश्वरज्ञानस्यतादृशपरामर्शत्वेनजनक

म॰टी॰ त्वाभावादिति भावः। अतिप्रसक्तत्वादिति। तथा चातिप्रसंगवारणाय एतादृशपरामर्शत्वावच्छिन्नजनकतायां असाधारणजन्यता
याया अवश्यं निवेशनीयतयेश्वरज्ञानजन्यतामादायनोपदर्शितानुमितावव्याप्तिपरिहारः संभवतीति भावः। इदं चाव्याप्त्य
भिधानं साध्यत्वस्य साधनत्वस्य चैक्येन तत्तत्साध्यसाधनकानुमितिरूपलक्ष्यभेदेऽपि लक्षणस्यैक्येन जातिघटितत्वेना
स्तीत्यभिप्रायेण। अन्यथा साध्यादिभेदे नव्यास्यादिभेदादेकोपादानेऽन्यसाध्यकानुमित्यव्याप्तिरतो जातिघटितलक्ष
णस्यावश्यकत्वे एतद्दोषाभावादिति ध्येयम्। केचित्तु तल्लक्ष्यकतत्साध्यकतद्धेतुकानुमितित्वेन विशिष्यैव लक्ष्यतयाजा
तिघटनाया अनावश्यकत्वमित्याहुः। जातिघटितलक्षणं विनापि अव्याप्तिवारणप्रकारसंभवेन प्रकारान्तरानुसरणानौचि
त्यमित्यपि कश्चित्। तत्त्वेनान्मते जातिघटनायामपि न निर्वाहः। अतिप्रसंगवारणाय जनकतावच्छेदके निवेशस्यावश्यकत्वेन
व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयसामानाधिकरण्यावगाहित्वस्य गौरवेण जनकतानवच्छेदकतया तन्निवेशासंभवादि
तिरस्तम्। सामानाधिकरण्यं व्याप्तिविशिष्टत्वपक्षधर्मत्वीयमित्याद्युपनीतभानादावनुमितिसामग्र्याः प्रतिबंधक
त्वकल्पने पुनर्लाघवमस्तु तेन तादृशावगाहित्वस्य जनकतावच्छेदकत्वे गौरवासंभवेन तन्निवेशसंभवात् व्याप्तिविशिष्टेद
तिसप्तम्यर्थस्य विषयत्वां दीधितौ इत्यादिकमित्यादिना षष्ठीतत्पुरुषोपग्रहः। व्याप्तिविशिष्टं चेति व्याप्तिविशिष्टपदस्य पक्ष राम०
धर्मगतविशेषानभिधायिनः सामान्यतो नपुंसकलिंगत्वमेवयुक्तमिति भावः। वस्तुतस्तु व्याप्तिविशिष्टस्येत्येव पाठः। मिश्रा

अपि व्याप्तिविशिष्टपक्षस्य पुल्लिंगत्वेनैव निर्देशं कृतवंतः पुंस्कं चैतत्। व्याप्तिविशिष्टपक्षस्य नपुंसकलिंगत्वे लिंगभेदेन व्याप्तिवि
शिष्टपक्षधर्मयोर्भेदप्रसक्त्या पक्षाविवक्षणीयस्यैकधर्म्मिस्थितत्वेन उभयावगाहित्वस्य प्रसक्त्यो न संभवति एकलिंगत्वेन तयोरभे
दबुद्धेरेकधर्म्मिस्थितत्वेन उभयावगाहित्वप्रस्तावः स्वरसत एव संभवति। किंच नपुंसकत्वे भावपरत्वसंशयापत्तेः नपुंसके भावे क्त इत्य
नुशासनात्। न चैवं सामान्ये नपुंसकमिति नियमभंगापत्तिरिति वाच्यं। अयमुत्पत्तिमुद्राभंजनः पद्मिनी नामिका हावपमितस्य
सामान्यतेपि पुल्लिंगतया नपुंसकत्वस्यापकर्षकत्वेनवाधकायो धातवान सम्भि यमत्वासंभवेनोत्सर्गतादिति। द्वंद्वाभ्युपगमा
दिति व्याप्तिविशिष्टपक्षधर्मयोरभेदेनभिदस्य त्वेन्नकर्मधारयस्यौचित्येपि प्रकृते भेदे तासत्त्वाभावान्न पदार्थद्वयाभेदबो
धकः कर्मधारयः किंतु भेदाभेदे दासीनो द्वंद्व इति स्वरूपयाथार्थ्यपरायत्तोपादानं। अतएव देहामासप्रस्फुटीकरणायैवपू
र्वलिंगभेदेषमासइत्यपि वृ इति। तस्मात् इतिद्वंद्वस्य रः अपमाराः प्रत्येकमपि संबध्यत इतिन्यायेन तत्रत्यसमयाऽर्थस्यक्षा। व्याप्तिविशि
ष्टपक्षधर्मपदस्थामत्वयेन तत्र समयां तन्मार्गे नोक्तधर्मद्वयत्वाभाद्विति भावः। अत्र च तदुभयसामानाधिकरण्यस्य अनुमि
तिस्थलेऽप्रसिद्धत्वपि तज्ज्ञानकीभूत अमात्मकपरामर्शस्य तदुभयावगाहित्वमक्षतमेवेति न तत्राव्याप्तिः ननु प्रकृते समस्यमा
नपदार्थयोर्व्याप्तिविशिष्टपक्षधर्मयोरभेदात्कथं द्वंद्वसमासः चार्थे द्वंद्व इति सूत्रेण समस्यमानपदार्थयोर्भेदस्यैव द्वंद्व
सविधानादिसतः आह पदार्थयोरिति। पदार्थयोः परजन्यप्रतीतिविशेष्ययोः पदार्थतावच्छेदकभेदेनैव परजन्यप्रतीतिप्रकार

मेदेनैव। प्रमाणोति। प्रमाणप्रमेययोरभेदेपि प्रमाणत्वप्रमेयत्वयोर्भेदादिति भावः। ननु प्रमाणोसाधारणार्थत्वात्पदार्थभेदे पि द्वं
द्वस्य तत्राह अप्रमत्तेति। नीलघटयोरभेदे द्वंद्वाहौ अत्र नीलपदार्थघटपदार्थयोरभेदेपि पदार्थतावच्छेदकयोर्नीलत्वघटत्वयोर्भे
देऽस्त्येव तथा च तादृशप्रामाणिकप्रयोगानुरोधेन पदार्थतावच्छेदकभेद एव द्वंद्वसमासो भवतीति चार्थे द्वंद्व इति सूत्रार्थः ननु प
दार्थभेदे प्रकृते व्याप्तिविशिष्टपक्षधर्मयोः पदार्थयोरभेदेपि व्याप्तिविशिष्टत्वपक्षधर्मत्वयोः पदार्थतावच्छेदकयोर्भे
दसत्वेन न द्वंद्वसमासानुपपत्तिरिति भावः। व्याख्यायां न चैवमिति। एवं पदार्थतावच्छेदकभेदस्यैव द्वंद्वनियामकत्वे सरूपै
कशेषस्येति सरूपाणामेकशेष एकविभक्तावित्यादिसरूपैकशेषविधेरित्यर्थः द्वंद्वापवादकत्वानुपपत्तिः वैयाकरणानां
मते प्रसिद्धद्वंद्वविध्यपवादकत्वानुपपत्तिः न च केवलद्वंद्वानामेव सरूपैकशेषाभ्युपगमेन तस्य द्वंद्वापवादकत्वादिति द्वंद्वा
नुपपत्तिरेव च कुम्भकुविन्देति वाच्यं तथासति पादश्च इपाद इत्यादौ मायापर्यवसानेन समाहारमसत्याधारादप्रसिद्धेः ननु ए
कशेषो न द्वंद्वापवादकः तथासति सविभक्तिकानामेव द्वंद्वसंभवेन तादृशानामेवैकशेषस्य बाध्यतयापवादत्वात्। पदेनरं सु वि
भक्तेरवस्थानापत्तेः सुप्तपदानां श्रूयमाणबहुवचनप्रकृतितयानर्थानां बहुत्वबोधकतायास्तत्रानुपपन्नत्वेति तरसतरसरूपा
णामित्यादिज्ञापकबलेन सरूपाणामेकशेषे द्वंद्वानुशासनेन द्वंद्वत्वातिदेशेन बाधदोषाभावात्। शिष्यमाणोऽनुयमानार्था
भिधायीति न्यायेन विद्यमानार्थ एव बहुत्वान्वयेन द्वितीयदोषाभावादेतिदिक्। एकविषयताभावादिति। घटश्च घटश्च घटश्च घटा

इत्यादिसरूपैकशेषस्थलेपदार्थतावच्छेदकघटत्वादेरैक्येनद्वंद्वाप्रसक्त्या एकविषयत्वाभावात् एकविषय एवापवादापवादकभावस्य सं
प्रदायसिद्धत्वात्। अत एवसरूपैकशेषस्थलेत्युक्तंपितरावि [illegible] रूपैकशेषस्थलेमातृत्वपि
तृत्वरूपपदार्थतावच्छेदकभेदसत्वेनद्वंद्वप्रसक्तिसंभवेनपितामात्रेत्यादिविरूपैकशेषविधेर्द्वंद्वापवादकत्वसंभवादितिभावः अथ
घटाद्यसाद्वेद्वंद्वाप्रसक्त्यावपि अश्वाहरपइत्यादिनानार्थसरूपैकशेषस्थले एवेंद्रियतपाशत्वविस्मृतेंइत्यादिरूपपदार्थतावच्छेद
कभेदसत्वेनद्वंद्वप्रसक्त्या एकविषयत्वसंभवस्तेवेसेकविषयत्वाभावादित्यसंगतमिति चेत् न तथाहि यद्विधिविषयत्वं यद्विधिवि
षयताव्यापकंतयोरेवोत्सर्गापवादकभावः सामान्यविधिरुत्सर्गो विशेषविधिरपवाद इति त्वत्रस्य + चेन्न एकविषयत्वाभावा
दित्यस्यानतिरिक्तविषयत्वाभावादित्यर्थात् विशेषविधित्वाभावादिति + तात्पर्यात् पदार्थतावच्छेदकभेदस्यैवद्वंद्वप्रयोजकत्वेद्वं
द्वविधिविषयतायाः सरूपैकशेषविधिविषयताव्यापकत्वंनसंभवति द्वंद्वविधिविषयस्यघटाद्यसादिस्थल स्यसरूपैकशेष
विधिविषयत्वात् पदार्थभेदस्य द्वंद्वप्रयोजकत्वेनुघटाद्यसादिस्थलेपि तन्न द्वंद्वपरतासर्वविषयीभूतानांतत्तद्व्यनांभेदस
त्वेनतत्रापिद्वंद्वप्रसक्तिरस्त्वी तिवाच्यं पत्तिरिति। कल्पनादिति। अथैवमेकघटत्वातात्पर्यकयोर्घटकलशपदयोर्द्वंद्वापत्तिस्तत्रापि
पदजन्यप्रतीतिविषययोर्घटघटत्वयोर्मिथो भेदसत्वादितिचेन्नपमदजन्यप्रतीतिविषयत्वसामानाधिकरण्येन पदपदजन्य
प्रतीतिविषयत्वावच्छिन्नभेदस्तयोर्द्वंद्वांगीकारात् उक्तस्थलेचघटपदजन्यप्रतीतिविषयत्वसामानाधिकरण्येनकलशपद

म.टी. जन्यप्रतीतिविषयत्वावच्छिन्नभेदसामान्यवान्न द्वंद्वापत्तिः न चैवमपि विभिन्नघटत्वावच्छिन्नयोर्घटकलशपदयोर्द्वंद्वः स्यादिति वाच्यं इष्टत्वात् तानव
तथापि मेयवाच्ययोर्भेद इत्यादौ द्वंद्वानुपपत्तिः मेयपदप्रतिपाद्यत्वसामानाधिकरण्येन वाच्यपदप्रतिपाद्यत्वावच्छिन्नभेदासत्वा
दिति वाच्यं । पदसदजन्यप्रतीतिविषयतात्वसामानाधिकरण्येन पदसदजन्यप्रतीतिविषयतात्वावच्छिन्नभेदसत्वोर्द्वंद्वांगीकारेऽयो
कस्यत्वेप्रकारभेदेन विषयताभेदसत्वेनातो व्याप्तं गगनाकाशयोरभेद इत्यादौ तु गगनादिपदस्य तद्वाच्यत्वावच्छिन्नपरत्वे यावि
षयताभेदान्न द्वंद्वानुपपत्तिः एवं सति घटद्वयाभिप्रायप्रयुक्तघटपदद्वये एकशेषानुपपत्तिः घटइत्यभिन्नाकारकज्ञानानां
विशेष्यभेदेन विषयताभेदे मानाभावादित्याशंक्य पदार्थतावच्छेदकभेदेनैवेति प्रकारसंवलितदीधितिस्वारस्यमनुसृत्य । यद्वा
हाऽक्षसाइत्यादौ नानार्थ एवेति एवकारेण घटाइत्यादिव्यवच्छेदः अयमाशयः घटाइत्यादौ एकघटपदादेव बहुनवगेन
घटत्वस्याभावात्तत्र कयैकशेषानभ्युपगमेऽपि क्षतिविरहः न च सकृदुच्चरितः शब्दः सकृदर्थं गमयतीति व्युत्पत्त्या एकपदं एकमेवा
र्थं बोधयतीत्यस्याः स्फुटमत्वात् कथमेकघटपदात् घटद्वयबोध इति वाच्यं । एकानुसंधानावच्छिन्नं पदं एकशक्यतावच्छेदकाव
च्छिन्नमेव बोधयतीत्यत्र तत्कव्युत्पत्तितात्पर्येण एकघटपदानुसंधानात्तत्त्वरूपेण नानाघटबोधे बाधकाभावादिति । सार्थकत्वा
दिति । अक्षा हरय इत्यादौ एकेनैव स्वादिपदेन इत्ययादिति विस्थाद्विनानार्थबोधो न संभवतीत्युपत्वादित्यविशुत्वादिरूपशक्य
तावच्छेदकभेदेनैकत्पुत्पत्तिविरोधापत्तेरिति भावः । यथा क्रमेणेति । पदार्थतावच्छेदकयोर्भेदे एव द्वंद्वांगीकारेऽपि नानुपपत्तिरिति

तिः॥घटाइत्यादेःसरूपैकशेषविषयत्वाभावेनपदार्थतावच्छेदकभेदस्यैवद्वंद्वप्रयोजकत्वेपिद्वंद्वविधिविषयतायाअक्षाद्यादि
स्थलीयसरूपैकशेषविधिविषयताव्यापकत्वसंभवेनसरूपैकशेषस्यद्वंद्वापवादकत्वानुपपत्तेरभावादितिभावः नचैवंघटघ प
टावितिप्रयोगस्यापिसाधुत्वापत्तिःसदृशैकशेषविषयत्वाभावादितिवाच्यं उक्तार्थानांप्रयोगाभावात् एतेनैकवचनभिन्नवि
भक्तिसमभिव्याहारेपदद्वयस्यैकशक्यतावच्छेदकावच्छिन्नावबोधकत्वमितिनियमांगीकारान्नोक्तदोषइतिपरास्तंउक्तनियमंविनै
वोपपत्तेःइत्याहुरिति आदिनानदूयतइत्युदवनोरैक्यमित्रादिपरिग्रहःपदार्थतावच्छेदकत्वेनपदार्थैकदेशत्वेनानिराकांक्ष
त्वादिति पदार्थःपदार्थेनान्वेतीतिव्युत्पत्त्यनुरोधेनद्वित्वस्यतयोरन्वयासंभवादितिभावः ननुनन्वयाभ्युह्यतामिति तथाचविशिष्य
रुपद्वित्वान्वयःतस्यैकत्वेपितद्गुणामादायतत्रद्वित्वसंभवइतिभावः नन्वसाधुत्वज्ञानेनप्रतिबंधादेवनैकोघटाइत्यतःशाब्दबो
धप्रसंगइत्यतआह असाधुत्वेतिप्रसंगादिति तथाचैतादृशप्रसंगवारणायसुपांमहत्सामर्थ्यमाश्रित्यसंख्याबोधकत्वमेवोपे
यं एवंवचनेऽतद्गुणामादायद्वित्वान्वयसंभवइतिभावः तत्रनीलघटयोरभेदइत्यादौ पदसाधुत्वापेवेति अथसाधुत्वार्थंद्विव
चनस्याप्यनुशासनमपेक्षितं अन्यथाद्वित्वस्याविवक्षायांद्विवचनस्यासाधुत्वेनप्रथमोपस्थितस्यैकवचनस्यैवोचितत्वादितियेन
पदार्थतावच्छेदकभेदेद्वंद्वानुशासनमेवान्यथानुपपद्यमानंद्विवचनस्याप्यनुशासकमित्याशयात्द्वंद्वसमासेएकवचनस्य
समाहारद्वंद्वएवनियमितत्वेनार्थतएवेतरेतरद्वंद्वेद्विवचनस्यानुशासनसिद्धत्वाद्वापनुसर्वोद्वंद्वोविभाषैकवद्भवतीतिवा

३२

भ.टी.

जिंकिमेव पक्षे द्विवचनविधानं कसाधुत्वार्थमेव द्विवचनस्यानुशासनमिति तन्न तद्धार्तिकिसेकवद्भावस्य समाहारपरतया न केवलं
द्वंद्वस्य प्राप्तिः तर्हि पसेनांगानामिति सूत्रादिषयएव समाहारद्वंद्वः किंतु सर्वो द्वंद्वः समाहारप्रधानो विकल्पेन भवति तेन धवखदि
रौछिंधीत्यादि प्रयोगोपि साधुरित्यर्थकत्वात् अन्यथा तद्वृत्करीत्यायथाश्रुतार्थकरणे समाहारार्थविवक्षायां द्विवचनबहु
वचनयोरितरेतरयोगविवक्षायां चैकवचनस्यानिवार्यतापत्तेः किमर्थमिति उभयत्रापि पदार्थानेदस्य पदार्थतावच्छेदकभे
दस्य द्वित्वाद्युपस्थितिविशिष्टत्वादिति भावः अतएव पक्षसंगादिति इदमुपलक्षणं नीलघटपीतैत्यत्र कर्मधारये परशिति
रीत्या द्विवचनस्यासाधुत्वापत्तिनीलोत्पलमित्य [illegible] लमित्याद्यविवेकवचनस्येव साधुत्वादित्यपि द्रष्टव्यं किंतु पदार्थ
तावच्छेदकगतमेव द्वित्वादिकं नीलघटयोरित्यादौ द्विवचनादिना प्रत्याय्यते स्वामिनो देवदेवदत्तविष्णुमित्रावित्यादिवत् तद्युक्तनिर्देशे त्विव्यादिसा
धुः तन्न कर्मधारये पि द्विवचनस्य साधुत्वापत्तेः पुरुषउदयपदार्थाद्वित्वादौ पदत्वद्विवन्नीलघटयोरित्यादावपि नीलघटत्वा
दिरूपमिन्नधर्मप्रकारकबुद्धिविशेष्यविषयकं तरूवंगोत्वाद्धित्वं विशेष्यात्वस्येव नचैवमेकं नतद्रूपस्मादिन्नाधर्मप्रकारक
बुद्धिविशेष्यविषयत्वसत्वाद्वित्वसंख्याद्यापत्तिरिति वाच्यं तद्रूपतद्रूपवतोरैक्यं तद्रूपतद्रूपवत् भिन्नधवतामेवमपि सादिप्रयोग
सत्वेनेष्टत्वात् इयांस्तु विशेषो यद्यद्रूपप्रकारकबुद्धिविषयत्वं गोत्वादित्वादि व्यावहारविमितं ननु द्रूपवृच्छेदेनेवपर्या
प्तं तेन नैकोदाविसारेखा [illegible] इति तद्रूपिनद्ध्ये नीलोत्पलमित्यादिकर्मधारयस्यलेपिनो [illegible] दिभिन्नधर्मप्रकारक राम०

बुद्धिविशेषविषयत्वरूपद्वित्वस्य संभवेन द्विवचनसाधुत्ववारणाय विरुद्धनानाधर्मप्रकारकबुद्धिविशेषविषयत्वरूपस्यैव गौणा
द्वित्वादेर्वाच्यतया प्रकृते तदसंभवात्। पंकजमित्यादिवो गरुडपदे। भ्योपि पद्मेयं कजनिकर्तृत्वरूपविभिन्नधर्मप्रकारकबोधोदये त
न तत्रापि निरूढद्वित्वसंभवेन एकवचनप्रयोगं कजे इति द्विवचनांतप्रयोगस्य साधुतापत्तेः। स्व किमर्थं नित्यादिपद्यपि नीलोत्पलमि
त्यादौ इष्टस्वीकारे एकवचनानुपपत्तिरेवं कर्मधारयसाधिकास्ति। तथापि पदार्थाभेदस्य लीवद्द्रुसाधारणस्य विभिन्नधर्मा
वच्छिन्नबोधकनानानामत्वरूपद्वलक्षणस्य कर्मत्विंव्याप्तिरित्यवतासर्वं। अथवा प्रकृतग्रंथेप्येतस्य रत्नेयैवयोज्यः तथाहि कि
मर्थं कथं पृथक् द्वन्द्वाद्भिन्नो अंगीकृपते व्यवच्छिपते परस्परस्य परस्परलक्षणाक्रांततयाकथं परस्परभिन्नत्वेन व्यवहा
रद्वलाशयः। ननु कर्मधारयस्य पदार्थद्वयबोधकत्वेपि न तदभेदबोधकत्वं तदुपस्थापकाभावादिसन्नाह तथा वेलादिसंसर्ग
विधयाऽभेदबोधकत्वमपि नफलोपधायकत्वरूपं कथं विरुद्धानुपधायककर्मधारयासंग्रहात्। किं तुस्वरूपयोग्यत्वं तत्रासर्यक
त्वयर्थवसितमित्यादिहत्सर्पमिति। इतिभाव इति एवं चैवस्त्वं नोऽभिन्नधर्मिबोधकसमासत्वेन कर्मधारयलक्षणं किंतु एकपदार्थवि
शेष्यकाभेदसंसर्गकापरपदार्थप्रकारकबोधतासर्यकसमासत्वमेव तस्य वचनेनीलघटयोरित्यादि द्वन्द्वसाधारणम् विलाशयः।
अनेनराजपुरुषइत्यादितत्पुरुषेऽतिव्याप्तिरितिनिरस्तं। क्वचित्तत्र हिं पुंसां शेषराजसंबंधिनोनामभेदेन प्रकारत्वं समासविग्रहयोरुक्तत्वार्थ
त्वहात्मायत्तेः किंतु पूर्वपदलक्षितस्य राजसंबंधस्यैवाभेदेन। अथवा राज्ञ एवनामार्थयोरित्यादिसूसन्नेः समासातिरिक्तविषय

त्वाप्युपगमात् पदद्वित्वराजसंबंधिन एवाभेदेनान्वय इति मतं तत्तत्समासनिपतलक्षणाप्रसक्तमपि देयं पदद्वयं किं विद्धि शिष्टसुवर्थानि
वच्छिन्नत्वप्रकारताप्यां देयं राजपदस्य संबंधिमात्रपरतायां कर्मधारयत्वोपपत्तये किं विद्धि शिष्टेति। न चैवमपि पदद्वयात् द्विगो द्वि
गार्थ्यं गच्छत इत्यादिस्थलीयपद्धतिव्याघप्रभिन्नगार्ग्यादिबोधकत्वपीभावे चातिव्याप्तिरिति वाच्यं। संज्ञाविषयामसंख्यावाचकपूर्वपद
कामत्तस्यापि निवेशात् पंचाम्नाः पंचकन्यादिसंज्ञास्थलीयकर्मधारयसंग्रहाय संज्ञाति वयामत्तमसंख्यमिति योगविशे
षणात्याउपादानमिदमप्रधानस्य द्वंद्वस्य कथं भेदेऽसमीनत्वमत आह भेदविषयकेत्यर्थ इति नन्विदं कर्मधारयेपि तत्र नीलोत्पलादि भेदा॰
पदार्थद्वयस्य निर्विषयकतया भेदाभेदाविषयकं वस्तुतः अर्थद्वयं तद्बोधकत्वादतस्याह रदंचेति। अथ भावः विभिन्नधर्मावच्छिन्न
बोधसमासत्वं न द्वंद्वलक्षणमतिप्रसंगात् किंतु भेदाभेदाविषयकोपस्थितार्थबोधजनकत्वं कर्मधारये भेदविषयकबोधजनक
त्वान्नातिव्याप्तिः अस्ति चेदं लक्षणं द्वंद्वमात्रे तत्र हि नाभेदो भासते वस्तुद्वित्वविरोधात् नीलघटयोरित्यादौ वा घेपि
उपदर्शितरीत्या निराकांक्षतया भेदतात्पर्याभावात् एवं च तत्र भेदेपि न भासते नीलघटयोरित्यादौ वाधात् भवत्वद्वित्वविरोधा
घपि संसर्गः प्रकारतो वा तद्यः नामार्थयोर्भेदेनान्वयात् स हि रादि विशेषणाधवादे वित्वाद्युपसंख्याकर्मत्वाद्यन्वयप्रसं
गाच्च द्वयोः प्राधान्यानुभवविरोधाच्च अत एव न द्वितीयोपि अत्र च कर्मधारयपदमुपलक्षणं तथा भेदाविषयकेति उक्तरीत्या राज राम॰
पुरुष इत्यादितत्पुरुषे अभेदाविषयकबोधजनकेतिव्याप्तिवारणाय भेदाविषयकेति। तत्र राजसंबंध्यादिलक्षणा वा दिमतेन

२धानुपधायकेस्वरूपयोग्येसंमासांतरेऽतिव्याप्तिरितिवाच्यंभिदाभेदविषयकपदार्थद्वयबो२
नञ्तत्पुरुषाद्यघटीभाववारणायतत्तज्जनकत्वंचस्वरूपयोग्यत्वंतेनफलानुपधायकद्वंद्वेनातिप्रसंगः॥नचैवंकथंचित्भेदाभेदविषयकप
दार्थद्वयबोधस्वरूपायोग्यत्वस्यतन्नासर्पभूमत्वपर्यवसितस्येहविवक्षितत्वात्।पनुपरस्परान्वितपदार्थबोधकनानामत्वंद्वं
द्वत्वमितिनतुपरस्परत्वस्यदुर्वचत्वात्तुपेयस्यंकिंचित्तुभेदाभेदोदासीनत्वंभेदाभेदज्ञानाविषयत्वंभिन्नतयाअभिन्नतयावाऽभास
मानत्वंतथाचार्थविशेषणामेवंभेदोदासीनंचदृष्टांतविधयाअभेदभानव्यवच्छेदेनैवकर्मधारयादिशेषोपपत्तेः॥कर्मधारयस्यले
अभेदस्वरतरेतरद्वंद्वस्यलेपिपदार्थस्यतत्त्वावच्छेदकस्यवाभेदेपथायोगंभासतइतिभ्रमनिराकरणायवातदुपादानं—स
स्तरोविवेशः॥राजपुरुषइत्यादौराजसंबंधात्तत्तलक्षणयाअभेदभानादेवनिरासात्।नञ्तत्पुरुषावपीभावादावपिअघ
टःपटउपकुंभमित्यादौघटादिपदस्यघटादिप्रतियोगिकेकुंभादिपदस्यकुंभादिसंबंधिनिसर्वत्रलक्षणयाऽभेदभानस्याव
श्यकत्वात्कुसुमसंकोचेनैवोपपत्तौसंकोचेमानाभावादित्याहुः॥वस्तुतस्तुउद्देश्यतोभेदोदासीनत्वंपदार्थविशेषणांतवापसर्थद्व
यबोधविशेषणं॥किंतुसाक्षात्त्वेनलक्षणाघटकं॥तथाचभेदाभेदोदासीनत्वेसतिपदार्थद्वयबोधकत्वंद्वंद्वलक्षणं॥भेदाभेदोदा
सीनत्वंचभेदाभेदतात्पर्यशून्यत्वं॥पदार्थद्वयभेदाभेदबोधतात्पर्यरहितसमासत्वंद्वंद्वत्वमितितुनिष्कर्षःइतिमारंस्थ्रनुशासने
ति॥वार्थेद्वंद्वइत्यनुशासनेसर्थःतादृशानुशासनादिसमस्यमानपदार्थभेदएवद्वंद्वइतिलभ्यतेतेननुपदार्थतावच्छेदकभेद
इतितथाहिपदार्थभेदेपदार्थतावच्छेदकभेदेवाद्वंद्वइत्यत्रकिंप्रमाणंमतांवचार्येद्वंद्वइतिसत्यंतत्तत्सीदृशार्थस्याभाव

म.टी.

भेदस्य चार्थत्वाभावात्। भावे वा वृक्षस्य गस्या चार्थो विद्यमाने द्वन्द्वः किं वा तस्मिन्नसति वा द्वे द्वन्द्व इति स्वार्थः। नाद्यः चार्थे इत्यस्य व्यावर्त्त्य
कत्वेन सूत्रे तदुपादानवैयर्थ्यात्। नान्त्यः तथा सति गमनाकाशौ घटपटावित्यादिष्वयोगापत्तिः द्वन्द्वसंभवादिति वाच्यं। पर्यायाणां
सहप्रयोगाभावेन एकशेषकृतबाधेन वा तद्वारणात्। अन्यथा तदुपादानेपि विस्पष्टत्वसिंहत्वादिबोधजनके हर्यादिपदद्वये ह
रिहरीत्यादिद्वन्द्वप्रसंगस्य दुर्वारत्वात्। न द्वितीयः द्वन्द्वे भेदस्याप्रतीतेरभावात् तत्प्रतीतिपक्षे द्वन्द्वलक्षणाभ्युपगमापत्तेः धवखदिरावित्या
दौ भेदप्रतीतिप्रसंगाच्चेन्नवेष्टापत्तिः भेदाभेदोदासीनित्यादिस्वोक्तिविरोधात्। तावतैव कर्मधारयभेदसिद्धेस्तत्साधनक्लेशस्यानुपपत्ते
श्च तस्मादेवं सूत्रं व्याख्येयं। चार्थ इति चार्थश्चतुर्विधः समुच्चयान्वाचयेतरेतरयोगसमाहारभेदात्। प्रत्येकं पर्याप्तधर्मावच्छिन्ना
नामेवान्वयः समुच्चयः यथा पश्य धवं खदिरं च छिन्धीत्यादौ। अत्र प्रत्येकमेव दर्शनाद्यन्वयात् समुच्चयः। मुख्यक्रियासमभिव्याहृता
प्रासंगिकक्रियान्वयोऽन्वाचयः यथा वटो भिक्षामट गां चानयेत्यादौ। इतरेतरपर्याप्तधर्मावच्छिन्नानामन्वय इतरेतरयोगः यथा
धवखदिरौ छिन्धीति विग्रहे धवखदिरौ छिन्धीत्यादौ। अत्र साहित्यो धर्मः पर्याप्तः तेषां हि सन्तन्त्रतेन साहित्यबोधात्। अस्मिन्मते च विभक्त्य
र्थद्वित्वादिसंख्यारूप एव तस्य चान्वयितावच्छेदकतानवच्छिन्नस्यैव क्रियायामन्वयो न तु प्रत्येकं अन्वयितावच्छेदकावच्छिन्नान्वय
स्यैव युक्तत्वात्। अत एव पशुना यजेतेत्यादावेकत्वस्यान्वयितावच्छेदकतया तदवच्छिन्नकरणकयागेष्टसाधनत्वस्य बोधित राम०
त्वेनैकपशुकरणकयागादेवादृष्टं नानेकपशुकरणकयागादिति सर्वसिद्धान्तः। एकक्रियायां साक्षात्कर्मत्वादिपरंपरासंबन्धेन ता

दशधर्मान्वयस्समाहारःपथ्याधवश्चखदिरश्चपलाशश्चएतेषांसमाहारइतिवि[illegible]ग्रहेधवखदिरपलाशंछिंधीत्यादेरत्रवता
दशोधर्मःसाहित्यमपेक्षाबुद्धिविशेषविषयत्वरूपंतच्चपरमतेशक्यंअस्मन्मतेचलक्षणीत्यमदेतत्समाहारेसाहित्यबोधस्य
र्वमतसिद्धत्वात्।एवंचतुर्विधेचार्थेप्रकृतसूत्रेसमुच्चयान्वाचयपभिन्नस्थार्थौनिर्दिष्टःसमुच्चयेप्रत्येकान्वयपनात्सर्वेषांधवखदिरौ
पश्यछिंधीत्यप्रयोगीत्।अन्वाचयेवटोभिक्षामटगावाचटानयेत्यप्रयोगाच्च।अतएवसूत्रेचार्थेइत्यपिसार्थकं।अन्यथाह्यप्र
योगस्यप्रकारांतरेणावारणात्।तस्यवसूत्रगत्वासत्वमेवद्वंद्वनिपामकंननुप्रतियाद्यत्वमपिअतो[illegible]नोक्तविकल्प
ग्रासः।तथाचचार्थेइतरेतरपर्याप्तधर्मावच्छिन्नस्यतादृशधर्मस्यचान्वयेद्वंद्वसमासोभवतीतिसूत्रार्थःपर्यवसन्नः।द्वित्वादि
रूपतादृशधर्मावच्छिन्नान्वयः।साहित्यरूपतादृशधर्मान्वयश्चसमस्यमानपदार्थभेदे।एवंसंभवतिननुपदार्थतावच्छेदकभ
भेदेइतिपदार्थभेदे।एवंद्वंद्वोनुशासनस्वरससिद्धस्तत्रैवचार्थसंपन्नेःननुपदार्थता

४०

४०

वच्छेदकभेदे अत एव नीलोत्पलमित्यादौ न द्वंद्वः पदार्थभेदाभावात्। भेदे द्वंद्व इति प्रवादोऽपि पदार्थभेदाभिप्रायक एव न तु पदार्थतावं
च्छेदकभेदाभिप्रायकः अनुशासनविरोधान्न प्रयुज्यते चैतत्। अन्यथा पदार्थतावच्छेदकभेदस्य द्वंद्वनियामकत्वे एकस्मिन्नेव दं
डिनि कुंडलिनि च पुरुषे दंडिकुंडलिनौ गच्छत इति प्रयोगापत्तेः न चात्र द्वित्वान्वयासंभवादेव न तादृशः प्रयोग इति वाच्यं। नीलघटयो
रभेदद्वयस्याविवक्षितत्वाद्विवक्षायां द्विवचनस्य प्रयोगसाधुत्वांगीकारेण तादृशप्रयोगस्य भवद्भिः स्वीकार्यत्वात् न च द्वित्वा
विवक्षायां द्विवचनस्यप्रा तादृशप्रयोगे दुष्टापत्तिरिति वाच्यं। इतरेतरयोगसमाहारयोरभावेन द्विविधद्वंद्वसमासस्यैवासंभ
वान्नीलघटयोरभेदद्वयस्यावस्थिकथं द्वंद्वः इतरेतरयोगसमाहारयोरभावादिति चेत् तन्मानमेवोपालंभस्वयनः पदार्थ
तावच्छेदकभेदस्याद्वायात्र द्वंद्वमंगीकरोषि। न च पदार्थभेदस्य द्वंद्वनियामकत्वे उक्तप्रयोगवारणेऽपि नीलघटयोरित्यादौ द्वंद्वा
नुपपत्तिरस्त्येवेति वाच्यं। उपपत्तेरनुपदमेव वक्ष्यमाणत्वात्। अपि चैकस्मिन्पुरुषे आख्यातार्थद्वित्वसंख्यान्वये अनभिहिता
धिकारापत्तौ पापत्त्यानोक्तप्रयोग इति चेत्तर्हि दंडिकुंडलिभ्यां गच्छत इति प्रयोगापत्तेः दंडिकुंडलिनौ गच्छतीति प्रयोगायत्ते
ष्वानवमप्रथमांतपदार्थाभावेन भावनान्वयासंभवान्नकर्त्राख्यातघटितप्रथमप्रयोगः कर्त्राख्यातस्थले तु वाख्यातवचनयोः पर
स्परविरुद्धार्थयोः सह प्रयोगस्यासाधुत्वाद्वन्नद्वितीयोऽपीति वाच्यं। तथापि दंडिकुंडलिभ्यां गम्यते ग्राम इत्यादिप्रयोगस्य
दुष्करोऽपि दुर्वारत्वात् न च यद्द्वंद्वपदस्य द्विवचनस्य वानैरर्थक्येन फलाभावान्न तथा प्रयोग इति वाच्यं। तत्र द्वंद्वमेव न तथापरस्त्री

१

म.टी.

याचोषनस्यैव प्रयोगफलत्वोपपत्तेस्त्वात्त्वात् तस्मात्पदार्थतावच्छेदकभेदेपि पदार्थभेदाभावेनेतरेतरपर्याप्तधर्माव
च्छिन्नान्वयाभावेन तादृशधर्मान्वयाभावेन च वह्निविधहेद्वासंभवान्न तादृशः प्रयोग इत्यपेक्षांगीकारे रणीयमिति सिद्धं
पदार्थभेदएव द्वंद्वइति। कथं तर्हि नीलघटयोर्भेदः एतद्रूपवदेतद्रूपवतोर्भेदइत्यादयः प्रयोगाः पदार्थभेदाभावा
दिति चेत् अत्र भेदादिपरसमभिव्याहृतनीलादिपदानां स्वरूपेलक्षणा भेदरत्नस्य वार्थाभेदद्वन्द्वार्थः तथा
च नीलघटशब्दयोरर्थाभेदद्वन्द्वार्थो द्वयत्वविशिष्टपदार्थभेदेरितरेतरयोग अन्यथा घटकलशयोरविशेषद्वन्द्वापत्तेरित
वापि कथं द्वंद्वः पदार्थतावच्छेदकभेदस्याप्यभावात् एतद्रूपवदेतद्रूपवतोर्भेद इत्यादौ च मतुबन्तानामेव शब्दानां परत्व
नीलघटादिपदे नीलत्वघटत्वादिपरे अभेदद्वन्द्वस्य वा अथवा भेदद्वन्द्वार्थद्वित्वविशिष्टेतरेतराभावसाधर्म्यवैधर्म्याभ्यां
तत्त्वज्ञाननिःश्रेयसहेतुरित्यत्र का गतिः एकस्यैव द्रव्यत्वादेः पृथिव्यादिसाधर्म्यत्वेन गुणादिवैधर्म्यत्वेन च पदा
र्थभेदाभावात् अन्यथा पाकजप्रशब्दपुरत्वे स्याप्यसंभवादिति चेन्न प्रमाणप्रमेयेत्यादिवद्दोषत्वात् अन्ये तु साध
र्म्यवैधर्म्ययोः शब्दार्थयोर्निरूपकघटितत्वेन तन्निरूपितसाधर्म्यस्य तन्निरूपितवैधर्म्यस्य च साधर्म्यवैधर्म्येश राम
ब्दार्थत्वेन पदार्थभेदः पृथिव्यादिनिरूपितसाधर्म्यात्मकस्य द्रव्यत्वादेस्तन्निरूपितवैधर्म्यात्मकत्वाभावादित्याहुः
पदार्थतावच्छेदकभेदस्यैव द्वंद्वनियामकत्वे नीलघटयोर्भेद इत्यादौ द्वंद्वानुपपत्तिः केवलं इतरेतरयोगसमाहारा

भावात्।एवंद्विवचनस्याप्यनुपपत्तिःनचासाधुत्वंयतः।पदार्थैकत्वेएकवचनस्यैवन्यायप्राप्तस्यसाधुत्वार्थमुद्दि
ष्टत्वात्।नचैकस्यांदाराइतिवदिदमपीतिवाच्यं।तथाविशेषविध्यभावात्।नचौकारीत्यापदार्थतावच्छेदकभेदेद्वं
द्वानुशासनमेवान्यथानुपपद्यमानंद्विवचनस्याप्यनुशासकमितिवाच्यंपदार्थतावच्छेदकभेदेद्वंद्वस्यैवाभावात्।
अथसमाहारद्वंद्वेएकवचननियमानुशासनमेवेतरेतरद्वंद्वेद्विवचनानुशासकमितिचेन्न।तस्यसमाहारद्वंद्वेद्वि
वचनाभावानुशासकत्वेनतुइतरेतरद्वंद्वेद्विवचनानुशासकत्वेनार्थवत्यर्थेतानुशासनेतस्यासामर्थ्यात्।नचान्य
थानुपपत्त्यासामर्थ्यकल्पनेतिवाच्यंअन्यथोपपत्तेरुपदर्शितत्वात्।एतेननीलघटयोरितिप्रामाणिकप्रयो
गानुसारेणाद्वंद्वेसाधुत्वमात्रार्थकद्विवचनविधानतरकल्प्येप्रयोगानुरोधित्वाद्व्याकरणस्मृतेरित्यपिपरास्तं।अ
न्यथानुपपन्नप्रामाणिकत्वेनसिद्धप्रयोगस्यैवविधिकल्पकत्वात्उपपत्तेश्चोक्तत्वादिति।नदेनस्यैकत्वमपिप्र
त्पीक्रमनुशासनस्वरससिद्धमतमिति।ननुचैत्रश्चचैत्रश्चेत्यत्रपदद्वयसत्वेनद्वंद्वप्रसक्त्यातदपवादकैकशेषप्र
त्तौचैत्रावितिप्रयोगापत्तिःनचेष्टापत्तिःचैत्रादिपदानांशरीरेशक्त्यातस्यनानात्वेनद्वित्वान्वयसंभवात्साधु
त्वमपीतिवाच्यं।एवमप्याकाशोईश्वरावितिप्रयोगापत्तेःनचासाधुत्वान्नीलघटयोरित्यादिवद्द्वित्वाविवक्षया
साधुत्वसंभवादित्यतआहकिंचेति।विशेषणयोरित्यादिविशेषणयोरेवविशेष्ययोरेवचापरस्परभेदरूपार्थः।तेन

भटी. कघटाभिधायके घटकलशादिपदे नद्वंद्वापत्तिः नवाननुगमः समस्यमानप्रत्ययैकपदजन्यप्रतीतियत्योः पांसजा
तीयविषयतानदाश्रयभेदेतान्यपीतसाजात्यंचप्रकारताविशेष्यतान्वान्यतररूपेणा। नयोः समस्यमानपद
योः द्वंद्वापादकइति। नचद्वंद्वापत्तिविरहेप्येकशेषापत्तिरस्त्वेवेतिवाच्यं। द्वंद्वप्रसक्तावेवैकशेषप्रसक्तेः एवं
यदार्थ्ययोरितिसूक्तेन्यविवक्षितत्वात्। उक्तिसि उक्तरीत्याद्वंद्वापत्त्यभावादित्यर्थः। इदमुपलक्षणं। आकाशावित्यादिप्रयो
गस्यासाधुत्वादेवासंभवात्। नचनीलघटयोरित्यादिवतद्वित्वाविवक्षयासाधुत्वं। तत्रापिद्वित्वविवक्षयैवसाधुत्वस्यो
पपादितत्वात्। एवंपदार्थतावच्छेदकभेदस्यैवद्वंद्वनियामकत्वेनोक्तप्रयोगासंभवः सरूपैकशेषस्यचअत्राउक्त्यादिना
नार्थस्थलेएवसार्थकत्वादित्यपिद्रष्टव्यं। नापंयथाः नोक्तरीत्यावतारणमार्गः धर्मैपरत्वेत्यस्य वैशिष्ट्याश्रयरू
पधर्मिवाचकविशिष्टपदस्यलक्षणयावैशिष्ट्याश्रयत्वरूपधर्मपरत्वमित्यर्थः सचएतेनेत्यादिवक्ष्यमाणरीत्या
ऽनुपपन्नः वैशिष्ट्यमात्रात्मनेनव्याप्तिवैशिष्ट्यपक्षधर्मतयोर्लाभादित्ययेतनेनविरोधश्चेत्यतआहनपुंसकइत्यादि
धर्मपरत्वेत्यस्य धर्मिवाचकविशिष्टपदस्यलक्षणयाधर्मपरत्वमितिनार्थः किंतुविशिष्टपदस्यकर्मक्तांतत्वेधर्मिवा राम
चकत्वमिवभावक्तांतत्वेधर्मवाचकत्वमपि एवंचविशिष्टपदस्योभयवाचकत्वेपि अव्याप्येव्याप्यत्वावगाहिपराम
र्षसंग्रहानुरोधेनप्रत्ययार्थोपस्थित्यापाचकल्पनलाघवेनपक्षधर्मतापदसाहचर्येणचधर्मतात्पर्यकतयेत्यर्थः एवं

चधर्मवाचकविशिष्टपदस्यैवलक्षणातोनिविष्टतयाव्याप्तिवैशिष्ट्यस्यपक्षधर्मत्वरूपपदार्थभेदाद्द्वंद्वोनानुपप
न्नइत्यपास्तंउक्तार्थः अतएवविशिष्टपदस्यधर्मिपरत्वेपिव्याप्तिविशिष्टस्यपक्षधर्मत्वस्यचपदार्थस्यभेदसत्त्वेनद्वंद्वो
पपत्तौदीधितिकारस्यधर्मपरत्वानुसरणंकिमर्थमितिशंकापिनिरस्ता। एतेनविशिष्टपदस्यधर्मपरतयाव्याप्तिवि
शिष्टपक्षधर्मतापदयोर्द्वंद्वानुसरणंदीधितिकृतोव्यर्थंधर्मिपरव्याप्तिविशिष्टपदपक्षधर्मपदयोरेवपदार्थभेदमादा
यद्वंद्वसंभवात्। तथाहि उक्तपुत्राद्द्वेद्वंद्वइतरेतरयोगसमाहारधरकद्वित्वाद्यन्वयसाहित्यसंपादनद्वारापदार्थभेदाभेदा
ननुस्यात्तत्रैरागानत्रत्वस्यपदार्थतावच्छेदकावच्छिन्नेऽपरपदार्थतावच्छेदकावच्छिन्नभेदोनापेक्षितः अन्वययोग्यत्वप्रमा
णाभावात्सहितौक्षात्रगावानयेत्यादौव्यभिचारात्किंतुविशेष्यव्यक्तिभेदमात्रमपेक्षितं। नचैवंघटावित्यादौद्वं
द्वापत्तिः एकशेषेणाबाधात्। अन्यथाविष्णुसिंहावित्यादितात्पर्यकेहरीत्यादौनवापिपदार्थतावच्छेदकावच्छिन्नभे
दसत्त्वात्द्वंद्वापत्तेः नचतत्रैकपदादेवप्रतीतितात्पर्येऽर्थद्वयबोधोपपत्तेःपदद्वयप्रामाण्याभावादेवनद्वंद्वःसक्षणुष्टरितद्वन्यादि
व्युत्पत्तौमानाभावादितिवाच्यं। घटावित्यादावप्येवमेवपरिहारस्यसुवचत्वात्। तथाचप्रकृतेव्याप्तिविशिष्टत्वावच्छिन्नप
क्षधर्मत्वावच्छिन्नभेदाभावेपिव्याप्तिविशिष्टस्यमहानसीयधूमादेःपक्षधर्मस्यद्रव्यत्वादेश्चभेदसत्त्वात्द्वंद्वःसंगच्छत
एव। एवंचप्रमाणप्रमेयेत्यादिसूत्रेसाधर्म्यवैधर्म्याभ्यांतत्त्वज्ञानमित्यत्रनीलघटयोरभेदइत्यादौचस्वरसतएवद्वंद्वः

२

म॰टी॰ संगच्छते प्रमाणत्वावच्छिन्नप्रमेयत्वावच्छिन्नभेदाभावेपि प्रमाणानामिंद्रियादीनां प्रमेयानामात्मादीनां च भेद
सत्वात् साधर्म्यत्वावच्छिन्ने वैधर्म्यत्वावच्छिन्नभेदाभावेपि साधर्म्यान्यवैधर्म्यस्य शब्दानित्यत्वानादेर्वैधर्म्यान्य
साधर्म्यस्य प्रमेयत्वादेः सत्वात् नीलत्वावच्छिन्ने घटत्वावच्छिन्नभेदाभावेपि नीलान्यघटस्य घटान्यनील
स्य च सत्वात् तद्द्वयावच्छेदकत्वयोरैक्यमित्यत्र तु उक्तरीत्यामनुवृत्तस्य लक्षणायाश्शब्दपरतया ऐक्यशब्दस्य
स्वार्थैक्यपरतया यदार्थभेदमादाय द्वंद्व उपपादनीय इति केषांचिद्दूषणोद्धारकं नमापमप्युक्तं। उक्तरूपगत्या ध
र्मपदयोरैक्यपरविशिष्टपदस्यैव लक्षणोन्निविष्टतया तथाहंद्वंद्वानुसरणात्। न च तथापि धर्मपदविशिष्टप
दयरूपधर्मपदयोरेव द्वंद्वः कुतो न कृतः। व्याप्तिविशिष्टस्य रूपधर्मयोः पदार्थयोर्भेदसत्वादिति वाच्यं। तथा सति
हेहंतेष्वप्रमाणाभावप्रैत्यपक्षयोर्भयत्रान्वयेन व्याप्तिविशिष्टत्वपक्षधर्मत्वोभयावगाहित्वलाभेन एतेनोत्पा
द्युक्तरीत्या व्याप्ताय तत्तेः सैव पूर्वोक्तैव उपाध्यापमतोक्तैवेति यावत्। दीधितौ न चैवमिति। एवं नादशार्थकर राम
णो इति ज्ञानजन्ये अनुव्यवसायस्वरूपादौ इदं तु ज्ञाने पक्षधर्मतांशे व्याप्यप्रकारकतया नानुमितिजनकमि
ति भावः अतिप्रसंग इति नादशासहालेवनेनापि आलोकेवह्निव्याप्तिविशिष्टस्य पक्षधर्मत्वस्य विष

यीकरणात्तज्जन्यानुव्यवसायाद्यावत्तिर्व्याप्तिरित्यर्थः न च परेत्त्वित्यादिना वस्मारणाय रूतताजन्यत्वरूपविशे
षणाभावादेव नातिव्याप्तिरिति वाच्यं तथापि यद्रूपताविषयकेतादृशानुव्यवसायेऽतिव्याप्तिः प्रकृतात्वेन पद्रू
ताजन्यत्वोक्तौ च तावन्मात्रस्यैव लक्षणत्वसंभवेनेतरांशवैयर्थ्यापत्तेः एकत्रैकरूपधर्मिणि तदुभयावगाहित्वस्य
व्याप्तिवैशिष्ट्यरूपधर्मत्वावगाहित्वस्यानुक्तत्वान्न विवक्षितत्वात् व्याख्यायां विशेषणीयमिति। अपि शब्देन विशे
षणाभावपरिग्रहः दीधितौ धर्मो वह्निव्याप्य इत्यादितादृशसमूहालंबनस्यापि धूमत्वव्याप्यत्वरूपविभिन्नध
र्मिपुरस्कारेणाधूमरूपैकधर्मिणि एवं तदुभयावगाहित्वात्तज्जन्यानुव्यवसायाद्यावत्तिप्रसंगाद्वीरइति भाव न
च व्याप्तिप्रकारकयत्किंचिद्धर्मताज्ञानमितिसिद्धांतेपि सद्धेतौ तत्र व्याप्तिप्रकारकतावच्छिन्नयद्रूपधर्मताज्ञान
विवक्षितोऽपि तथाविवक्षणान्नसद्धिनिवाच्यं तत्र तादृशार्थस्य शाब्दादेवलाभः अत्र च विशिष्टे तस्य ज्ञानान
न्वयेन तादृशार्थस्य शाब्दतो लाभे संभवत्यनेन विशेषणात्व्यक्तौ भविष्यति वेदसिद्धांतेन तन्वेकधर्मावच्छिन्नतदु
भयावगाहिज्ञानजन्यत्वस्य निवेशनीयतया नोक्तातिप्रसंग इत्यत आह एकरूपेत्यादि तथा चोक्तातिप्रसं
गवारणोपि व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञानयद्रूपधर्मताज्ञानयोरनुमितिकरणत्वकादिर्म। मांसकमते
यानि दूषणानि तान्यत्रागतानीति भावः तान्येव दूषणान्याह व्याख्यायां तथा चेति। ननु व्याप्यतावच्छेदकप्र

कारकव्याप्तिज्ञानपक्षधर्मताज्ञानयोरनुमितितीकारणत्वे न तत्रानुमित्यसंभवान्न तत्र व्याप्तिरतन्त्रमाह धूमत्वेति
।गौरवमिति।लाघवेन व्याप्तिप्रकारकतावच्छिन्नपक्षधर्मताज्ञानत्वेनैव कारणत्वमिति भावः अनन्तेत्यस्य काल
स्य पुरुषस्य वा नेत्यनेत्यादि। नन्वत्र एकधर्मावच्छिन्नतदुभयावगाहिज्ञानजन्यत्वोक्तावपि विवक्षितव्याप्त्यैकधर्मो ध
मो वान्यैर्वेतद्वृत्ति ज्ञानजन्येऽतिप्रसंगसत्त्वेन कथं तमनुसृत्य मीमांसकमतप्रवेशरूपदोषानतोन्द्रावनानन्तेक ध
र्मावच्छिन्नैकविषयतानिरूपिततदुभयनिष्ठविषयताशालिज्ञानजन्यत्वं विवक्षणीयमिति वाच्यं। तथापि वह्नि
व्याप्यधूमवानयं पर्वत इत्यादिपरामर्शजन्येति प्रसंगावारणात्। न च तादृशपरामर्शानन्तरं अनुमितिरेव जायते साम
ग्रीसत्त्वात् न त्वनुव्यवसाय इति वाच्यं। परामर्शसत्त्वेपि बाधादिदशायामनुमितिसामग्र्यसत्त्वेनानुव्यवसायसं
भवात्। न च तथाविधोभयनिष्ठविषयताशालिज्ञानत्वावच्छिन्नकारणताविवक्षणीयेति वाच्यं। नह्यासति यथा
श्रुतेपि तदुभयावगाहित्वावच्छिन्नकारणताविवक्षणे नानतिप्रसंगे तद्वारणाय प्रकृते नैकत्रैत्यादिपूर्वग्रन्थासंगतेः
न च यथाश्रुतेः जनकसाधारणापन्नकारणतावच्छेदकविवक्षणे न संभवति उक्तरूपस्य त्वजनकव्यावृत्तत्वे न त रम०
द्विवक्षणं संभवतीति वाच्यं। व्याप्तिप्रकारकतावच्छिन्नपक्षधर्मताज्ञानत्वापेक्षया गौरवेणोक्तरूपेणाप्य जनक
त्वादिति चेन्न परामर्शानुव्यवसायातिप्रसंगस्यैवतन्मात्रासिद्धान्तेपि शाब्दव्युत्पत्तिलभ्यार्थेनावारणादुभयसा

धारणेपि नात्र दोषस्तथाभावस्याश्रयानात् बाधाद्यनुत्तरत्वविशेषपरामर्शस्यैव परामर्शानुव्यवसायेप्यतिप्रसंगस्य वार
यितुमशक्यत्वाच्च। एतेनात्र मीमांसकमतप्रवेशरूपदोषोद्भावनमुपलक्षणं वह्निव्याप्यो धूमो धूमवान्पर्वत इति ज्ञा
नजन्येप्यतिप्रसंगो द्रष्टव्य इति कस्यचित्कल्पितमपास्तं उक्तरीत्या तत्रानतिप्रसंगात्। यदपि मीमांसकमतेनेति
वह्निव्याप्यो धूमो धूमवान्पर्वत इत्युक्तज्ञानजन्येऽतिव्याप्तिः तत्रानुमितित्वांगीकारे तन्मतप्रवेशस्तन्मते दोषदुष्ट
इति भाव इति। तदपि तुच्छं उक्तरीत्या तत्र व्याप्यभावात्। तत्रानुमितित्वांगीकारेपि बाधकालीनोक्तज्ञानजन्येऽतिव्याप्ते
स्तदुद्धाराच्च। एतेन वह्निव्याप्यो धूमः धूमवान्पर्वत इति ज्ञानान्मीमांसकमतेनुमितिरेव स्वीक्रियत इति तत्प्रत्यक्षे
ऽतिप्रसंगः न वानुमित्यनन्तरोत्पन्नतत्प्रत्यक्षेऽतिप्रसंगः विषयस्य कार्यसहभावेन हेतुतयानुमित्यनंतरं तत्सं
र्गाभावादित्यपास्तं। तावता शक्यत इति मनस्त्वा मीमांसकमतप्रवेशरूपदोषांतरोद्भावनं अत एव पूर्वं तत्प्रत्यक्षे
ऽतिप्रसंग मनुस्त्वा धूमो वह्निव्याप्यो द्रव्यं पर्वत इति ज्ञानप्रत्यक्षानुद्भावने बीजाभावात्। केचित्तु मीमांस
कैरिति मीमांसकैरनुमितित्वेनाभिमते ज्ञाने उक्तलक्षणस्यानुप्रवेशात् गतत्वादित्यर्थः तथा च वह्निव्याप्यवान्पर्वत
इत्यादिपरामर्शजन्यानुमितावव्याप्तेर्जातिगर्भतया वारितोपि वह्निव्याप्यो धूमो धूमवांश्च पर्वत इति समूहालंबना
नुव्यवसायेतिव्याप्तिरिति भाव इत्याहुः तन्न उक्तदूरत्वात्। अन्ये तु एकरूपेणेति स्वनिष्ठप्रकारतानिरूपितविशेष्यता

५

म॰टी॰ निरूपितत्वेनगीयार्थयोऽवगाहित्वान्वयीउक्तौचेतिलक्षणघटककारणतावच्छेदकघटकतयेत्यादितथाचैकरूपनि
ष्प्रकारतानिरूपितविशेष्यतानिरूपिततदुभयविषयताशालिनिश्चयत्वावच्छिन्नकारणताप्रतियोगिकका
र्यताशालित्वमर्थः अन्यथैवमप्यनुव्यवसायाघातित्यापत्तेरित्याहुः मिथ इतीतिएतद्व्यावर्तनञ्चेयमनुव्या
प्तिविशेष्यसंबद्ध धर्मतयोरेकतरांशेऽपरसामानाधिकरण्यावगाहित्वात्तजन्यत्वंचैवरूपेणाव्याप्तिविशेष्यं
धर्मितावच्छेदकीभूतत्वयरूपधर्मत्वावगाहीयद्रूपधर्मत्वेधर्मितावच्छेदकीभूतव्याप्तिविशेष्यावगाहीवायोर्विशि
ष्टपरामर्शस्तयोरेकतरांशेऽपरसामानाधिकरण्यमवगाहते तेन धर्मितावच्छेदकद्वौधर्मितावच्छेदकसामा
नाधिकरण्यस्यप्रकारीभूयप्रकारेभानात्। अतएवव्यापरूपतावच्छेदकसामानाधिकरण्यंसाध्यांशेऽनुमितौ
भासत इतिप्राचीनप्रवादोऽपि अनुमितेर्नियमतोधर्मितावच्छेदकावगाहित्वात्। अतएतज्जन्यतयाऽनुमितौल
क्षणसमन्वयः उपदर्शितज्ञाने चव्याप्तियरूपधर्मतयोर्मिथोविशेषणविशेष्यतावच्छेदकभावविरहेणसामाना
धिकरण्यानवगाहित्वात्तदनुव्यवसायातिप्रसंगः न चामीमांसकमतानुप्रवेशइत्यात आह मिथ इति तत्संभवा राम
दितिलाघवेनव्याप्तिप्रकारतावच्छिन्नयद्रूपधर्मताज्ञानत्वेनैवानुमितिहेतुतस्मात्तिहमिथ्याविरूपकसामानाधिकरण्या
नवगाहिनएकरूपद्वयमितिरीत्यातादृशपरामर्शोदप्यनुमित्युत्पादनतत्राव्याप्तेः यद्वाउपस्थितसामानाधिकरण्य

स्यरूपविषयकत्वेपि तल्लिंगप्रमेमानाभावेन निरूक्तसामानाधिकरण्यानवगाहितज्जन्यानुमितावव्याप्तेरुद्धरत्वादितिभा
वः एतेन तत्तद्रूपसंबंधावगाहित्वविवक्षणान्नोक्तस्थानजन्येऽतिप्रसंगः संबंधघटसामानाधिकरण्यविशिष्टबुद्धौ
संबंधसंबंधावगाहित्वान्न संभवत्यतआह निष्यइति परामर्शाव्यापकत्वादिति संबंधसंबंधावगाहितापाविशिष्ट
बुद्धावप्रामाणिकत्वापाप्यापि वैशिष्ट्याद्यप्रकारकपरामर्शस्य तत्सामानाधिकरण्यानवगाहित्वादिति भावः यद्यप्युभ
यसामानाधिकरण्यावगाहितायाः परामर्शाव्यापकत्वस्य परामर्शेणानियमतइत्यादिनाप्रागेवाभिहितत्वादिदानीमु
क्तशंकानावतरितुमर्हति तथापि एवमुपाध्यायमते भ्रांतानुमित्यव्याप्तेरेव निर्भरस्यरूक्तत्वात्संबंधसंबंधावगा
हित्वाभ्युपगमेन शंकासंभवीवो ध्यइत्यादिकं केपाविन्नत्के शेनग्रंथस्य समर्थनमनादेयं उक्तरीत्याप्रकारांतरेणैव सा
मानाधिकरण्यावगाहितायाइदानीमभिप्रेतत्वेन शंकावतारात् केचित्तु ननु व्याप्तिविशिष्टपक्षधर्मताज्ञानयावच्छे
द्यावच्छेदकभावावगाहित्वविवक्षणान्नोक्तदोषइत्यतआह निष्यइतिउपक्षेपः अवच्छेद्यावच्छेदकभावः पराम
र्शाव्यापकत्वादिति वह्निव्याप्यो धूमः पर्वतवृत्तिरित्यादौ तथात्वेपि पक्षविशेष्यकपरामर्शसंग्रहादित्यर्थः एवंचा
वच्छेद्यावच्छेदकभावावगाहितायाः परामर्शाव्यापकत्वस्य प्रागनभिहितत्वात् शंकावतारः स्वरसतएवसंगच्छ

तद्व्याहुः ननु वह्निसमानाधि॰ पासिद्धान्तेपि जातिघटितलक्षणस्यव्यापकत्वेनात्रापि जातिघटितलक्षणाकरणेनदो
षुक्तदोषः व्याप्यवान्निति परामर्शजन्यानुमितावपि जातिघटितलक्षणासत्वात्। एतेन परामर्शव्यापकत्वादि
त्यनेन व्याप्तिपक्षधर्मत्वाप्रसिद्धिस्थले व्याप्तिरेवैतादृशोपरूपा वीजत्वेनोक्ता इत्यपि प्रत्युक्तं व्याप्तिपक्षधर्म
त्वाप्रसिद्धिस्थलमादाय तत्रापि जातिघटितलक्षणासत्वादिति चेन्न तथाप्युक्तातिप्रसंगवारणायोक्तार्थस्थल
क्षणावाच्यादन्योन्याश्रयदोषस्य दुरुद्धरत्वात्। एतेनैकधर्मावच्छिन्नत्वमनिवेश्यैकयाधर्मिविषयतानिरूपितत
दुभयविषयताशालित्वं वाच्यं। एवं च ज्ञानस्य तावतैव वारणात् न वा व्याप्यवान्निति परामर्शजन्यानुमित्य
व्याप्तिरिति मिश्राशय इत्यपि परास्तं। एकया धर्मिविषयतया तद्घटितोक्तार्थस्थलक्षणावाच्यत्वाभासंभवादि
तिदिक् न चैतादृशोभयविषयकत्वं समानस्थले लब्धं अतिप्रसंगवारणाय तन्नियतधर्मावच्छिन्नकारणताप्रति
योगिकत्वेन कार्यत्वं विशेषितमिति भावः धर्ममादाय लक्षणागमनं तन्माहात्म्येति नियतधर्मः व्याप्यधर्मः प
रामर्शत्वमिति तज्ज्ञानानुगतमननुगतं वोभयथापि न क्षतिः अत्र चोक्तज्ञानजन्यानुव्यवसायविषयत्वेन कारणतामा राम
दायापि प्रसंगवारणाय नियततान्तधर्मविशेषणं तदुभयविषयकत्वावच्छिन्नेत्युक्तावसंभवः। तदुभयविषयकत्वस्या
तिप्रसक्ततया कारणतानवच्छेदकत्वासंभवादतो नियतधर्मेति विषयत्वस्य तदुभयविषयकत्वसमानाधिकरणत्वा

न्तर्थैवातिप्रसंगउत्पत्तौ नियतेति । तद्रुभयविषयकत्वनियतोक्तज्ञानत्वाश्रयतिष्ठविषयत्वावच्छिन्नकारणता
मादाय तत्रैवातिप्रसंगवारणाय कारणतायां तादृशधर्माश्रयवृत्तित्वविशेषणं विहाय तथाविधधर्मावच्छि
न्नप्रतित्वमुक्तं । अनेकवृत्तित्वस्येतितत्वे केभयवृत्तित्वे स्वप्रतियोगिवृत्तित्वस्वसामानाधिकरण्योभयसंबं
धेन भेदविशिष्टत्वमित्यावतत्तात्स्वर्वस्येकत्वेनानेकवृत्तिचस्यदुर्बवत्वभेदस्त्वव्यासज्यवृत्तिधर्मानवच्छि
न्नप्रतियोगिताकोऽग्रस्वः तेन तत्व्यक्तित्वस्य तादृशोभयसंबंधेन सार्वत्रिकव्यासज्यवृत्तिधर्मावच्छिन्नप्रतियो
गिताकभेदविशिष्टत्वेपि न क्षतिः तव्यक्तित्वीयविलक्षणविशेषणानयाः वृत्तित्वंवातत्वतिन्नपूर्वोक्तस्यसं
बंधघटकवृत्तित्वांशे संबंधनिवेशासहत्वयादुर्बवत्वेपि न क्षतिः एकमात्रवृत्तित्वादिति तादृशोभयसंबंधेन भे
दविशिष्टत्वाद्यभावादिति भावः यत्तु परामर्शत्वस्याननुगतत्वे यादृशविषयविशेषेरमकपरामर्शेनोवान्नुमितिर्जा
तात्तत्रतादृशपरामर्शत्वस्यानेकवृत्तित्वाभावादव्याप्तेरसंग० तेन च प्रवृत्तानमादायतत्राप्यनेकवृत्तित्वमिति
वाच्यं । तादृशपरामर्शस्यस्वसमानकत्वेनस्वाप्य संभवात् । किंतु समवायेन वृत्तिमत्त्वं व्याप्तौ निवेशनीयम । अतएव
वोक्तं धर्मेतीति तत्रातादृशविषयविशेषेमानाभीवात् । भावेवाजातिघटितलक्षणस्यावश्यकत्वेन तादृशस्य
ले व्याप्यभावात्कश्चिदिति । अत्र तत्तव्यक्तिविषयकप्रत्यक्षरूपकार्यविशेषस्य तत्तद्विषयनिष्ठत्वनियमा

म.दी. दिनिर्वाह्य विषयस्य तत्तद्व्यक्तित्वेन कारणतावच्छेदकतयोक्तविशेषणावश्यकत्वमस्वरसः तत्तद्व्यक्तित्वेन का
रणतानिरासाय विषयकत्वाभाववदवृत्तित्वरूपनियमस्यैव निवेशनीयमित्यपि वदंति। परं धर्मे तेनेति। नन्व
त्रतदुभयविषयकत्वाभाववदवृत्तित्वरूपनियमस्यैव निवेशनीयतयान्यरूपधर्मत्वांशवैयर्थ्यं व्याप्तिवै
शिष्ट्यविषयकत्वाभाववदवृत्तित्वघटकीभूताभावादुभयविषयकत्वाभावस्य भिन्नतयाऽखंडाभावघ
टकत्वात्। न चात्र विषयिताया विषयभेदेन भिन्नत्वात्तस्याप्रसिद्धं उभयनिरूपितत्वविरहेणाप्रसिद्धिवार
णाय व्याप्तिवैशिष्ट्यविषयित्वाभाववदवृत्तित्वे सति परं धर्मताविषयित्वाभाववदवृत्तित्वरूपनियमस्यैव नि
वेशनीयस्तत्र वाभावघटकतयाऽरूपकवैयर्थ्यं तदुद्धरमिति वाच्यं व्याप्तिवैशिष्ट्यविषयित्वपरं धर्म
ताविषयित्वोभयाभाववदवृत्तित्वस्यैव तत्र निवेशनीयतयाऽप्रसिद्धिनिरासस्याखंडाभावघटकतयाऽसं
भवादिति वेन्न। वैयर्थ्यं यदंशस्यानतिप्रयोजनकत्वार्थकत्वेनोक्तरीत्या वैयर्थ्यपरिहारेऽप्यनतिप्रयोजन
कत्वसत्वेनानुपपत्तिविरहात्। उदनुपलक्षणं कारणतायामुभयविषयकत्वनियतत्वनिवेशेनैवोपप रामं०
त्तौ तन्नियतधर्मावच्छिन्नत्वनिवेशनमफलं एवं नियतत्वांशस्य फलं रूपाव्याप्तादनुपस्थित्यात्तद्विरिक्त
विरहासंभवइत्यपिवोध्यं। नव्यास्तुउभयविषयकत्वविशिष्टस्य निरूपकत्वेन जन्यतायामन्वयो विवक्षि

तदुभयविषयकत्वस्य जनकतावच्छेदकत्वे ऽप्रविष्टत्वलाभान्नानुव्यवसायादावतिव्याप्तिरिति शंक्यं तेनैवे
ज्ञातदुभयविषयकत्वेन द्विशिष्टज्ञानत्वेनावच्छेदकत्वपर्याप्तिनिवेशे संभवः संशयान्यत्वादेरद्वि
कस्यानुमितिजनकतावच्छेदके कुक्षिनिवेशानवकाशपर्यस्य निवेशस्य सूचनाय घटितार्थकं नियतपदं एतेनोभयविष
यकत्वानियतत्वं यद्विशिष्यव्याप्यत्वं तदाव्याप्तिवैशिष्ट्यविषयकत्वपक्षधर्मत्वविषयकत्वोभयाभाववद्वृत्तित्वरू
पायां व्याप्तौ व्याप्तिवैशिष्ट्यविषयकत्वाभाववद्वृत्तित्वाद्घटकस्योभयत्वावच्छिन्नाभावस्य निवेशादग्रिमपक्षध
र्मतांशवैयर्थ्यप्रदर्शनासंगतिः यदि च ज्ञानत्वस्य तदुभयाभाववद्वृत्तितया विशेषणतान्तरविशिष्टज्ञानत्वरूपपरा
मर्शत्वेन तदभावो दुर्घट इति स्वव्यापकतत्त्वरूपव्याप्तिरेव निवेश्यतां येन तु व्यतेन तदास्यप्युभयत्वावच्छिन्नविशेषणता
तया व्यापकताप्रवेशो व्याप्तिवैशिष्ट्यविषयकत्वावच्छिन्नविशेषणतातयात्तदप्रवेशाद्वैयर्थ्यं दुर्वारमेव एवमु
भयविषयकत्वनियतकारणतानिवेशे नाप्युपपत्तेरस्तन्नियतधर्मावच्छिन्नत्वनिवेशनमप्यफलं नियतत्वांश
स्य लक्षणवाक्यादनुपस्थित्यात्तद्घटितलक्षणालाभ एवेति दूषणांपरास्तं एवं च तत्तद्व्यक्तित्वावच्छिन्नकारण
तामादाय प्रकारातिप्रसंगवारणायानेकवृत्तित्वं धर्मेविषपि तद्घटितधर्मावच्छिन्नत्वं वा कारणतायामधिकं निवे
श्यमित्यनुपादेयमेव वैयर्थ्यपदमपि यथाश्रुतमेव संगच्छत इति प्राहुः अत्र वदामः अयं तावद्यावद्व्याप्यव

म.टी.

काज्ञानस्यहेतुतयातत्रातव्याप्तिवारणायानुमितौयत्रयद्धर्मस्ययेनरूपेणकारणतातद्धर्मावच्छेदकत्वपर्याप्ति
निवेशस्यावश्यकत्वान्नियतान्तस्यतद्व्यपरित्यायकतयातत्समभिव्याहारेणतद्रूपपरधर्मपदोपादानान्ने
दंसमेनसंक्रान्तएवकारणतायामनुभवविषयकत्वनियतत्वमुपेक्ष्यतन्नियतधर्मावच्छिन्नत्वंनिवेशितं।एवंमि
श्रेःकारणस्यकार्यतावच्छेदकत्वानुपयोगमेनाव्यवहितोत्तरत्वादेःसंबंधत्वाभावेनचविषयघटितकार्यकारण
भावाभावेनपरामर्शत्वावच्छिन्नसामान्यकारणत्वाभिप्रायकमेवेदंलक्षणंतन्नियतपदस्यघटितार्थकत्वेन
घटतो।एवंनियतपदस्यघटितार्थकत्वेज्ञानानांतत्कर्मधारयपक्षेऽपिपरामर्शधर्मतापदोपादानवैयर्थ्यंदुर्वारंत
त्परूपपुरस्कारेणव्याप्तिप्रकारकत्वघटितधर्मावच्छिन्नजनकतानिरूपितजन्यताश्रयत्वाभावाद्विषयकज्ञा
नत्वस्यतत्तासंभवेनतत्स्वीयसम्बन्धात्रंशेनरभावघटितजन्यताघटितत्वेनपर्वतस्यद्रोमहानसपद
वाच्यरूपाद्युपमितावतिव्याप्तिप्रसक्तेरभावादिति।तद्वारणादिनितत्रापिपर्वतसंयोगस्यस्वरूपधर्मताविष
यकत्वस्यसत्त्वादितिभावःकश्चिदित्यस्वरसोद्भावनंतद्वीजेनतत्त्वद्गुरूकरिप्रावह्निव्याप्यधूमसंयोगमत्पर्वते राम०
संबंधितावच्छेदकवह्निव्याप्तिप्रकारकधूमत्तानत्वेनहेतुत्वात्तत्रातिव्याप्तिरतःपरूपधर्मतापदस्यार्थक्यमिति।
विकासकतयासंग्रहकतयान्यूनत्वेऽपिअस्वरसबीजेषुव्याप्तिज्ञानस्यहेतुज्ञानत्वादिनैवकारणतयाव्याप्ति

ज्ञानत्वेनाकारणत्वात्कारणताद्धयल्लाभासंभव इति साधारणधर्मवद्धर्मिज्ञानस्य संशयहेतुत्वानंगीकारेत्वाह:
वस्तुतस्त्विति न चेति एतदनंतरं तत्रापि वह्निव्याप्यो धूमो नास्तीति पाठ: क्वचित्तत्रापीत्यत्र तथापीति पाठ: क्वचि
द्वह्निव्याप्यो धूमो नास्तीत्यत्र वह्निव्याप्यवान्पर्वतो नास्तीति पाठ: केवलान्वय्यनुमानानभ्युपगन्तृणां मते
साध्याभाववद्वृत्तित्वरूपव्याप्तेस्साध्यसंबंधितावच्छेदकरूपवत्त्वरूपव्याप्तेश्चानतीन्द्रियत्वमत आह निष्ठप्र
मत इति अतीन्द्रियत्वेति सकलधूमाधिकरणसंनिकर्षविरहेण योग्यानुपलब्धिविरहात् धूमाधिकरणवृत्त्य
भावप्रतियोगितावच्छेदकत्वस्यावच्छिन्नाभावलौकिकप्रत्यक्षासंभवेन तद्घटितव्याप्तेरतीन्द्रियत्वमिति भाव: न
न्विनिष्ठप्रमते प्रतियोगितावच्छेदकप्रकारकज्ञानत्वेनाहेतुत्वाल्लौकिकेति प्रसंग: विशेषणतावच्छेदकप्रकार
कज्ञानजन्यत्वापत्तिप्रसंगस्य व्याप्तिविषयकत्वोपादानेपि वह्निव्याप्यवान्पर्वतो नास्तीत्यभावोपनीतभानादौ
दुर्वारत्वादत आह एवमितीति ननु न वह्निमानेतद्धूमादित्यादौ योग्यानुपलब्धिसंभवेन व्याप्तेरतीन्द्रियत्वाभावाद्व
ह्निव्याप्ये तद्धूमो नास्तीत्यभावलौकिकप्रत्यक्षानिति व्याप्तिवारणाय पक्षधर्मत्वविषयकत्वमावश्यकमत आ
ह एवमितीति वह्निव्याप्यवान्पर्वतो नास्तीति पाठे ननु तथापि वह्निव्याप्यैतद्धूमवान्पर्वतो नास्तीत्यभावलौकि
कप्रत्यक्षे इति व्याप्तिरस्पष्टत्यत आह एवमितीति तन्न तद्व्याप्यानतीन्द्रियाभावघटितत्वेन व्याप्तेरतीन्द्रियत्वानपाया

ऽभावमात्रपरत्व इति अखंडव्याप्यप्रसक्त्याः व्याप्तिवारणाय व्याप्तिपदेन तद्घटकीभूताः पदार्था वाच्याः एवं च स
र्वेषामाधारतयैनाभावसाध्यत्वे व्याप्तिपदस्येति भावः अनुमितिमात्र इति अनुमितित्वावच्छिन्नं प्रत्यभावप्रकारकज्ञान
त्वेन हेतुत्वादिति भावः स्थल इति विशेष इति घटाभाववान्पर्वतो नास्तीति प्रत्यक्षादौ अतिव्याप्तिरिति तत्र प्रतियोगि
तावच्छेदकप्रकारकज्ञानादिमुद्रया घटाभावप्रकारकज्ञानत्वादिना हेतुत्वादिति भावः। अव्याप्तिः पक्षधर्मत्वस्य प
भेदेन नानात्वेन एकैकोपादाने ऽस्यानुमितानव्याप्तिः अतिव्याप्तिः धूमवान्पर्वतो नास्तीति प्रत्यक्षादावतिव्याप्तिश्च
उक्तमिति एवं च पक्षधर्मतापदोपादानवैयर्थ्यादित्यस्य पक्षधर्मतापदोपादाने ऽव्याप्तेरिति व्याप्तेश्चेत्यर्थः ध्येयमिति
अगुरयि विशेषोऽध्यवसायक इति भावः न चैवं वैयर्थ्यं पदस्याव्याप्यतिव्याप्तिपरत्वेऽलानक्षणीकत्वापत्तिः किं च व्याप्तिपक्षा
भावमात्रपरत्वे लक्षणाय न्यायथाश्रुतार्थकमेव नतत्तान्यथा च व्याप्तिविषयकत्वोपादानेऽप्यव्याप्तिः व्याप्तेरननुगतत्वात्
यदि च जातिघटितलक्षणाकरणान्नाव्याप्तिस्तदा पक्षधर्मतोपादानेऽपि नाव्याप्तिरन्यथाभ्रान्तवस्तुतस्त्विति विशिष्टवै
शिष्ट्यबोधाराविति मिश्रैर्विशिष्टवैशिष्ट्यविषयत्वानभ्युपगमाद्दार्ढ्यमुक्तं। आदिनावह्निव्याप्येन धूमवान्पर्वतो नास्ती राम०
त्यभावलौकिकप्रत्यक्षपरिग्रहः अथवादिपदेन विशिष्टस्मरणादिनावच्छिपरिग्रहः व्याप्यविषयकत्वेनेति न चैवं सति
तदुभयविषयकत्वेत्यादि विवक्षणप्रयानविशिष्टसएव निरर्थकः स्यात् व्याप्यविषयकत्वविशेषणेनैव पूर्वोक्तानुव्यव

सायविशेषातिप्रसंगवारणादितिवाच्यं।भिन्नविषयकानुमितिसामग्रीकालेव्याप्यस्पर्शमविषयीकृत्यतदुभयावगाहिज्ञानप्रत्यक्षेऽसत्वेविषयवि
धयातदुभयावगाहिज्ञानजन्यानुव्यवसायविशेषेपरामर्शीयज्ञानजन्येवह्न्यादिप्रत्यक्षेचातिप्रसंगवारणायोक्तविवक्षायाआवश्यकत्वात्वह्नि
व्याप्यमित्यादि।नचहेतुनिष्ठपक्षसंबंधविषयकत्वोक्त्यानायंदोषइतिवाच्यंधर्मत्वेनधर्मीयत्वावगाहिविशिष्टवैशिष्ट्यबोधाद्यवारणतात्पर्यात्
त्यादि।अत्रधर्मवत्पर्वतवान्नित्यादिविशिष्टवैशिष्ट्यबोधेधर्मवान्पर्वतोनाग्नीत्याद्यभावप्रत्यक्षेचातिव्याप्तिरूपदोषस्यसत्वेपिस्फुटत्वात्तदुपेक्ष्य
दोषांतरमाहव्याप्यविषयकत्वस्यैवेतिपक्षव्याप्तिपदस्यभावमात्रपरंप्रकारत्वमविवक्षितंतथाचसाक्षात्परंपरयावाऽभावविषयतानिरूपि
तहेतुसंबंधाविषयताश्रयत्वंनिरुक्तपक्षेविषयताश्रयत्वंवातात्पर्यविषयितंतेननोक्ताभावप्रत्यक्षेतिव्याप्तिःपिंडेविशिष्टाविषयतायाअन
भ्युपगमाद्धर्मवत्पर्वतवान्नित्यादिविशिष्टवैशिष्ट्यबोधेनातिव्याप्तिरित्याशयः।केचित्तुपक्षधर्मताविषयकत्वनियतेस्तुक्तावनुमित्यनुव्य
वसायेतिव्याप्तिरितिव्याप्तिविषयकत्वोपादानंकदाचित्तज्ज्ञानादेरित्यादिलिखनात्तज्ज्ञानादिप्रत्यक्षेज्ञानत्वादिनाहेतुत्वस्यस्वविषयपेवस्वीकृ
तत्वेनानुमित्यनुव्यवसायेऽनुमितित्वेनहेतुत्वात्कदाचिदित्युक्तमातादृशहेतुत्वाभावेपिशाब्दबोधंप्रतिआकांक्षाज्ञानस्यजनकतयाऽ
तिप्रसंगवारणायतदुपादानेकर्मणोताविशेष्यकघटप्रकारकान्वयबोधंप्रतिअव्यवहितोत्तरत्वसंबंधेनघटपदवर्तितायाविभक्तिज्ञा
नत्वेनजनकत्वात्तादृशज्ञानत्वस्यैवपक्षधर्मताविषयकत्वनियतत्वादित्याहुः।प्रकारपरमिति।क्वचित्प्रकारकमितिपाठः।विशिष्टपदे

नन्निरूपकतया प्रकारताख्यवैशिष्ट्यस्याश्रयस्य विवक्षितत्वादिति भावः। अत्र तस्यैव व्याप्तिमदित्युपेक्ष्य व्याप्तिविशिष्टेत्युक्तेः। दीधितौ इति
तु स्यादित्यनेन एतत्कल्पस्यापि मिश्रोक्तत्वमुक्तं। व्याख्याणांउक्तरूपेण व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वेन असंभव एवेति इदमुपलक्ष्
णम्। अस्मिन्नुपक्षे यथाश्रुतलक्षणवाक्यार्थेनोक्तातिव्याप्त्यनिरासेऽंदं विह्नपदमिति तु स्यादित्यस्मिन्पक्षे सम्यक्त्वाभिधानस्य संदर्भविरुद्ध
त्वापत्तिरपि बोध्या। विवक्षणे नातिव्याप्तिनिरासस्य इदं पक्षेऽपि संभवात्। पक्षधर्मत्वांशे त्वं यदि पक्षधर्मताश्रयत्वं तदोक्त एव दोषः। अन्यत्र तु
र्वचमतमाह तच्चेत्यादिनेति विशिष्टं एव लरीत्याभासमानं एतदर्थविषयतयोरवच्छेद्यावच्छेदकभावविरहात् वन्हिव्याप्यधूमवान्पर्वत इत्यादौ तु व्या
प्तिप्रकारतावच्छेदकत्वं पर्वतनिरूपितधूमादिप्रकारतायामस्त्येवान्यथोक्तज्ञाने वैलक्षण्यानुपपत्तेरिति भावः। नन्वनुपक्षनिरूपितत्वं प्रकारता
याम् संभवि। किं च यथाश्रुतलक्षणवाक्यार्थे नातिव्याप्त्यनिरास एवावच्छेद्यावच्छेदकभावविवक्षणेऽपि वातिव्याप्तिनिरासादिति संदर्भविरोधोऽपि
र एवेति चेन्न उक्तार्थस्य यथाश्रुतलक्षणादेवलाभात्। तथाहि पक्षधर्मताज्ञानमित्यत्र षष्ठीतत्पुरुषद्वयं। तत्र च षष्ठ्यर्थपदे संबंधित्वगाध
र्मता च प्रकारता। संबंधश्च प्रथमे स्वनिष्ठविशेष्यतानिरूपितहेतुतावच्छेदकसंबंधनिष्ठसांसर्गिकविषयतानिरूपितत्वं। द्वितीये च निरूप
कत्वं। यद्वा धर्मता हेतुतावच्छेदकसंबंधलक्षणार्थे संबंधश्च प्रथमे पक्षनिष्ठविशेष्यतानिरूपितसांसर्गिकविषयत्वं द्वितीये च स्वावच्छिन्न
प्रकारताकत्वं स्वनिष्ठसांसर्गिकविषयतानिरूपितप्रकारताकत्वं रूपं तथा च पक्षधर्मताज्ञानपदेन पक्षनिष्ठविशेष्यतानिरूपि
तहेतुतावच्छेदकसंबंधनिष्ठसांसर्गिकविषयतानिरूपितप्रकारताकं ज्ञानं लभ्यते। एवं तत्प्रकारताकत्वमेवोद्देश्यतावच्छेदकं तद्वत्पक्षेऽदेनोद्दे

शेषज्ञाने व्याप्तिप्रकारकत्वरूपविशेषे विधेयान्वयः उद्देश्यविधेयभावेनान्वयबोधे सति बाधके उद्देश्यतावच्छेदकावच्छेदेन विधेयभानान्नक्षतिरुक्ता
र्थलाभः यत्त्वत्र कर्मधारये व्याप्तिप्रकारकस्यैवाभेदेन ज्ञानेऽन्वयान्नोक्तरीत्यान्वयस्संभवतीति तन्न अभेदेनान्वयेपि व्याप्तिप्रकारकत्वस्य विशे
ष्यान्वयिनान्वयित्वरूपविशेषणत्वे नोक्तरीत्यान्वये बाधकाभावात् । अन्यथा [illegible] व्याप्तिप्रकारके उक्तप्रकारत्वावच्छिन्नत्वस्य सवि
शेषणेहीति न्यायेन व्याप्तिप्रकारकत्वे तदवच्छिन्नत्वपर्यवसानाच्च । केचित्तु पक्षधर्मत्वावच्छिन्नविशेष्यताकत्वावच्छेदेन व्याप्तिप्रकारकत्वं नि
वेशनीयं यत्र च पक्षवृत्तित्वं व्याप्तेर्धर्मितावच्छेदकं तत्रैव तदवच्छिन्नविशेष्यताकत्वावच्छेदेन व्याप्तिप्रकारतावगतेरुक्तसमूहालंबनादौ तथा
त्वाभावान्न तदवच्छिन्नविशेष्यताकत्वावच्छेदेन व्याप्तिप्रकारकतेति नातिप्रसंगः यद्यपीदं ह्रदपक्षेपि व्याप्तिवैशिष्ट्यपक्षधर्मत्वोभयविषय
वैशिष्ट्यतायां एकविषयतानिरूपितत्वनिवेशेनोक्तसमूहालंबनवारणं संभवति तत्र व्याप्तिवैशिष्ट्यविषयतानिरूपकधूमविषयतायाः
पक्षधर्मत्वविषयतानिरूपकधर्मविषयतातोन्यत्वादिति तथापि तन्मते तेनान्यर्थं तत्समुल्लस्य शब्दादलाभः । श्रीनांते न समं कर्मधारय
पक्षे तु निरुक्तार्थस्य शब्दादेव लभ्यते तथा च पक्षधर्मताज्ञानमित्यस्य धर्मपक्षत्वावच्छिन्नविशेष्यताकं ज्ञानमर्थः षष्ठीतत्पुरु
षस्य लेरर्थपदस्य लाक्षणिकतया प्रकृतपक्षधर्मतापदस्य पक्षत्वावच्छिन्नविशेष्यताकत्वसंबंधेन पक्षधर्मतासंबंध्यर्थकत्वात्तादृश
ज्ञाने व्याप्तिप्रकारकत्वस्य च विधेयतयान्वये उद्देश्यतावच्छेदकीभूतपक्षधर्मत्वावच्छिन्नविशेष्यताकत्वावच्छेदेनैव तदन्वयप्रतीति

द्वंद्वसमासपक्षपरित्यागबीजं। इदं तु पक्षवृत्तिर्धूमो वह्निव्याप्य इत्याद्याकारकपक्षधर्मत्वावच्छिन्नविशेष्यताकपरामर्शस्यानुमितिजनकत्वा
भिप्रायेण। वह्निव्याप्यधूमवानयं पर्वत इत्याद्याकारकपक्षविशेष्यकपरामर्शोऽनुमितिजनक इति निष्कृष्टमते तु व्याप्तिविशिष्टहेतुप्रकार
तानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयजन्यत्वं लक्षणं बोध्यमित्याहुः। तदमतं निष्कृष्टमते चरमो लक्षणा
स्य यथाश्रुतलक्षणवाक्याद्लाभात्। एतेन व्याप्तिप्रकारतानिरूपितहेतुनिष्ठविशेष्यत्वाभिन्नायाः पक्षनिष्ठविशेष्यतानिरूपितप्रका
रतातच्छालिनिश्चयजन्यत्वे व्याप्तिप्रकारतानिरूपितहेतुप्रकारतानिरूपितपक्षनिष्ठविशेष्यताशालिनिश्चयजन्यत्वे वा लक्षणा
प्रकारतात्वविशेष्यतात्वयोरविशेषे न वह्निव्याप्यं धूमवान्पर्वत इत्यादिपरामर्शे व्याप्तिप्रकारतानिरूपितधूमादिनिष्ठविशेष्य
तायाः पर्वतादिनिष्ठविशेष्यतानिरूपितप्रकारत्वाभिन्नतयाऽनुमितौ लक्षणसमन्वयः। उक्तसमूहालंबने च प्रकारताविशे
ष्यतयोर्भेदांगीकारेणानतज्ज्ञान्यानुव्यवसायातिव्याप्तिरिति परास्तं। उक्तार्थस्य यथाश्रुतलक्षणवाक्याद्लाभात् तदेतत्सकल
मभिप्रेत्याह ध्येयमिति। नव्यास्तु पक्षे धर्मिधर्मतया हेतुतावच्छेदकसंबंधेन पज्ज्ञानमिति तृतीयासमासगर्भसप्तमीसमासादरात् पक्ष
विशेष्यकत्वावच्छिन्नहेतुतावच्छेदकसंबंधावच्छिन्नप्रकारताकत्वविशिष्टं ज्ञानं पक्षधर्मताज्ञानपदार्थः। पक्षधर्मनयेत्यत
त्र तृतीयायाश्चावच्छिन्नप्रकारतार्थकत्वात् एतादृशविशिष्टज्ञाने व्याप्तिप्रकारकत्वान्वये च हेतुनिष्ठनिरूढप्रकारकत्वावच्छिन्नव्या

प्तिप्रकारकत्ववत्त्वानभ्युपगमः व्याप्तिहेत्वोः साक्षाद्विशेष्यविशेषणभावेन तद्विषयकत्वेऽप्यनुमितिजनकपरामर्शेऽवच्छेद्यावच्छेदक
भावोऽक्षत एवेति सर्वत्रानुमितौ लक्षणसमन्वयः उक्तसम्बन्धावच्छिन्नत्ववत्त्वे च विशेषणत्वरीत्या भासमानपदार्थविषयकत्वे योऽवच्छेद्यावच्छेद
कभावाभावान्न तज्जन्यानुव्यवसायाप्रसङ्ग इत्याहुः तच्चिन्त्यं उक्तरीत्यैवोपपत्तौ गुरुसमासादरानौचित्यात् । तादृशविवक्षणेऽपि
सानां तकर्मधारयत्वस्याप्यविवक्षणेऽपि । वह्निमद्वृत्तित्वेति तथा चान्यार्थं व्याप्तेरप्रसिद्धिरिति भावः इन्धनेत्यादि । नन्वत्र धूमत्वादि
ना घटघटत्वगगनादिधूमसमानाधिकरणेत्यादिव्याप्तिज्ञानजन्यानुमितौ च व्याप्तिसंभवेऽपि इन्धनसमानाधिकरणेत्यादिस्थलानुस
रणप्रयासो व्यर्थ इति चेदत्र केचित् धूमत्वादिना धूमादिविषयताशालिपरामर्शादेवानुमितिः स्वीक्रियते न तु धूमत्वेन घटाघटत्वगगना
दिपरः सर्वादिति तन्न न दोष इति उक्तव्याप्त्यस्यान्तरानुधावनमित्याहुः एतस्योपलक्षणतयोक्तस्थलेऽप्यव्याप्तिर्द्रष्टव्येत्यन्ये वस्तुतस्तु
अत्रैवं व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वं व्यापकीभूततया समवायसम्बन्धावच्छिन्नकारणतानिरूपितप्रतियोगिकप्रमितिविभाजकोप
ध्यवच्छिन्नकार्यताश्रयत्वमित्येतादृशानुमेयलक्षणपरिष्कारे धूमत्वादिना घटाघटत्वगगनादिपरामर्शजन्येनाव्याप्तिः संभवति ॥
अत्रेदं तु मादृशाविवक्षणेऽप्येवं व्याप्तेरप्रसिद्धावव्याप्तिः संभवतीति तथा प्रयासः सार्थक इति ध्येयं । दीधितौ अत्रैवं उक्तविशिष्ट-
व्याप्तिपदार्थाप्रसिद्धेरित्यर्थः नन्वव्याप्तिप्रकारकपदेन साध्यनावच्छेदकव्यापकतावच्छेदकत्वप्रकारकं हेतौ साध्यसामानाधिकर

रापप्रकारकं वाच्यमत आह भ्रमानुमितेरिति । लक्ष्यत्वे चेति चकारेण भ्रमस्य प्रमाणाप्रमाणावादित्व लक्षणेत्यादि । लक्ष्यत्वं स्वचिंतं ।
नन्वव्याप्तिरपि भ्रमात्मकपरामर्शजन्यानुमितावेव इष्टापत्तेश्चेति अव्याप्यतराभिधानिको विशेषणत्यत आह व्याख्यायां यावदिति
। इदं च न समानाधिकरणेत्यादिनेत्यर्थः । भावइति तथा च भ्रमात्मकपरामर्शजन्यत्वाविशेषेपि इदं प्रमानुमितावव्याप्तिरुक्ता
इदं नीलं भ्रमानुमितावित्येव विशेष इति भावः । प्रमेयं वस्त्वादिति व्याप्तियामकसंयोगेन साध्यसंबंधित्वहेतुसंबंधित्वयोः प्रसिद्धि
रिति भावः । व्याप्तिनियामकसंबंधेनेह तु तासाध्यताप्रतिपत्तिमेवाह सत्त्वेति । अत्र च दीधितौ अत्रेति । काशमात्मन इत्याद्युक्तिरस्य
एतत्स्य स्वीयायामिदमाकाशवदित्याकारकानुमितावित्यर्थः । तेन भावसाध्यकस्थलेसाध्यप्रसिद्धेर्नियमतः सत्त्वे न साध्यविशेष्य
कानुमित्यसंभवात् । अत्राकाशमित्याकारिकाया आकाशविशेष्यकानुमितिर्न संभवतीति रूपणान्नवकाशः प्राचीनमतानुसारेणेदं
तन्मते प्रसिद्धसाध्यस्थलेपि साध्यविशेष्यकानुमितिस्वीकारादित्यपि केचित् । अथ नीलं तत्वो द्रव्यं रूपवत्त्वादित्यादौ विशिष्टप
क्षाप्रसिद्ध्याऽव्याप्तिसंभवेन तदनुक्त्या न्यूनत्वमिति चेन्न । आदिपदेन तस्याप्युक्तेर्व्याख्यातृत्वात् यद्वा त्वेत्यस्य पदं त्वेन प्रतीयमाने
नीलं तमसीत्यर्थकत्वेनैकत्वैवोभयाप्रसिद्धिनिबंधनाव्याप्तिरुक्तान्यत्र गत एव सुतरामित्यस्य भ्रमानुमितेरलक्ष्यत्वे व्याप्तिमात्राप्रसि
सिद्धिनिबंधनाव्याप्तिलक्ष्यालक्ष्यत्वे चोभयाप्रसिद्धिनिबंधनाव्याप्तिरित्यर्थकत्वात् । अपरे तु पक्षधर्मतान्नानमितिवदीतत्वु

रूपेतात्पर्यग्राहकेतरसमभिव्याहृततल्लघुत्वपक्षपक्षतावच्छेदकप्रकारतानिरूपितपक्षविशेष्यतानिरूपितहेतुतावच्छेदकसं
बंधनिष्ठसांसर्गिकविषयतानिरूपितप्रकारताशालिज्ञानत्वव्यापकतयानविशिष्टपक्षाप्रसिद्धिर्निबंधनाव्याप्तिरितितदनुक्तौन
न्यूनत्वमित्याहुः व्याख्यायां व्यापकत्वसामानाधिकरण्ययोरिति हेतुव्यापकत्वसाध्यसामानाधिकरण्ययोरित्यर्थः अप्रसिद्धे
तिहेत्वधिकरणसाध्याधिकरणयोरप्रसिद्ध्यातद्घटितयोरनयोरप्यप्रसिद्धिरितिभावः इतिभावइति। एवमपिदर्शितस्थलेहेतुसमा
नाधिकरणाभावप्रतियोगितानवच्छेदकत्वपर्यंतनिवेशनत्वादेप्रसिद्धेएवं तु तादृशप्रतियोगितानवच्छेदकसाध्यतावच्छेदकपर्यं
तस्यतत्त्वाप्रसिद्धिः अत्राकाशमात्मनइत्यादौतुहेत्वधिकरणपर्यंतस्यैवाप्रसिद्धिरित्यप्रसिद्धिरित्यप्रसिद्ध्यानविशेषान्वितरामित्यु
क्तमित्याशयः। केचित्तुनितरामितिलाघवात्साध्यवदन्यावृत्तित्वरूपव्याप्तिज्ञानकारणत्वेप्यव्याप्तिरित्यर्थः एवंहेतुसमानाधिक
रणेत्यादिव्याप्तेरेवप्रवेशेव्याप्तिर्दत्ताअधुनायादृशतादृशव्याप्त्युपादानेप्यव्याप्तिरित्याशयइत्याहुः अव्याप्तिरिति। इदंचजात्यघटि
तयथाश्रुतलक्षणाभिप्रायेणजातिघटितनिष्कृष्टलक्षणस्यप्रकोमारूपपरामर्शजन्यानुमितिवृत्तिजातिमादायसर्वत्रलक्षणस्याप्रस
मन्वयात्। तादृशाधिकरणेतिहेत्वधिकरणेत्यर्थः तादृशाभावेतिहेतुसमानाधिकरणाभावेत्यर्थः इत्यादीति आदिनाअवच्छेद
कत्वेतादृशप्रतियोगित्वप्रकारकमित्यादिपरिग्रहः यद्यप्येवमपि आधिकरणेहेतुमत्त्वाभावोहेत्वधिकरणवृत्तित्वीपक्ष्या

भ.टी

१३

दिक्क्रमेण व्याप्तिघटकतावत्पदार्थानां परस्परोपश्लेषावगाहिसमूहालंबनजन्यानुव्यवसायादावतिव्याप्तिस्तथापि एकविशेष्यतापन्नस्य यत्र
पर्याप्तप्रकारतात्वतन्निष्ठप्रकारताविशेष्यतयोरभेदेन हेतुप्रकारतानिरूपितताया अधिकरणप्रकारतातन्निरूपितताया आधेयत्वप्रका
रता एवं क्रमेण व्याप्तिघटकनिखिलपदार्थप्रकारतानिवेशनीयाः हेत्वादिप्रकारता अपि हेतुतावच्छेदकावच्छिन्नत्वादिनैव निवेशनीयाः
अतो धूमत्वादिना धूलीपटलादिभ्रमसंग्रहः अत्रेदं ध्येयाः हेतुप्रकारतानिरूपितविशेष्यतावच्छिन्नाया अधिकरणप्रकारतातन्निरूपि
तविशेष्यतावच्छिन्नाया वृत्तित्वप्रकारता इत्यादिरीत्या व्याप्तिघटकनिखिलपदार्थप्रकारतानिवेशात्तथाहीति उक्तसमूहालंबनतो
विशिष्टप्रकारकज्ञानस्य वैलक्षण्याघटनं ज्ञानतराभासमानाधिकरणादिपदार्थीयविशेषणतानिरूपितविशेष्यताविशेष्यतानिरू
पितप्रकारतयोरवच्छेद्यावच्छेदकभावोपगमात् दण्डत्वप्रकारत्वं न सम्यक् तथा सति रक्तो दण्डः पुरुष इत्यादिज्ञाने तत्पुरुषादिप्रका
रतानिरूपितदण्डादिविशेष्यताकत्वेन पुरुषाभाववान् दण्ड इत्यादिनिश्चयप्रतिवध्यताप्रसंगात् न च प्रकारतात्वेनाविशेष्यतात्वेन नि
रूप्यनिरूपकभावघटितधर्मस्य बाधप्रतिवध्यतावच्छेदकत्वोपगमे नोक्तदोषोद्धार इति वाच्यं तथा सति गौरवादित्वदंति तद्धि तं भा
न्मतेप्येवं सैत्या एकविषयतानिवेशस्थले सर्वत्रैकपदार्थनिष्ठावच्छेद्यावच्छेदकभावाय विषयताद्वयनिवेशगौरवात् तस्मादुक्तप्रकारः
सम्यगेव अन्यथा चेन्निरुक्तप्रकारताविशेषघटितलक्षणाकरणेपि मूलोक्तयथाश्रुतलक्षणाकाल्पनस्य व्याप्तिपदार्थघटितलक्ष
णास्योपदर्शितस्थले असंगतिरेवेति चेद् न केचित्तु दीधितिकृता रंतत आरभ्य यथाश्रुतशब्दार्थपरित्याग एवारब्धः विवक्षणीयस्य

व्याप्तिप्रकारकपक्षधर्मतानिश्चयत्वावच्छिन्नजनकताकत्वस्य मूलस्थशब्दव्युत्पत्त्यलभ्यतया तत्परित्यागस्यावश्यकत्वात्। न च ज्ञा
नपदस्य लक्षणया निश्चयत्वावच्छिन्नरूपविशेषपरतया निश्चयत्वावच्छिन्नलाभ इति वाच्यं। निश्चयपदेन ज्ञानत्वालाभेपि निश्चयत्वावच्छिन्नज
नकताया अलाभात् यदि च विशिष्टवैशिष्ट्यविवक्षया तादृशनिश्चयत्वविशिष्टनिरूपितजन्यतालाभेन सामंजस्यमित्युच्यते तथापि ज्ञानविशेष्य
तया व्याप्तिप्रकारकत्वादीनामेव लाभे न जनकतावच्छेदकत्वादृशभेदसंबंधेन व्याप्तिप्रकारकादेरेव ज्ञानविशेषणतया मूलोक्तशब्दतो लाभेन
विवक्षणीयालाभादिति वदंति तन्न रूपेण न क्षमं ते लक्षणावाक्यतात्पर्यविषयार्थस्यैव लक्षणतया ज्ञानविशेषणतयैव व्याप्तिप्रकारकत्वादीनामेव ता
त्पर्यविषयतया तदवच्छिन्नजनकताघटितलक्षणस्य कथंचिल्लक्षणया मूलोक्तशब्दतो लाभसंभवात्। न चैवं द्वंद्वसमासादिपक्षोक्तानतिप्र
सक्तेर्विवक्षितार्थस्य तात्पर्यविषयत्वोपगमेन लक्षणया कथंचिन्मूलोक्तशब्दतो लाभसंभवेन तत्पक्षस्यापि सामंजस्यापत्तिरिति वाच्यं न वापि य
थाश्रुतशब्दार्थपरित्यागेन तस्य लक्षणत्वे बाधकाभावात् लक्षणाया आवश्यकत्वात् लाघवेन कर्मधारयस्यैवौचित्यात्। तस्माद्व्याप्तिपदं लक्ष
णया निरुक्तप्रकारताविशेषपरं वैशिष्ट्यं च तन्निरूपकत्वमतो नोपदर्शितस्थले व्याप्तिपदार्थघटितलक्षणासंगतिरिति। तन्नैत्यादि एवकारेण
न्वयव्याप्तेर्व्यवच्छेदः व्याप्तिपदस्यान्वयव्याप्तावेव प्रसिद्धालक्षणो व्यापकसामानाधिकरण्यरूपान्वयव्याप्तेरेव प्रवेश इत्याशयः अनुगतरूपेणो
भयव्याप्तिप्रकारतयोरेवानिवेशाद्व्याप्तिरिति निःसमाधत्ते दीधितौ व्यभिचारेति। व्यभिचारधीविरोधिधीविषयत्वेन व्यभिचारधीत्वावच्छिन्नप्र
तिबंध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूतप्रकारतात्वेन। अन्वयव्यतिरेकव्याप्त्योः अन्वयव्याप्तिव्यतिरेकव्याप्तिप्रकारतयोः एतेन

भ॰टी

वास्तवव्याप्त्योरनुगततयाऽखण्डरूपेणानिवेशो ज्ञानगतएवसम्बन्धात्संचनव्यभिचारधीविषयत्वेनतत्प्रकारकज्ञानजन्येऽतिव्याप्तिः प्रकारितयाव्य
भिचारधीत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकत्वेनद्वयोरनुगमेप्रमेयत्वेनतदुभयप्रकारकप्रमेयवह्निमानितिज्ञानज
न्येतिव्याप्तिः एकत्रप्रमात्मकपरामर्शोत्पत्त्यां वास्तवव्याप्त्यप्रकारकतयातज्जन्यानुमितावव्याप्तिवारणासंभवश्चेतिप्रत्युक्तं। व्याख्याने नविरोधी
तितथाचनोक्तरीत्योभयव्याप्तिप्रकारतयोरनुगमः संभवतीतिभावः। दीधितौ भवतिहीत्यादिरासमाप्तिधूमव्यापकवह्निसामानाधिकरण्यग्रहे
पिव्यभिचारग्रहाद्वह्निसमानाधिकरणसाध्यमत्वग्रहानुत्पादनेन। व्याख्यायां। अतएवाह तस्यापीतियाहाभावतद्व्याप्यावगाहितयाऽविरोधिनोपी
त्यर्थः अन्यायत्वेव अगत्येव अन्वयव्यतिरेकाभ्यां विधानाभ्यामेवेतियावत्। अतिव्याप्तिरिति। अयंभावः। अवच्छेदकत्वं नस्वरूपसंबं
धविशेषः असंभवात् पतीव्यापकताज्ञानभावात्सत्वेपिव्यभिचारज्ञानानुत्पत्त्याव्यापकज्ञानत्वेनैवव्यभिचारज्ञानाविरोधितायाः लाघ
वेनकल्पनात्। व्यापकत्वप्रकारतायाएवस्वरूपसंबंधरूपावच्छेदकत्वंनतुव्यापकसाध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकपर्यंतप्र
कारतायाः गौरवेणतच्छालिज्ञानत्वेनत्वेनप्रतिबंधकत्वाकल्पनात्। नाप्यन्यूनवृत्तित्वंव्यापकत्वापरनामकंतादृशान्यतरव्या
प्तिप्रकारताशालिज्ञानेतत्प्रतिबंधकत्वसत्वेनकस्याअपिप्रकारतायास्तथात्वाभावेनासंभवात्। किंत्वनतिरिक्तवृत्तित्वंनादृशप्रति
बंधकताश्रयज्ञानावृत्तित्वरूपंतच्चहेतुव्यापकसाध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकप्रकारतायातिचस्वव्यापकसाध्यसामाना
धिकरण्याश्रयधूमसामानाधिकरण्यादिप्रकारतायामप्यक्षतमेवनादृशप्रकारताशालिनिखिलज्ञानानामपिधूमोवह्निव्यभिचारी

त्ति व्यभिचारज्ञानप्रतिबंधकत्वादिति धूमव्यापकवन्हिसमानाधिकरणधूमसमानाधिकरणत्वासंभवान् पर्वतइत्यादिज्ञानजन्यप्रत्यक्षेऽतिव्याप्तिरि
तिऽनुक्तरूपेति पाठः व्यभिचारधीत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूतप्रकारताकपक्षधर्मतानिरूपकत्वेनेत्यर्थः तृतीयार्थेव
च्छिन्नत्वं ऽउक्तरूपस्येति पाठेपि अवच्छिन्नत्वरूपसंबंधएव षष्ठ्यर्थः जनकतानवच्छेदकत्वात् ऽउक्तज्ञानादनुमित्यापत्त्या तत्साधारणोक्तरूपस्यज
नकतावच्छेदकत्वासंभवात् दीधितौ तथाविधधूमसमानाधिकरणत्वादिकंत्विति। रासभादिविशेष्यतानिरूपितधूमव्यापकवन्हिसमानाधिक
रणधूमसमानाधिकरणत्वादिप्रकारकत्वंत्वित्यर्थः धूमव्यापकवन्हिसमानाधिकरणधूमत्वस्यव्याप्तिरूपत्वेन तत्प्रकारतोपात्तिज्ञानादनुमि
तिरेवोत्पद्यत इत्यतस्तत्प्रकारत्वपरित्यागः आदिनाधूमव्यापकवन्हिसामानाधिकरण्यादिप्रकारत्वपरिग्रहः ननु उक्तज्ञानस्यापिधूमादिवि
शेष्यकव्यभिचारधीविरोधित्वमस्त्येव रासभादिविशेष्यकव्यभिचारधीविरोधित्वंच नव्याप्तिज्ञानस्यापीत्यत आह व्याख्यायांपक्षधर्मतांशेइति। पक्ष
धर्मतपाज्ञान इत्यर्थः पक्षनिरूपितप्रकारताश्रय इतियावत् सप्तम्यर्थो विशेष्यकत्वं व्यभिचारधियामन्वेति व्यभिचारधीविरोधिधीविषयः व्यभि
चारधीत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकं रासभादावितीतिरूपं च दीधितौ नच हेपि तादृशप्रकारताशालिज्ञानसत्वेपि रासभा
दौ रासभत्वाद्यवच्छिन्ने पक्षधर्मतया ज्ञाते व्यभिचारग्रहस्यादित्यर्थः नन्वेवमपि तादृशरासभवान् धूमवांश्च पर्वत इति समूहालंबनजन्यप्रत्यक्षे
तिव्याप्तिरस्त्येव तादृशसमूहालंबने धूमस्यापि पक्षधर्मतयाभावात्तत्र नच पक्षधर्मत्वशायद्यत्राय तेन देशे व्यभिचारधीविरोधित्वं विवक्षितमि
तिवाच्यम्। वन्हिव्याप्यधूमवान् रासभवांश्च पर्वत इति समूहालंबनपरामर्शसंग्रहाद तआह तद्विशिष्टेत्यादि पक्षनिरूपितत्वद्धर्मावच्छिन्नप्रका

रतावच्छिन्नायां तद्धर्मावच्छिन्नविशेष्यकव्यभिचारधीत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूतप्रकारतातच्छालिज्ञानजन्यत्वमि
त्यर्थः पर्वताग्रे तेजस्तु समनूतालंबनाचारतात् । पक्षनिरूपितप्रकारतावच्छिन्नायां स्वनिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यताकव्यभिचारधीत्वा
वच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूतप्रकारतानतच्छालिज्ञानजन्यत्वमिति तु सम्यक् तत्तद्व्यक्तित्वेनानंतधर्मानिवेशात् अ
परितु तद्धर्मावच्छिन्नविशेष्यकव्यभिचारधीत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूतप्रकारतानिरूपितायां तद्धर्मावच्छिन्नविष
यतातन्निरूपितपक्षनिष्ठविषयताशालिज्ञानजन्यत्वमर्थः स्वनिरूपितविशेष्यतावच्छेदकावच्छिन्नविशेष्यताकव्यभिचारज्ञानत्वावच्छि
न्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदकीभूतायां प्रकारतातन्निरूपितहेतुविषयतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताकज्ञा
नजन्यत्वमिति तु परमार्थः तेन नतत्तद्व्यक्तित्वेनानंतधर्मनिवेशप्रयुक्तदोषावकाशः इत्याहुः पूर्वोक्तातिप्रसंगमुद्धरति उक्तानंतित्यादिना
नन्वित्यादि । अत्र व्याप्तेरित्यस्य व्याप्तिप्रकारत्वस्येत्यर्थः विरोधित्वमित्यस्य विरोधितावच्छेदकत्वमित्यर्थः । एवमग्रेपि मानाभाव इति ग्राह्याभा
वायेन व्यग्राहित्वात् इति भावः न च ग्राह्याभाववत्त्वग्राहित्वेपि अन्वयव्यतिरेकानुविधानवशात् मणिमंत्रादिन्यायेन प्रतिबंधकत्वमुक्तमे
वेति वाच्यं अन्वयव्यतिरेकानुविधानस्यैवासिद्धेः केवलकथेति । अथ माशापः । वन्हौ धूमत्वावच्छिन्नव्यापकताग्रहे कदाचित्तुल्यवित्तिवेद्यत
या धूमत्वावच्छिन्ने वन्ह्यभावसामानाधिकरण्यग्रहे न्वयव्याप्तिप्रकारत्वस्योक्तरूपव्यभिचारधीप्रतिबंधकतावच्छेदकत्वसंभवद्युक्तिकं । व्य
तिरेकव्याप्तिस्थले तु नैवं हेत्वभावे साध्याभावव्यापकताग्रहे कदाचित्तुल्यवित्तिवेद्यतया हेत्वभावप्रतियोगिकाभावत्वेन हेतौ साध्याभा

वासामानाधिकरण्यग्रहेऽपि हेतुतावच्छेदकरूपेण हेतौ साध्याभावसामानाधिकरण्यग्रहे बाधकाभावात् हेत्वभावाभावत्वेन एतद्विषयकव्यभिचार
धीविरोधित्वे कोऽप्यन्वयव्याप्तिप्रकारत्वासंग्रहः हेत्वभावाभावत्वेन हेतुविषयकसाध्याभावसामानाधिकरण्यग्रहे तेन व्यभिचारस्यैव हेतुवि
षयकसाध्याभावसामानाधिकरण्यग्रहस्य विरोधित्वादिति वाच्यमिति। उक्तसमूहालंबने व्यभिचारज्ञाने चोभयविधव्याप्तिज्ञानस्यैव ग्राह्या
भावावगाहितया विरोधित्वेन नानुपपत्तिरिति भावः। सामानाधिकरण्यविषयतयेति। अपि वानुमित्यजनकत्वे हेतुः। उक्तरूपस्येत्यादि। त
था चोक्तज्ञानजन्यप्रत्यक्षेऽतिव्याप्तिः। उक्तज्ञानीयधूमव्यापकवह्निकालीनत्वप्रकारतायां निरुक्तप्रतिबंधकतावच्छेदकत्वादिति भावः। इष्टमुप
लक्षणं धूमव्यापकवह्निसमानाधिकरणधूमसामानाधिकरण्यधूमवान्पर्वतः धूमव्यापकवह्निसमानाधिकरणधूमसमानाधिकर
णधूमवान्पर्वत इत्यादिजन्यप्रतिव्याप्तिर्द्रष्टव्या। तादृशज्ञानीयतथाविधसामानाधिकरण्यादिप्रकारतायामपि निरुक्तप्रतिबंधकताव
च्छेदकत्वात्। न चैतत्स्वसामानाधिकरण्यविषयकतयानुमितिजनकत्वमेवात एवोक्तसामानाधिकरण्यविषयकतयाऽनुमित्यजनकतयेती
ति वाच्यं। तस्य व्याप्तिविषयतानिरूपितहेतुविषयतानिरूपितपक्षविषयताकत्वविरहेणानुमितिजनकत्वासंभवात्। प्रत्येकरूपेणैवेति एवं
च प्रत्येकरूपावच्छिन्नजनकतायां निवेशोऽपररूपावच्छिन्नजन्यानुमितावव्याप्तिरुक्तैवेति भावः। दीधितौ अन्याश्रयणादिति। मणिकृताव्य
तिरेकिग्रंथे उच्यत इत्यादिनाऽऽचार्यमतस्याश्रयणादित्यर्थः। यद्यप्येतन्मतं न विचारसहमित्युपेक्ष्य मणिकृता व्यतिरेकव्याप्तेरनुमित्यौपयि
कत्वं व्यवस्थापितं तथापि जातिघटितलक्षणादरेणाननुगमनिबंधनाव्याप्तेः परिहरणीयतयाऽऽपाततस्तन्मतावलंबनेन समाहितं॥

कस्यचिन्मतमाह व्याख्यायां नन्वित्यादिना कश्चिदित्यंतेन। अन्वयव्यतिरेकानुविधानमेव मानमत आह क्वाचित्केनेति तादृशेनेति॥ ग्राह्याभाव
वगाहित्वया साध्याभाववद्वृत्तित्वादिरूपव्यभिचारज्ञानप्रतिबंधके साध्याभाववद्वृत्तित्वादिरूपाव्यभिचारज्ञानसंग्राहकेनयेत्यर्थः एतन्मते
ऽन्वयव्यतिरेकानुविधानस्य प्रामाणिकत्वमंगीकृत्य तस्यान्यथोपपादनं स्वमते तु तस्य प्रामाणिकत्वमेवासिद्धमिति नाविरोधः कश्चिदित्य
त्रेदं बीजं तु अन्वयव्यतिरेकानुविधानस्य प्रामाण्यासिद्धत्वेन तद्देवमणिमंचादिन्यायेन विरोधित्वेमानं ज्ञानांतरकल्पने गौरवादिति केचि
त्तु। विशेषणज्ञानजन्यज्ञानादवच्छिन्न व्याप्तिवारणाय व्यभिचारज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतायामनतिरिक्तवृत्ति
त्वरूपावच्छेदकत्वविशिष्टविषयतानिरूपितहेतुविषयतानिरूपितपक्षविषयताशालिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यता
श्रयत्वमिति लक्षणकरणे अनुमितिं प्रति तादृशविषयताशालिज्ञानत्वेन हेतुत्वं स्वीकरणीयं अन्यथा ऽसंभवापत्तेः। तथा च धूमव्या
पकवन्हिसमानाधिकरणधूमसमानाधिकरणरासभवान्पर्वत इति ज्ञानादप्यनुमित्यापत्तिरतः स्वनिरूपितविशेष्यतावच्छेदकीभूत
धर्मावच्छिन्नविशेष्यताकव्यभिचारज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदिकाया विषयतायास्तन्निरूपितहेतुवि
षयतानिरूपितपक्षविषयताशालिज्ञानत्वावच्छिन्नकारणताप्रतियोगिककार्यताश्रयत्वमिति लक्षणं कर्तव्यं अनुमितिं प्रति जनकतापि
तादृशरूपेणैव स्वीकरणीया तथा च न तादृशज्ञानादनुमित्यापत्तिरित्याशयेन तादृशज्ञानादनुमित्यापत्तिमुद्धरति तथाविधेति। रासभव्या
वच्छिन्नविशेष्यतानिरूपितधूमव्यापकवन्हिसमानाधिकरणधूमसमानाधिकरणत्वादिविषयतेत्यर्थः न तथा न स्वनिरूपितविशेष्य

तावच्छेदकीभूतधर्मावच्छिन्नविशिष्यताकव्यभिचारज्ञानत्वावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकतावच्छेदिका न तु रासभादिविशे
ष्यकव्यभिचारज्ञानेपि तादृशज्ञानस्य कुतो न प्रतिबंधकत्वमत आह रासभादाविति। तथा च फलबलान्न तादृशज्ञानस्य प्रतिबंधकत्वमिति
भावः। एवं च तादृशप्रतिबंधकतावच्छेदकविषयतानिरूपितहेतुविषयतानिरूपितपक्षविषयताशालित्वाभावेन तादृशज्ञानादनुमित्या
पत्त्यभावादीदृशलक्षणाकरणेन कोपि दोषः शेषं दर्शितदिशावसेयमित्याहुः। अन्ये तु। ननु वह्नित्वाद्यवच्छिन्नधर्मिकधूमत्वाद्यवच्छिन्नव्याप
कताग्रहत्वेनैव धूमो वह्निव्यभिचारी त्यादिव्यभिचारज्ञानप्रतिबंधकताभावात् आवश्यकत्वाच्च। ननु धूमव्यापकवह्निसमानाधिकरणधूम
त्वादिरूपव्याप्तिज्ञानत्वेन गौरवान्मानाभावाच्च। तथा च तादृशव्याप्तिविषयतायां तद्व्यभिचारधीप्रतिबंधकतावच्छेदकत्वं। अथ तादृशव्या
प्तिज्ञाने व्यभिचारज्ञानानुदयात्समानधर्मिकव्यभिचारज्ञाने प्रति तादृशव्याप्तिज्ञानत्वेनापि मणिमंत्रादिवत् पृथक् प्रतिबंधकतावाच्या
एवं च तादृशव्याप्तिविषयतायां व्यभिचारधीप्रतिबंधकतावच्छेदकत्वमक्षतमेवेति चेत् तर्हि धूमव्यापकवह्निसमानाधिकरणधूमसमा
नाधिकरणत्वादिविषयत्वेन हि किमपराद्धं। दर्शितव्याप्तिज्ञानवत् तद्घटितधर्मांतरविषयकज्ञानानामपि व्यभिचारधीविरोधित्वावि
शेषात्। किमपराद्धं वा धूमत्वाद्यसहिते न धूमव्यापकवह्निसमानाधिकरणत्वादिना न च तत्तद्विषयतायामपि व्यभिचारधीविरोधिता
वच्छेदकत्वोपगमे को दोष इति वाच्यं। तथा सति हि धूमव्यापकवह्निसमानाधिकरणधूमसमानाधिकरणरासभवान्पर्वतः धूमव्यापकव
ह्निसमानाधिकरणरासभवान्पर्वत इत्यादिज्ञानजन्येऽतिप्रसंगादित्याशंक्य मणिमंत्रादिन्यायेन प्रतिबंधकत्वांतरकल्पनमप्यनुभवा

नुरोधेनैव धूमव्यापकवह्निसमानाधिकरणधूमत्वादिरूपव्याप्यत्वग्रहे तद्धर्मितावच्छेदकावच्छिन्नव्यभिचारधीर्नोत्पद्यते इति निर्विवा
दानुभवात्तद्ग्रहस्य समानधर्मितावच्छेदकव्यभिचारधीप्रतिबंधकत्वावश्यकं। वह्निव्याप्यधूमसमानाधिकरणो रासभ इत्यादिज्ञानदशायां
च रासभादौ व्यभिचारग्रहस्यैवानुभवान्न तथाविधधूमसामानाधिकरण्यज्ञानत्वेनापि प्रतिबंधकत्वं तत्तद्धर्मिविशेषमादाय भवति हि। त्या
दिना रासभादौ तद्ग्रहेऽपि व्यभिचारग्रहादित्यपि तेन। ननु वह्न्यादौ धूमत्वाद्यवच्छिन्नव्यापकताग्रहदशायां धूमत्वाद्यवच्छेदेन व्यभिचार
स्यापि संग्रहः तथा धूमव्यापकवह्निसमानाधिकरणधूमत्वादिग्रहविषयेऽवच्छेदकधर्मदर्शने तत्प्रतिबंधकवशादेव तद्व्यभिचारग्रह इति
नतादशाधूमत्वादिग्रहविषयतया व्यभिचारग्रहप्रतिबंधकतावच्छेदकत्वमिति नोक्तोऽनुगमः साधीयानत आह व्यतिरेकसहचारेति। तीत्या
दः दीधितौ भ्रमसंशयेति। न च तद्दिंद्रियजन्यभ्रमात्मकबाधबुद्ध्युत्तरं सत्यपि विशेषदर्शने कथं विशिष्टबुद्धिः प्रतिबंधकबाधबुद्धेः सत्वा
त्। भिन्नेंद्रियजभ्रमात्मकबुद्ध्युत्तरं तु विशिष्टबुद्ध्युत्पत्तौ न विशेषदर्शनापेक्षा तस्याप्रतिबंधकत्वादेव तदुत्पत्तिसंभवादिति वाच्यं। बाधप्र
तिबध्यतावच्छेदके इच्छाजन्यान्यत्वादिवद्विशेषदर्शनजन्यान्यत्वस्यापि निवेशे तेंद्रियजबाधबुद्ध्युत्तरमपि विशिष्टबुद्ध्युत्पत्तिसंभवे इत्या
शयात् भ्रमसंशयेत्यत्र च भ्रमत्वमविवक्षितं विपरीतनिर्णयमात्रं बोध्यं प्रमात्मकबाधबुद्ध्यनंतरमपि भ्रमात्मकविशेषदर्शने सति भ्र
मात्मकविशिष्टबुद्ध्युत्पत्तौ बाधकाभावात्। न च तथापि संशयोत्तरविशेषदर्शनादनुमितेरेवोत्पत्तिर्न तु प्रत्यक्षस्येति वाच्यं समा
नविषये लौकिकप्रत्यक्षसामग्र्या बलवत्वात्। ननु भ्रमसंशययोरनुगमकरूपाभावे नभ्रमोत्तरप्रत्यक्षे संशयोत्तरप्रत्यक्षे

वविशेषदर्शनस्यकारणताकल्पने गौरवमत आह। व्याख्यायां अत्रेत्यादि। व्यावर्त्तकमात्रमिति ग्राह्येत्यादिः व्यावर्त्तकत्वं। विरु
रुद्धत्वेन गृह्यमाणत्वं मात्रपदयावदर्थकं। नेनेति। अन्यथा विपरीतपदस्य व्यतिरेकार्थकत्वे स्थाणुत्वभ्रमोत्तरस्य पुरुषत्वप्रत्यक्ष
स्यासंग्रहापत्तेरित्याशयः। नादर्शेति। व्यावर्त्तकरूपेत्यर्थः। तत्तद्धर्मीति। तथा चेत्तथाग्रे व्यक्तं। नस्थाणुरिति संबंधानुगमस्यादोष
त्वादिति भावः। कार्यतावच्छेदके निर्णयत्वनिवेशप्रयोजनमाह। नवेति। तत्संशये। विपरीतस्थाणोनोजरसंशये। अत्र प्रत्यक्षत्वनि
वेशान्नयोग्यतासंशयोत्तरशाब्दबोधे व्यभिचारः दीधितौ विशेषदर्शनस्येति। ग्राह्यव्यावर्त्तकव्यावर्त्तकव्याप्यवत्ताज्ञानस्येत्यर्थः। एतेना
न विशेषदर्शनं यदि ग्राह्यव्याप्यवत्ताज्ञानं तदा स्थाणुत्वभ्रमोत्तरोत्पन्नस्थाणुत्वाभावव्याप्यवत्ताज्ञानजन्यपुरुषत्वप्रत्यक्षे व्यभिचा
रः। यदि च ग्राह्यव्यावर्त्तकव्यतिरेकव्याप्यवत्ताज्ञानं तदा स्थाणुत्वभ्रमोत्तरोत्पन्नपुरुषत्वव्याप्यवत्ताज्ञानजन्यपुरुषत्वप्रत्यक्षे व्यभि
चार इति निरस्तं। हेतुतामत इत्यनेन सूचितमस्वरसमाह व्याख्यायां उपाध्यायमत इत्यादिना। अभिसंधायेत्यंतेन। तन्निर्णयप्रती
ति। संशयोत्तरसंशये व्यभिचारवारणाय तन्निर्णयत्वनिवेशः तदभावज्ञानत्वेनैवेति। संशयसाधारणतदभावज्ञानत्वमात्रेण नतु
तदभावनिर्णयत्वेनेत्यर्थः। उत्तेजकत्वमिति। विशेषदर्शनस्य न्यकाले नायं पुरुष इति भ्रमोत्तरं अयं पुरुषो न वेति संशयानंतरं चायं
पुरुष इत्यादिप्रत्यक्षनिर्णयवारणाय मिश्रैर्विशेषदर्शनकारणत्वमंगीक्रियते। तच्च तदुत्तेजकत्वेनैवोपपन्नमिति न विशेषद

र्शनकारणत्वमतिरिक्तकारणत्वे गौरवात्। न चाप्रामाण्यनिर्णयाभावादिभिस्समं विशेषदर्शनाद्यभावादीनां विशेष्यविशेषणाभा
वे विनिगमनाविरहेण कार्यकारणभावभेदस्यावश्यकत्व इति वाच्यं। तादृशाभावकूटविशिष्टविपरीतज्ञानाभावस्यैवंरूपस्य तद्व्यक्ति
त्वेनैव हेतुतया विनिगमनाविरहेण कार्यकारणभावभेदासंभवात्। एवं जनकाग्रहेति गोत्वादिरूपं जनकतावच्छेदकत्वोपग्रहेत्यर्थः। तन्नि
र्णये इति। एतत्पूर्वं व्यञ्जकग्रहालोकसमवधाने सतीत्यग्रे च व्यभिचारवारणायेति प्रकरणीयं तेन नान्वयः एवमिति। तन्निर्णयप्रमा वैतद
भाववत्ताज्ञानत्वेन विरोधित्वे इत्यर्थः। पक्षेत्यादि न च बाधनिश्चयकालीनपरामर्शमादायैवानुमित्यापत्तिसंभवे स्यात्तद्विशेषणानुधानवैय
र्थ्यमिति वाच्यं। विशेषदर्शनस्य तत्तद्व्यक्तित्वेनोत्तेजकत्वे उक्तोपपत्त्यसंभवात्। अत्र वक्ष्यमाणपरामर्शव्यक्तेरुत्तेजकत्वापविरो
धिस्तत्संशयात्मकतदभाववत्ताज्ञानानुधावनं निश्चयात्मकतदभाववत्ताज्ञानेऽनुमितेरनुत्पत्त्या तस्यानोत्तेजकत्वमतः संशयत्वपर्यंत
अनुमितिसामग्रीमाह। वह्निव्याप्येत्यादि। एतत्परामर्शजन्यानुमित्याः सिद्धिसत्त्वे न पक्षताविरहादेव न पुनरनुमित्यापत्तिर
तः सिद्धावप्रामाण्यग्रहार्थं भावीत्यादि अपेक्षाबुद्ध्यात्मकपरामर्शस्य बाधनिश्चयोत्पत्तिकालेनाशेन परामर्शाभावादेव न
पुनरनुमित्यापत्तिरत उक्तमपेक्षाबुद्ध्यात्मकश्चेति॥ परामर्शस्य चाक्षुषत्वे सम्भवात् एवं नात्मकत्वानुपपत्तिरत आह मानसत्वे
ति। अनुमितेरेवानुत्पत्तेः परामर्शस्यानोत्तेजकत्वमत आहेति। अनुमित्यात्मकसिद्धावप्रामाण्यग्रहसत्त्वेन पुनरनुमि

त्यापत्ताविष्टापत्तिरत आह तत्तद्व्यक्तिलौकिकप्रत्यक्षमिति एतेन परामर्शस्य तदभावव्याप्यवत्ताज्ञानरूपस्य प्रतिबंधकस्य सत्वात्
यंपर्वतो वह्न्यभाववानिति प्रत्यक्षमिति प्रत्युक्तं। न चात्र वह्न्यभावप्रत्यक्षोत्पत्तिसमय एव कथं नानुमितिः भिन्ने विषये अनुमितिसा
मग्र्या बलवत्वादिति वाच्यं। बाधसामग्र्या मुद्रयानुमितिप्रतिबंधिका यावद्वह्न्यभाववल्लौकिकप्रत्यक्षसामग्र्याः सत्वे न प्रतिबंधका
भावाघटितया अनुमितिसामग्र्या एवाभावात्। अनुमित्यापत्तिरिति। एवं चानुमित्युत्पत्त्यनुरोधेनावश्यमेतत्परामर्शव्यक्तेः स्वघ
टित्वेनोत्तेजकत्वं वाच्यं। तथा चोत्तेजकविरहविशिष्टतदभावज्ञानाभावादनुमित्यात्मकतन्निर्णयापत्तिरिति भावः। अंधकार
स्थिति आलोकासमवधानसंपत्त्यर्थमिदं घटसंशयेति आलोकासमवधानप्रयुक्तघटसंशयेत्यर्थः घटनिर्णयसामग्रीमाह आलो
केति। घटनिर्णयानुत्पत्तावालोकसमवधानस्य नोत्तेजकत्वमत आह घटनिर्णयेति। संशयांतराभावे घटनिश्चयापत्ताविष्टापत्ति
रत आह पुनरिति आलोकसमवधानेन तदभावप्रयुक्तसंशयांतरासंभवादाह विशेषेति विशेषदर्शनसत्वे घटनिश्चयस्य एवेत्यतो
विनैवेति। एवं जनकस्य एवोत्पत्तघटनिर्णयानुरोधेनावश्यकल्पनीयोत्तेजकतावकस्य तत्तत्कालेति। तत्तद्दुष्टग्लोत्यर्थः
अन्यथा स्थूलकालमादायोक्तदोषावारणात्। नन्वेवं तदभावनिश्चयोत्तरं तत्संशयापत्तिः एवं योग्यतासंशयकालीनशाब्द
बोधे व्यभिचारवारणाय यद्यादृशान्यनिर्णयत्वस्य प्रतिबध्यतावच्छेदकत्वावश्यकत्वेन तदभावनिश्चयोत्तरं शाब्दबोधापत्तिरतः

१९

प्रत्यक्षनिर्णयान्यविशिष्टबुद्धित्वावच्छिन्नंप्रतिबाधनिश्चयस्यपृथक्प्रतिबंधकत्वमावश्यकंप्रत्यक्षनिर्णयान्यत्वनिवेशात्भ्रमोत्तरं
विशेषदर्शनबलात्प्रत्यक्षेनिर्णयोपपत्तिः तथाचोक्तस्थलेबाधनिश्चयस्यसत्वेनपुनरनुमित्यापत्त्यभावाद्विशेषदर्शनेतत्कालावच्छि
न्नत्वंनदेयमित्याशयेनाहबाधनिश्चयस्येति।स्वातंत्र्येण·विरोधितायांत्विति।तुशब्दोपिस्वरसत्सूचनायसत्त्वबाधनिश्चयस्यपृथक्प्र
तिबंधकत्वेमानाभावः तद्विशिष्टबुद्धित्वावच्छिन्नंप्रत्यक्षोक्तरीत्याविपरीतज्ञानाभावत्वेनहेतुतयाबाधनिश्चयोत्तरंसंशयापादापत्त्यभा
वात्।नचसंशयोत्तरसंशयेव्यभिचारः तत्कालीनसंशयजनकतत्तत्कोट्युपस्थितेरुत्तेजकत्वात्।एवंयोग्यतासंशयकालीनशाब्दबोधज
नकतत्तत्पदार्थोपस्थितेरप्युत्तेजकतयातत्रव्यभिचाराभावेनशाब्दान्यत्वानिवेशात्नबाधनिश्चयोत्तरंशाब्दबोधापत्तिरिति।विशेषदर्श
इति।आलोकसमवधानेतुदेयमेवान्यथोक्तदोषावारणादितिभावः।अपरेतुबाधनिश्चयस्यस्वातंत्र्येणविरोधित्वेपिविशेषदर्शनेतत्का
लावच्छिन्नत्वंनदेयं।अपेक्षाबुद्ध्यात्मकपरामर्शेमीमांवादिन्याहुः नन्वयाप्याप्यमतंनसम्यक्।अभावस्यनतत्तद्व्यक्तित्वेनहेतुतायाःसिद्धांत
विरुद्धत्वात्।तथात्वेयातादृशविपरीतज्ञानघटान्यतरत्वावच्छिन्नाभावादीनामपितत्तद्व्यक्तित्वेनहेतुतामादायविनिगमनाविरहेणका
र्यकारणभावग्रहापत्तिरित्युक्तापत्तिवारणायमिश्रोक्तविशेषदर्शनेहेतुत्वस्यैवोचितत्वादित्यपरितोषाहस्वमतमाहुरिति।संशयोत्तरेति।उत्त
कोटितावच्छेदकोपलक्षणं।तेननोक्तदोषः।नवार्थांतरं नहेतुत्वेनविशेषदर्शनत्वेनहेतुत्वंव्यभिचारादितिनन्वेवंकार्यतावच्छेदककोटि
विपरीतज्ञानेविशेषादर्शनप्रयुक्तत्वानिवेशान्नव्यभिचारइतिवाच्यं।तस्यदुर्वचत्वात्।तादृशेतिव्यावर्त्तकरूपेत्यर्थः हेतुतेतितथाच

नोक्तव्यभिचारः तादृशस्यालोकसंयोगस्यैव सत्त्वात् तादृकस्येति विशेषदर्शनस्य तदभावव्याप्यवत्तानिश्चयत्वेन आलोकादेस्तु विरोधिनिश्चयसा
मग्रीत्वेन व्यावर्त्तकधर्मदर्शनस्य तन्निश्चयत्वेन विरोधित्वादिति भावः। नन्वेकस्य विरोधित्वस्याभावेऽपि अननुगततावत् विरोधितान्यतमवत्त्व
संबंधेन विपरीतज्ञानवत्त्वेव हेतुतासंबंधाननुगमस्यादोषत्वादत आह किंचेति। तत्र प्रत्यक्षापत्तिः निर्णयात्मकघटप्रत्यक्षापत्तिः तत्पुरुषीये
जितत्कालीनेत्यपि द्रष्टव्यं अन्यथोक्तस्थले औपनीतकसवधानस्यतत्पुरुषीयकोऽगांतरीयविपरीतज्ञानविरोधित्वे नोक्तापत्तिः तादृशस्यान्त
नन्वेनायत्यागे एवं न दोषायेत्यत आह पुरुषांतरीयेति। तादृशेति तत्पुरुषीयतादृशविपरीतज्ञानेत्यर्थः अतिप्रसंगः एकपुरुषस्य विशेषाद
र्शनप्रयुक्ततत्संशयानंतरं विनैव विशेषदर्शनेन तत्प्रत्यक्षनिर्णयापत्तिः न च सामानाधिकरण्यप्रत्यासत्त्या हेतुत्वान्नापत्तिरिति वाच्यं आलोका
दिसाधारणानुरोधेन कालिकप्रत्यासत्त्यैव हेतुत्वात् ननु विरोधित्वं विरोधोपधापकत्वं वाच्यमत आह एवमिति। नन्वर्थसमाजग्रस्तधर्मस्य
कार्यतानवच्छेदकत्वे प्रमाणाभाव एव बीजं प्रकृते च विना विशेषदर्शनं विपरीतज्ञानोत्तरप्रत्यक्षवारणान्यथानुपपत्तिरेव प्रमाणमत आह किं
चेति। विशेषदर्शनघटितसामग्र्याः सहकारित्वान्न सामान्यनिर्णयापत्तिरत आह भ्रमेत्यादि तथा च विपरीतज्ञानानुत्तरप्रत्यक्षविर्णयस्य तां विना
नुपपत्त्या तस्याः सहकारित्वं न संभवतीति भावः सामान्यनिर्णयापत्तिः प्रत्यक्षे निर्णयापत्तिर्दुर्वारैवेति॥ तथा च विशेषदर्शनहेतुत्वेऽपि नोक्तास
तिवारणमनोऽनंतत्वे प्रमाणाभावमिति भावः ननु विपरीतज्ञानानुत्तरप्रत्यक्षे विपरीतज्ञानाभावस्य हेतुतया विशेषदर्शनादिघटितसामग्री विपरी
तज्ञानाभावादिघटितसामग्र्योरन्यतरस्यैव सहकारितया नोक्तापत्तिरत आह तद्धेतुत्तरेति। विपरीतज्ञानोत्तरेत्यर्थः सामग्र्यन्तरकल्पनेवि

परीतज्ञानाभावरूपसामग्र्यंतरकल्पने। प्रमाणिकगौरवं न दोषायेत्यत आह मानाभावस्येति। नन्वेकमेवमानं अन्यथाविशेषदर्शनासत्त्वे प्रत्यक्षेणि
श्चयापत्तेरत आह एवं चेत्यादि अयमाशयः विशेषदर्शनासत्त्वे प्रत्यक्षनिश्चयत्वावच्छिन्नस्यापत्तिरेव न संभवति। निश्चयत्वस्यार्थसमाजग्रस्ततया
नीलेतरघटत्वादिवत्कार्यतानवच्छेदकत्वात्। नेत्रमान्निश्चयत्वावच्छिन्नस्यापत्तिस्तथापि विशिष्टबुद्धित्वावच्छिन्नस्यैवापत्तिः संभवः इति वाच्यं
। संदेहात्मकविपरीतज्ञानोत्तरं तद्धर्मावच्छिन्नापत्ताविष्टापत्तेः तदाऽभावकोटेरपि भासकत्वेन संशयात्मकविशिष्टबुद्धेरेवोत्पादात्। अभाव
कोटिभानप्रतिबंधकविशेषदर्शनादिसत्त्वे अभावकोटेर्भानासंभवेन तद्धर्मावच्छिन्नापत्तौ निश्चयस्यैवोत्पादात्। नन्वभावांशे लौकिकसन्निकर्ष
जन्यसंशये विशेषदर्शनस्य नाभावकोटिभानप्रतिबंधकत्वं स्वविषयमेव लौकिकसंनिकर्षाद्यजन्यज्ञानं प्रत्येव विशेषदर्शनस्य विरोधितया वाच्य
त्वात्। तथा चाभावांशे लौकिकसंनिकर्षजन्यसंशयात्मकविपरीतज्ञानोत्तरं विशेषदर्शनसत्त्वेपि तद्धर्मावच्छिन्नापत्तावभावकोटेरपि भासकस
न्निकर्षादिसत्त्वेन फलतोऽभावांशे लौकिकसन्निकर्षजन्यसंशय एवस्यान्न तु निश्चय इति चेन्न तत्प्रकारकनिर्णयानंतरं लौकिकसन्निकर्षज
न्यतदभावप्रकारकसंशयवारणाय लौकिकसन्निकर्षजन्यतदभावप्रकारकज्ञानं प्रति तत्प्रकारताशालिज्ञानसामग्रीत्वेनापि प्रतिबंधकता
कल्प्यते एवं चोक्तस्थले लौकिकसन्निकर्षजन्यतदभावप्रकारकज्ञानं न संभवति तत्प्रकारकज्ञानसामग्रीरूपप्रतिबंधकसत्त्वात्। नापि लौ
किकसन्निकर्षाजन्यतदभावप्रकारकं विशेषदर्शनस्य प्रतिबंधकत्वात्। अन्यादृशं त्वलीकमेवेति तत्प्रकारकनिर्णयोत्पादे बाधकाभावः
न च तथापि संशयोत्तरं विशेषदर्शनोत्पत्तिक्षणे तत्प्रकारकनिर्णयोऽपि वशादेवोत्पद्यतां तदभाववत्ताज्ञाने तद्व्याप्यवत्ताज्ञानस्य कार्यक

भ्रमन्तितयाप्रतिबंधकत्वात्तदानींतदभावभानासंभवादितिविशेषदर्शनहेतुत्वमावश्यकमितिवाच्यं।तादृशस्थलेनिर्णयस्येष्टत्वात्।ततद्वितीयक्ष
णोनिर्णयोत्पादस्यसर्वमत।क्षसिद्धतयाश्चक्षुरादेस्तत्स्वीकारेक्षतिविरहात्।विपरीतनिश्चयोत्तरंतुनविशिष्टबुद्ध्यापत्तिः।तत्रतस्यप्रतिबंधकत्वात्।नच
भ्रमोत्तरंविशेषदर्शनवेलायांप्रत्यक्षनिश्चयोत्पत्तयेप्रत्यक्षनिश्चयान्यविशिष्टबुद्धित्वमेवविपरीतनिश्चयप्रतिबध्यतावच्छेदकंवाच्यम्।तथाचकथं
तस्यप्रत्यक्षनिश्चयप्रतिबंधकत्वमितिवाच्यं।भ्रमोत्तरंविशेषदर्शनसत्वेपिभ्रमनाशानंतरमेवप्रत्यक्षनिश्चयोत्पादनेनप्रत्यक्षनिश्चयान्यत्वस्य
वाच्यनिश्चयप्रतिबध्यतावच्छेदककोटावनिवेशादितिविशेषदर्शनहेतुतायांमानाभावइति।उपदर्शनइति एतेनान्वयव्यतिरेकाभ्यांविशेषदर्शनहे
तुत्वमितिप्रत्युक्तं।अन्यथासिद्धान्वयव्यतिरेकयोरेवकारणताग्राहकतया विशेषदर्शनान्वयव्यतिरेकयोरन्यथासिद्धत्वात्।अभिसंधायाअ
भिप्रेत्यसर्वमनएवसर्वनैयायिकमतएव।विशेषणधीत्वेनेति।उपलक्षणमेतत्।उपनायकज्ञानत्वेनकालोपाधित्वेनचेत्यपिद्रष्टव्यं।वि
शेषेतिमिश्रमतेविशेषदर्शनस्यविशेषदर्शनत्वेनैवहेतुतेत्यर्थः।परामर्शत्वेनेति।अस्यपूर्वंविशेषणधीत्वादिनाबाधादिकालीनपरामर्शजन्य
मि प्रत्यक्षवारणायेतिपूरणीयं।आशयादिति।अभिमानादित्यर्थः।एवंचहेतुतामतइत्यस्यविशेषदर्शनत्वेनहेतुतामतइत्यर्थः।विशेषदर्शने
त्वेनविशेषदर्शनस्यहेतुत्वमितिमतमितिभ्रमवतआशंकेतिभावः।कश्चिदिति।अत्रविशेषणधियोहेतुत्वस्यनैयायिकमतसिद्धत्वादु
पनायकत्वेनकालोपाधित्वेनचहेतुत्वस्यतत्सिद्धत्वंचास्वरसः।एतेनस्थलविशेषाभिप्रायेणहेतुतामतइत्युक्तंप्रतियोगित्वव्याप्यवान्य
मभावत्वव्याप्यवानयमित्याकारकेविशेषदर्शनस्यापंप्रतियोगिनवायमभावोनवेतिसंशयोत्तरोत्पन्नेयंप्रतियोगीअयमभावइतिप्रत्यक्षेवि
शेषणज्ञानविधयापिहेतुत्वात्।अभावत्वप्रतियोगित्वयोरनुपस्थितयोरेवप्रकारत्वेनतयोर्विशिष्टज्ञानंप्रतिविशेषणज्ञानस्याहेतुत्वात्

ानचतथाप्युक्तप्रत्यक्षसेदंत्वविशिष्टे प्रतियोगित्वादिवैशिष्ट्यावगाहित्वपात न विशेष्यतावच्छेदकप्रकारकज्ञानविधया विशेषदर्शनस्य जनक
त्वमस्तीति वाच्यं। मिश्रमते विशिष्टवैशिष्ट्यविषयत्वाभावात् असंसर्गाग्रहसाचिव्यादेव धर्मितावच्छेदकत्वनिर्वाहात् प्राचीनमते संशयभिन्न
प्रतिविशेष्यतावच्छेदकप्रकारकज्ञानहेतुत्वस्यानंगीकारात्। अत एव धर्मिज्ञानं च संशयहेतुरित्यनेन मणिकृता संशयमात्र एव धर्मिताव
च्छेदकप्रकारकज्ञानहेतुत्वमंगीकृतमित्यपि परास्तं। कोलोयाधित्वेन हेतुत्वस्योक्तस्य लोपि सत्वात्। न व्याप्तत्व व्याप्यवत्प्रत्यक्षनिश्चयजन्यता
वच्छेदकानुभवत्वव्याप्यजातिमत्त्वविवक्षणेनान्यमतेऽतिव्याप्तिरित्याशयेन विपरीतज्ञानोत्तरप्रत्यक्षनिर्णयत्वावच्छिन्नं प्रति विशेषद
नहेतुतामते तिव्याप्यभिधानं। अग्रे च तत्त्वमित्यस्य निरुक्तप्रत्यक्षनिर्णयत्वावच्छिन्नं प्रति हेतुत्वमित्यर्थ इत्याहुः। तन्न तदलौकिकप्रत्यक्षत्वा
वच्छिन्नं प्रति तज्ज्ञोचरज्ञानत्वेनोपनयस्य हेतुतया मतद्वयस्यासंगतितादवस्थ्यात्। केचित्तु प्रत्यक्षादिज्ञानस्यापि कालोयाधितपाप
रामर्शजन्यत्वमेव लक्षणे निवेश्यं तथा च तत्तत्प्रकारकज्ञानत्वावच्छिन्नं प्रत्येव तत्तद्धिहेतुत्वाद्विशेषणज्ञानादिजन्यतापाः किंचिद्वि
शेष्यकत्वानवच्छिन्नत्वान्न तामादाय दोषः किंतु विपरीतज्ञानोत्तरप्रत्यक्षनिर्णयत्वावच्छिन्नजन्यतामादायैव तादृशजन्यतायांध
र्मपतंभावस्यावश्यकत्वादित्याहुः। अन्ये तु समानविषयेति अनुमितिसामग्र्यावलवत्वात् प्रागनुमितिरेव। ततः प्रत्यक्षं तच्च न साक्षात्प
रामर्शजन्यं तन्निवारणाय साक्षात्त्व त्वस्यातिवेश्यत्वादितिमतत्वयर्थसिद्धार्थमतद्वयमुक्तं एवं च हेतुतामतद्वयस्य साक्षात्हेतुतामत
द्वयार्थ इत्याहुः। अपरे तु परामर्शत्वेन परामर्शजन्यत्वस्य लक्षणेऽविवक्षणेऽपि विशेषणज्ञानत्वोपनयत्वाघटितरिक्तरूपेणावि

शेषदर्शनेनहेतुतामतेतिव्याप्तिरितिहेतुतामतइत्यास्यार्थइत्याहुः। विशेषदर्शनस्यविपरीतज्ञानविरोधित्वेनहेतुत्वेपुरुत्वंतत्रमाहस्यै
त्पत्ति। नचविशेषदर्शनस्यविपरीतज्ञानविरोधित्वेनहेतुत्वेयत्रायंपुरुषोनवेतिसंशयाद्युत्तरमयंपुरुषइत्याकारकपरोक्षग्राह्यनि
श्चयस्तत्रैतत्तुल्यादिनैवविशेषदर्शनंतथाविधप्रत्यक्षनिश्चयापत्तिस्तथाप्यवृत्तौनिश्चयस्यैवतत्त्वेतन्निश्चयस्यापितदभाववत्ताज्ञान
विरोधित्वादितिवाच्यं। तदुत्तरंसंशयानुदयेनप्रत्यक्षनिश्चयस्येष्टत्वात्। दीधितावुक्तत्वादिति। तेनमिश्रैरेवोक्तत्वादित्यर्थः। तथाच
मिश्रमतेविशेषदर्शनत्वेनविशेषदर्शनस्याहेतुत्वाभावेनोक्तरीत्याभ्रमेणाशंकासंभवइतिभावः। अतएवहेतुतामतइत्यस्यविशेषद
र्शनत्वेनैवहेतुतामतइतिनार्थः। तथासतितन्मतेनातिव्याप्तेरनुद्धारात्समाधानासंगतेरितिदूषणंपरास्तं। तन्मतेतासिद्धेरेवसमा
धानत्वात्। एतेनसर्वमतएवपरामर्शविशिष्टत्वस्यैवानुमितिनिष्ठपरामर्शकार्यतावच्छेदकत्वाद्विपरीतज्ञानोत्तरप्रत्यक्षनि
र्णयेपिविशेषदर्शनत्वेनैवहेतुरितिविशेषदर्शनत्वेनहेतुतामतइत्यस्यासंगतत्वमसंगतंचसमाधानमित्यपिनिरस्तं। मिश्रमते
कारणस्यकार्यतावच्छेदकत्वाभावेनोक्तहेतुतायाअसंभवात्। अथपक्षत्वग्रंथसंगतावपियेषामुक्तहेतुत्वांगीकारस्तन्मतेउक्त
स्थलेकेयमर्थोपितिव्याप्तिवारणमितिचेन्न। तन्मतेप्यनुमितित्वौतभीवैरोधकारणत्वेनोक्तातिव्याप्त्यभावात्। अतएवाग्रेदीधितिका
रस्यवह्निव्याप्यवत्पर्वतइतिनिश्चयत्वावच्छिन्नेत्यादिनाजातिघटितलक्षणपरिष्कारःसंगच्छते। यदात्वनुमितित्वेकार्यतावच्छेद
ककोटौननिविष्टमितिमतंतदातुयाकाचिदित्यादिलक्षणांतरमेवभविष्यतितत्रतुनोक्तदोषसंभावनापि। व्यक्तीभविष्यति

म०टी०

चेदस्मायेयेतु विशेषदर्शनस्य व्यावर्त्तकधर्मदर्शनादिसाधारणये नैवहेतुतानत्वालोकादिसाधारण्येनतत्साधारण्येहेतुतावच्छेदकं
संबंधाभावादितिवदंतितन्मतमाह व्याख्यायां केचित्त्वित्यादि। अत्रैव धकारस्य घर संशयो तत्प्रक्षेप व्यभिचारवारणाय कोटीनां तत्सं
शयविशेषकत्वं तादृशसंशयेति तद्विषयकसंशये त्यर्थः एवमग्रेपि। संशये। भ्रमस्याप्युपलक्षकं। आलोकाभावप्रयुक्तेति।
इदं च संशयविशेषणं विशेषादर्शनप्रयुक्तसंशयोक्तप्रत्यक्षे व्यभिचारवारणाय। आहुरिति। अस्वरसबीजं तु गुरुतरत्वविभिन्न
कार्यकारणभावेमानाभावः आलोकादिसाधारण्येन विशेषदर्शनस्य कालिकसंबंधेनैव हेतुत्वसंभवात्। नव्यास्तु आलोका
दिसमवहितात्मनोयोगस्यैवात्मनिप्रत्यासत्त्यविपरीतज्ञानप्रतिबंधकत्वोपगमेन तत्साधारण्येन विशेषदर्शनस्य सम
वायसंबंधेनैव हेतुत्वमित्याहुः तथाविधेत्यादि अन्यथायथाश्रुतलक्षणेनिरुक्तानिर्देशवाक्यार्थज्ञानात्मकव्याप्यवत्प
क्षनिश्चयजन्यत्वेनोपमितिविशेषेऽतिव्याप्तिरिति भावः। तथाविधेतीत्यादि तथाचतत्र व्याप्यवत्पक्षविषयकनिश्चयज
न्यतासत्वेपि तादृशनिश्चयत्वावच्छिन्नजनकतानिरूपितजन्यत्वाभावान्नातिव्याप्तिरिति भावः। यद्वा तथाविधेत्यादि अन्य
थातथाविधनिश्चयत्वेनानुमितिजनकत्वेप्यधिकं त्वित्यादि न्यायादनुमितिजनकतायां व्याप्यवत्पक्षविषयत्वावच्छिन्न
त्वात्तादृशविषयत्वावच्छिन्नजनकतानिविशेषमात्रेणाभ्रमादिविरोधित्वावच्छिन्नहेतुताकोक्तप्रत्यक्षेतिव्याप्तिवारणासं
भवेन तथाविधनिश्चयत्वेन हेतुत्वविवक्षणीयमर्थमेवस्यादिति भावः। तथाविधेतीत्यादि। तथाच व्याप्यवत्पक्षनिश्चय

त्वस्यानुमितिजनकतावच्छेदकस्योक्तोपमितिजनकतानवच्छेदकत्वान्नातिव्याप्तिरिति भावः। अथ तोपमितिहेतुतायाविशिष्टविषयत्वावच्छिन्न
त्वाद्व्याप्यवत्पक्षविषयत्वानवच्छिन्नत्वादेवानतिप्रसंगे तथाविधनिश्चयत्वावच्छिन्नहेतुत्वविवक्षणमफलं। न चाग्रमसाधारण्यायत्तादृशविशिष्ट
वाक्यार्थघटकत्वेन तत्पदार्थानामपरस्परोपश्लेषावगाहिज्ञानत्वेनैवोक्तोपमितौ हेतुतापावकत्वव्यतयाव्याप्यवृत्त्यपक्षविषयत्वमप्युक्तोपमितिजनकता
वच्छेदकमिति वाच्यं। तथापि तथाविधज्ञानत्वावच्छिन्नहेतुत्वविवक्षणेनैवोपपत्तेरिति चेन्न। विनिगमनाविरहेण महानसपदवाच्यत्वविशेष्यताव
च्छेदकसाध्यविशेषण वह्निव्याप्यधूमवत्त्यवृत्तिविषयताकज्ञानत्वेनाप्युक्तोपमितौ हेतुत्वात्। न चैवं तादृशविशेषणोपयुक्तदोषतादवस्थ्यं तत्र तथावि
धनिश्चयत्वेन हेतुत्वात्। अन्यथा व्याप्यवत्त्वांशे धर्मितावच्छेदकांशे संशयात्मकातिदेशवाक्यार्थज्ञानादुपमित्यापत्तेरिति वाच्यम्। अतिदेशवाक्यार्थज्ञाने
व्याप्यवत्त्वस्य धर्मितावच्छेदककोटिनिविष्टतया भानात् अनुमितावच्छेदकांशे संशयस्यानभ्युपगमेनोपमितिजनकतायां व्याप्यवत्त्वांशे निश्चय
त्वनिवेशस्य व्यर्थत्वात्। अत एवात्र व्याप्यवत्त्वांशे निश्चयत्वानिवेशस्सूचनायैव निरुक्तमहानसपदवाच्यत्वज्ञानत्वेनेत्युक्तं। अन्यथा निरुक्त
महानसपदवाच्यत्वनिश्चयत्वेनैव हेतुतया तदसंगत्यापत्तेः। वस्तुतस्तु ज्ञानपदस्योत्सर्गतो निश्चयपरतया निरुक्तमहानसपदवाच्यत्वनिश्चय
त्वेनेत्येवार्थः व्याप्यवत्त्वस्य धर्मितावच्छेदकतया तदंशे निश्चयत्वानिवेशस्यार्थत एव लाभात्। अत एव दीधितौ तथाविधवाक्यार्थप्रतिसंधान
त्वेनेत्युक्तं व्याप्यं च स्वरूपोपायो वाक्यार्थस्य प्रतिसंधानत्वेन तदंशे संशयनिश्चयसाधारण्यज्ञानत्वेनेत्यर्थस्य तत एव लाभात्। अन्यथा तथा
विधवाक्यार्थज्ञानत्वेनेत्येवोच्येत। अत्रेदं बोध्यं। उक्तविवक्षया अतिदेशवाक्यार्थज्ञानजन्यतामादायातिव्याप्तिवारणेऽप्ययं महानस

म.टी.

सदृशइति सादृश्यज्ञानजन्यतामात्रायोपमितावतिव्याप्तिर्दुर्वारैव न च तत्तथाविधनिश्चयत्वपर्याप्तावच्छेदकताकहेतुतापर्यंतविवक्षणेनातिव्या
प्त्यदोषः तज्ज्ञानजनकतावच्छेदके व्याप्यांशेऽसहानसहचरितत्वावगाहित्वस्यानिवेशादिति वाच्यं। तथा सति अग्रे न चोपनयत्वादिना शाब्दबोधविशेषेऽति
व्याप्तिमुद्राव्यतद्व्यवहारस्यायतनातिरिक्तस्येत्यादिना पर्याप्तिविवक्षणासंगतेः आशंकाया एवासंभवात्। न च नन्वेवोपनयेत्यादिग्रंथोक्ताशंकातत्रा
तिरिक्तस्येत्यादिनाऽभ्रांत्युद्धारेऽनमेव हृतमिति वाच्यं। तथापि धूमव्यापकवह्निमत्सादृश्यात्मकताद्दशवह्निमद्वृत्तिधूमसंबन्धानिश्चयजन्यो
पमितावतिव्याप्तेः न च तज्ज्ञानजनकतावच्छेदककोटौ सादृश्यघटकभेदविषयतायाः अपि निवेशान्नदोष इति वाच्यं। तथापि व्याप्यवत्त्वरू
पवैधर्म्यज्ञानजन्योपमितावतिव्याप्तेः वैधर्म्यस्येतरवैधर्म्यत्वेन ज्ञानानपेक्षणात् वस्तुतः लघुधर्मावच्छेदेन पदवाच्यत्वग्रहोऽजातः स च धर्मो यद्धर्मा
वच्छेदेन गृह्यते तद्धर्मावच्छेदेनैवोपमितिः सादृश्यत्वं वैधर्म्यत्वं वा न प्रयोजकं तथा च वह्निव्याप्यधूमवत्त्वावच्छेदेन पर्वतपदवाच्यत्वं गृहीतवतः
पर्वतत्वावच्छेदेन वह्निव्याप्यधूमवत्त्वग्रहजन्योपमितावतिव्याप्तिः न चात्रानुमितिरेव जायते उपमितिरूपा ऽनुमित्यन्तरं वोपमितिसामग्र्या
न्यात्। तस्मात् चरमज्ञाने उपमितिभिन्नत्वविशेषणस्यावश्यकतया ऽतएवेत्यादिग्रंथश्चिन्त्य एवेति। केचित्तु इतोऽप्यस्वरसात् जन्यज्ञाने व्याप्य
विषयकत्वविशेषणावश्यकत्वे तत्त्वाभाववविषयकत्वार्थकं एवं च शक्तिपरिच्छेदकोपमिते तत्पदजन्यबोधविषयकत्वप्रकारकेच्छास्य शक्ति
घटकजन्यत्वघटकतया भाववविषयकत्वोन्नीतोक्तातिव्याप्तिरित्याहुः इतोप्यस्वरसात् यत्किंचिदित्यादिना लक्षणांतरं कर्तव्यमित्य(
न्ये। बोधः धूमज्ञानजन्यवह्निमत्पर्वताभिन्नधूमव्यापकवह्निमदभिन्नधूमवदभिन्नवह्निव्याप्यधूमसंबंधोपर्वतो वह्निव्याप्यधू

मज्ञानज्ञाप्यवह्निसंबंधीत्याकारकोबोधः स्वमतेनिर्वचनीयास्वमतंत्वेतादृशकाप्रतिज्ञाहेत्वोर्निगमने पंपदानुषंगेणानाभावेनोपनयनिगमनयोरैकवा
क्यतयाबोधजनकत्वेपिप्रतिज्ञाहेत्ववयवादेर्नैदाहरणादिनासममन्वयबोधजनकत्वं तात्पर्याभावात् अन्यथाप्रतिज्ञानिगमनयोरप्येकवाक्यतया
बोधकत्वापत्तेः तात्पर्यकल्पनाया अविशिष्टत्वात् तथाचप्रतिज्ञादिवाक्यपंचकजन्यएकान्वयबोधएवासिद्ध इति तु शब्दोऽस्वरसस्सूचकः सचप्रति
ज्ञाहेत्वोरुदाहरणेनसहैकवाक्यतयाबोधजनकत्वे किं बाधकं धूमज्ञानज्ञाप्यवह्निमद्भिन्नपर्वतरूपहेत्वर्थघटितप्रतिज्ञार्थे धूमव्यापकवह्निम
द्भिन्नधूमवत् उदाहरणार्थस्याभेदसंबंधेनान्वयेबाधकानुपपत्तेर्भावात् न च तत्तात्पर्याभावः तस्यासर्वज्ञापरिच्छेद्यत्वात् न च तथासति प्रतिज्ञानि
गमनयोरप्येकवाक्यतयाबोधकत्वापत्तिः तात्पर्यकल्पनाया अविशिष्टत्वादिति वाच्यं तयोरेकान्वयबोधजनने तात्पर्याभावेपि तात्प
र्यभ्रमेण तथाविधान्वयबोधाय तेर्भवतामपि दुर्वारत्वात् यदि च तत्र तात्पर्यभ्रमस्याभ्युपगमेन तथापत्तिर्वार्यते तदास्मन्मतेपि निगमनोदे
प्रतिज्ञाद्यव्यवहितोत्तरत्वादिरूपानुपूर्वीभ्रमानभ्युपगमेन न तथापत्तेर्वारणात् प्रतिज्ञानिगमनयोरप्येकवाक्यतयाबोधकत्वाद्यद्धूमज्ञानज्ञा
प्यवह्निमद्भिन्नपर्वते हेत्ववयवार्थघटितप्रतिज्ञार्थे वह्निव्याप्यधूमज्ञानज्ञाप्यवह्निसंबंधिनो निगमनार्थस्याभेदसंबंधेनान्वयबाधे
बाधकानुपपत्तेर्भावात् तथाच प्रतिज्ञाव्यवहितोत्तरहेत्ववयवाव्यवहितोत्तरोदाहरणाव्यवहितोत्तरोपनयाव्यवहितोत्तरत्वरूपानुपू
र्वीविशेषशालिनिगमनविशेष्यकज्ञानात्तथाविधविशिष्टार्थविषयकान्वयबोधतात्पर्यज्ञानसहकृतात्तादृशावयवेस्तथाविधविशिष्टा

म॰टी॰

र्थविषयकैकान्वयबोधजनने बाधकाभाव इति नेति नामार्थयोर्भेदान्वयस्याव्युत्पन्नत्वादिति भावः ननु नामार्थयोरभेदातिरिक्तप्रत्ययार्थानिरि
क्तसंबंधेनैवान्वयबोधाभावस्य व्युत्पत्तिसिद्धत्वेन तन्मत्वर्थसंयोगादिसंबंधेन पर्वते वन्हिव्याप्यधूमस्य प्रकारतयाभाने बाधकाभावः अ
तएव नामार्थयोरभेदातिरिक्तसंबंधेनान्वयबोधे प्रत्ययार्थोपस्थितेर्हेतुत्वे कल्पनमपि संगच्छते अन्यथा तादृशबोधापत्तिर्ध्यातत्वेन तत्कल
नमसंगतं स्यात् न च मत्वर्थसंबंधविशेषणतयोपस्थितस्य धूमस्य कथं पर्वते भानमेकविशेषणत्वेनेत्यादिव्युत्पत्तेरिति वाच्यं स्वातंत्र्ये
णाभानस्यैव प्रतियोगितया तादृशव्युत्पत्तिघटकत्वात् तत आह साक्षादिति प्रत्ययार्थमत्वर्थीयस्येत्यर्थः प्रकारतया साक्षात्प्रकारतया तादृ
शनिश्चयत्वेनापक्षांशे साक्षाद्व्याप्यप्रकारकनिश्चयत्वेनानातिव्याप्तिरिति उपनयार्थज्ञानस्योक्तरूपेणाहेतुत्वादिति भावः एतेन तादृ
शनिश्चयत्वेनेत्यस्य व्याप्यवत्पक्षनिश्चयत्वेनेति यथाश्रुतार्थग्राहिणामुपनयार्थज्ञानस्याभेदसंबंधेन वन्हिव्याप्यधूमसंबंधिप्रकार
कपक्षविशेष्यकनिश्चयत्वापेक्षया तथाविधधूमप्रकारकपक्षनिश्चयत्वेनैव तत्र हेतुत्वस्य लघुतयाभ्युपगमेनातिव्याप्तिसंभवान्नाति
व्याप्तिरित्यसंगतमित्युक्तिः परास्ता साक्षात्प्रकारतयेत्यस्य स्वरससिद्धोक्तव्याख्यानेनादोषात् नन्वेवं वन्हिव्याप्यधूमवान्पर्वत इति शाब्द
जन्यात् पक्षांशे मत्वर्थसंबंधिप्रकारकनिश्चयादनुमितिर्न स्यादिति वाच्यं इष्टत्वात् अन्यथा पक्षांशे परंपरया व्याप्यप्रकारकाद्व
न्हिव्याप्यधूमवद्देशवान्पर्वत इत्यादिनिश्चयादप्यनुमित्यापत्तेः उपनये चैतत्र अनुगतोहार्यत्वस्य दुर्वचनतया तत्तद्व्यक्तित्वावच्छिन्न

प्रतियोगिताकभेदकस्यैवाशयपरामर्शादनुमितिवारणापत्तज्ञानकतावच्छेदककोटौ निवेशनीयतयापक्षांशे परंपरयाव्याप्यप्रकारकानंता
र्थव्यक्तिभेदकूटस्य तत्रानिवेशेन लाघवान्मत्प्रसिद्ध एवेति। वह्निव्याप्यधूमत्वविशिष्टस्य हृदमनुपस्थित्यात तदवच्छिन्नस्य तथैत्वेनेनपरा
मर्शासंभवादिति भावः। केचित्तु प्रतिज्ञादिस्थसाध्यादिबोधकपदे रेवो हृदरणादिप्रयोगं उचितः भिन्नपदे सत्त्वप्रयोगे शाब्दबोधे पदैः आनम
उपगच्छंतो वैयाकरणानुसारिणं विभिन्नपदस्य प्रकारकप्रतीतिजनकत्वमभ्युपगच्छंतो मन्यैव विभिन्नानुपूर्वीकपदसमुच्चयेन विभि
न्नानुपूर्वीकपदत्व दृढहृदरणादिकं किमिति वह्निमिति श्रोतुर्ज्ञितया शाब्दबोधविषयेन नाभिमतप्रतीतिविलंबो वाऽभिमते कस्य प्रतीति
विलोपायत्तेरित्याहुः उक्तस्य त्वे नैवेति। एवकारेणाविशेषधर्मेव्यवच्छेदः एतत्तत्वमग्रव्यक्तीभविष्यति। नन्वेवं सोऽग्नीत्यादौ तत्पद
जन्यशाब्दानंतरं घटत्वादि विशेषधर्मप्रकारकप्रवृत्त्यनुपपत्तिः घटोस्ति नवेत्यादिविशेषधर्मप्रकारक संशयापनिरासानुपपत्तिश्चेत्य
त आह विशेषेति। तत्पदजन्यशाब्दानंतरं घटत्वादिसवर्णकल्पयित्वा घटोस्तीत्यादिमानसाभ्युपगमेनोक्तदोषवारणात् घटशाब्दत्वामी
त्यादिविशेषधर्मप्रकारकशाब्दत्वेन कानुव्यवसायस्य असिद्ध एवेति भावः। तत्रोत वैक्यं जन्यशाब्दबोधो नार्थांतरेति विनापि वांतरवा
क्यार्थबोधं समूहालंबनपदार्थोपस्थिति तः खलेकपोतन्यायेन महावाक्यार्थबोधोदयादिति भावः। अन्यादपि प्यतद्व तीति। समूहालं
बनेनावत्पदार्थस्मरणात् खलेकपोतन्यायेन विशेष्यविषयतामिति रीत्या महावाक्यार्थज्ञानेपि पदजन्यविशेष्यविशेषणानावच्छेदकप्र

कारकनिश्चयात्मकावांतरवाक्यार्थबोधं विना राजपुरप्रवेशन्यायेन विशिष्टवैशिष्ट्यबोधात्मकमहावाक्यार्थशाब्दबोधानुदयात्तादृ
शमहावाक्यार्थबोधे तद्धेतुत्वमावश्यकमिति भावः। ननु विशिष्य घटत्वपटत्वाद्यनंतधर्माणां तत्तदादिपदशक्यतावच्छेदकत्वेनानानार्थत्वे न
शक्यानंत्यकल्पनप्रसंगइति बुद्धिस्थत्वस्यैवानुगतस्य तथात्वमुपपत्तौ एवं च तत्तदादिपदाद्वह्निव्याप्यधूमवत्पर्वतादीनां बुद्धिस्थत्वेनै
वोपस्थितिर्न तु वह्निव्याप्यधूमवत्पर्वतत्वादिरूपविशेषधर्मेणैतत्पदस्य शक्यतानवच्छेदकरूपेणोपस्थापकत्वाभावात् तथा च
तदादिपदजन्योपस्थितेर्व्याप्यप्रकारकत्वाभावात् तज्जन्यशाब्दबोधे तिव्याप्तिशंकासंभवत्यत आह दीधितौ तदादेश्चेति। अत्र
चापि घटत्वादिविषयितावत्त्वनुपगमः विशेषणेति। घटत्वपटत्वादिनेत्यर्थः। अयमाशयः प्रवृत्त्याद्यनुरोधात्तदादिपदजन्यबोधस्य
विशेषधर्मप्रकारकत्वमावश्यकं तज्जोपस्थितेर्विशेषप्रकारकत्वं साध्यं पदार्थोपस्थितिशाब्दयोः समानप्रकारकत्वेनैव कार्य
कारणभावादिति तदादिपदाद्विशेषरूपेणोपस्थितिर्भंगीकार्या न च शक्यतानवच्छेदकविशेषरूपेण कथं शक्योपस्थितिरिति वा
च्यं विशेषस्यैव धर्मस्य शक्यतावच्छेदकत्वोपगमात्। न च शक्यानंत्यं बुद्धिप्रकारत्वेन शक्यतावच्छेदकानुगमेनैकशक्तिसंभवात्
न च शक्यतावच्छेदकभेदात् शक्तिभेदः निरवच्छिन्नावच्छेदकतायाः एवावच्छेदकभेदस्यावच्छेद्यभेदकत्वात्। न चैवं तदादिपद
बुद्धिप्रकारत्वादिनैव घटत्वादिप्रकारकस्मरणशाब्दबोधौ स्यातां। ननु स्वरूपतो घटत्वादिप्रकारकौ शक्यतावच्छेदकतायाः सावच्छि

न्नत्वस्यैतादृशाकारतावच्छेदकतावच्छेदकप्रकारेणोपस्थितावच्छेदकमानानियमादिति वाच्यं। यादृशाकारतावच्छेदकज्ञानावच्छेदकप्रकारेणानुभव
तावच्छेदकमानमिति नियमस्यैवांगीकारेण शक्यतावच्छेदकतावच्छेदकप्रकारेणोपस्थितमानमिति नियमाभावेन घटत्वादीनां बुद्धिप्रकारत्वे
न शाक्यतावच्छेदकत्वेपि स्वरूपतो भानसंभवात्। अथ बुद्धिप्रकारत्वविशिष्टघटत्वाद्यवच्छिन्नशक्तिज्ञानस्यैतेन रूपेण घटत्वादिप्रकार
कस्मृतित्वादिकमेव जन्यतावच्छेदकं वाच्यं। न तु घटत्वादिप्रकारकस्मृतित्वादिमात्रं तत्र घटादिपदनिरूपितनिरवच्छिन्नावच्छेदकता
कशक्तिज्ञानजन्ये स्वरूपतो घटत्वादिप्रकारकस्मरणादौ व्यभिचारप्रसंगादिति कथं तादृशज्ञानात् स्वरूपतो घटत्वादिप्रकारकस्मरणादि
कमिति चेन्न। बुद्धिप्रकारत्वेन घटत्वादिप्रकारकस्मृतित्वादेर्जन्यतावच्छेदकत्वेपि घटत्वादिप्रवृत्तिनिरूपितलक्षणाज्ञानादिजन्यतथाविधस्म
रणादौ व्यभिचारवारणाय स्वाव्यवहितोत्तरत्वोत्पत्तिकत्वस्य सामानाधिकरण्योभयसंबंधेन तादृशशक्तिज्ञानवैशिष्ट्यस्य कार्यतावे
च्छेदककोटाववश्यं निवेशनीयतया नैवोक्तव्यभिचारस्यापि वारणे तदादिपदशक्तिज्ञानजन्यतावच्छेदककोटौ शक्यतावच्छेदकता
वच्छेदकविषयतानिवेशाभावात्। अथैवं कदाचिदपि तदादिपदाद्बुद्धिप्रकारत्वानित्यत्वादिबोधो न स्यात्। न च बुद्धिप्रकारत्वानित्यत्वादिबो
धसाधारणघटत्वादिप्रकारकत्वस्यैव तदादिपदशक्तिज्ञानजन्यतावच्छेदकतया तस्मिन् सति बुद्धिप्रकारत्वविशिष्टघटत्वादिप्रका
रके संस्कारात्तादृशबोधो नानुपपन्न इति वाच्यं। तथापि तदादिपदात् कदाचिद्घट इत्यादिबोधः कदाचिच्च बुद्धिप्रकारत्वानित्यत्वे तादृ
शबोध उत्पद्यते इत्यत्र नियामकाभावादिति चेन्न। घटोस्य बुद्धिप्रकारत्वानित्यत्वाद्याकारक घटत्वादिनिष्ठनिरवच्छिन्नधर्मिता

वच्छेदकताकबुद्धिप्रकारवत्ताज्ञानसहकृतत्वाद्बुद्धिप्रकारवान्न तत्पदशक्यइत्याद्याकारकशक्तिग्रहाद्घट इत्याकारकः स्वरूपतो घटत्वादिप्रका
रकबोधस्तादृशसहकृतत्वाच्चोक्तशक्तिग्रहाद्बुद्धिप्रकारवानित्येतादृशबोध उत्पद्यते इत्यभ्युपगमात्पूर्वकृतं तत्र स्वरूपतो घटत्वादौ नांशज्ञान
वच्छेदकत्वेपि स्वरूपतस्तेषां शक्तिज्ञानधर्मितावच्छेदकत्वे बाधकाभावात्स्वरूपतो घटत्वादिधर्मितावच्छेदकं शक्तिज्ञानाद्घट इत्याका
रकबोधः बुद्धिप्रकारवत्त्वादिधर्मितावच्छेदककशक्तिज्ञानाच्च बुद्धिप्रकारवानित्येतादृशबोध उत्पद्यते एतादृशरीत्यैव नियम उपपद्यते
। न तु बुद्धिप्रकारत्वादिना घटत्वादौ नांतदादिपदशक्यतावच्छेदकत्वेपि तदादिपदाज्जातित्वादिना घटत्वादिप्रकारकबोधः कदा
पि न स्यात् । जातित्वादेः शक्यतावच्छेदकतानवच्छेदकत्वात् शक्यतावच्छेदकतानवच्छेदकरूपेण शक्यतावच्छेदकभानोपगमे च
घटादिपदादपि जातिमानित्यादिबोधापत्तेः अथ घटादिपदशक्तिज्ञानस्य स्वरूपतो घटत्वादिप्रकारकबुद्धित्वमेव जन्यतावच्छे
दकमतो न घटादिपदात्तादृशबोधापत्तिः तदादिपदशक्तिज्ञानस्य च जातिमानित्यादिबोधसाधारणघटत्वादिप्रकारकत्वमेव
जन्यतावच्छेदकमिति तदादिपदात्तादृशबोधोपपत्तिः न चैवं तदादिपदात्तदादिपदात्कदाचिद्घट इत्याकारकः कदाचिच्च जातिमानि
त्याकारको बोध इत्यत्र नियामकाभाव इति वाच्यं । जातिमानित्यबुद्धिप्रकारवानित्येतादृशबुद्धिप्रकारवत्ताज्ञानसहकृतात्बुद्धिप्रका
रवांस्तत्पदशक्य इति शक्तिज्ञानाज्जातिमानिति बोधः घटोस्य बुद्धिप्रकारवानित्येतादृशबुद्धिप्रकारवत्ताज्ञानसहकृतात्तच्छक्ति

ग्रहाच्च घट इति बोध इत्यस्युपगमात्। यद्वा जातित्वादेः शक्यतावच्छेदकतानवच्छेदकत्वेऽपि तस्य शक्तिज्ञानविशेष्यतावच्छेदकतावच्छेदकत्वे बा-
धकाभावात् जातिमान् घटत्वपदशक्य इति शक्तिग्रहात् जातिमानित्यादिबोधः घटत्वपदं शक्यमित्यादिशक्तिज्ञानाच्च घट इत्यादिबोध इत्येवं रीत्यैव नि-
यम उपपद्यते इति चेत् तर्हि बुद्धिस्थत्वस्यापि शक्यतावच्छेदकत्वं किमित्युपेक्षितं तत्रापि घटोऽस्य बुद्धिस्थ इत्यादि बुद्धिस्थताग्रहसहकृतात् बुद्धिस्थत्वपद-
शक्य इत्यादिशक्तिग्रहात् तत् शक्यतानवच्छेदकस्यापि शक्तिज्ञानधर्मितावच्छेदकत्वे बाधकाभावात् घटत्वपदशक्य इत्यादिशक्तिज्ञानादिदं वा घ-
ट इत्यादिबोधे बाधकाभावात्। न चैवं शक्यतावच्छेदकरूपेणैव शक्यभानमिति नियमभङ्ग इति वाच्यम्। तादृशनियमाभावात्। तथापि शक्यतावच्छे-
दकतावच्छेदकरूपेणैव शक्यतावच्छेदकभानमिति नियमाभावस्य स्वीकृतत्वेनैतौ स्यात्। न च शक्यतावच्छेदकप्रकारेण शक्यभानोपगमे
घटादिपदात् द्रव्यत्वादिप्रकारकबोधापत्तिरिति वाच्यम्। घटत्वादिप्रकारताया एव घटादिशक्तिज्ञानजन्यतावच्छेदकतयातो द्रव्यत्वादिप्रकार-
कबोधापत्तिविरहात्। यदि च घटोऽस्य बुद्धिस्थ इत्यादि बुद्धिस्थताग्रहस्य शक्तिग्रहसहकारित्वे गौरवं। घटत्वपदशक्य इत्यादिशक्तिग्रहहेतुत्वे च घ-
टत्वादीनां शक्यतानवच्छेदकत्वेन न संभवति उद्देश्यतावच्छेदकावच्छेदेन शक्तिग्रहस्यैवोपस्थितिद्वारा शाब्दबोधहेतुत्वात् घटत्वादीनां शक्यतान-
वच्छेदकत्वेन तदवच्छेदेन शक्तिग्रहस्य भ्रमरूपतया विशेषदर्शिनां तादृशविशेषरूपेण शाब्दबोधानुदयप्रसङ्गात्। उद्देश्यतावच्छेदकसा-
मानाधिकरण्यमात्रावगाहितः शक्तिग्रहस्य शाब्दबोधोपयोगित्वे तु विशेषदर्शिनामपि द्रव्यत्वादिसामानाधिकरण्येन घटादिपदशक्तिग्रह-
संभवेन घटादिपदात् द्रव्यत्वादिप्रकारकशाब्दप्रसंगात्। न हि शक्तिभ्रमं विना घटादितो हि शाब्दबोधः कस्यचिदुपेतीति मन्यते। नत्वेवं बुद्धिप्रकार

३

भ.टी.

त्वरूपेण घटत्वादीनां शक्यतावच्छेदकत्वोपगमेऽपि तदादिपदात् जातिमानित्यादिबोधानुपपत्तिस्तदवस्थैवापत्तो बुद्धिप्रकारत्वात्तज्ज्ञानविशेषस्य शक्तिग्र
हसहकारित्वे गौरवं जातिमान् तत्पदशक्य इत्याद्याकारके जातित्वाद्यवच्छिन्नविशेष्यतावच्छेदकताकशक्तिग्रहे हेतुत्वं च जातित्वादीनां शक्यतावच्छेद
कतानवच्छेदकत्वेन संभवति शक्यांशे उद्देश्यतावच्छेदकावच्छिन्नत्वानवगाहिन उद्देश्यतावच्छेदकतावच्छेदकीभूतधर्मावच्छिन्नतावच्छेदकताकत्वान
वगाहिनोऽवच्छिन्नविशेष्यतावच्छेदकताकशक्तिग्रहस्यापि शाब्दबोधानुपयोगित्वात् अन्यथा विनैव शक्तिभ्रमं जातिमान् घटपदशक्य इत्यादिश
क्तिस्तानाज्जातित्वादिना घटत्वादिप्रकारकबोधप्रसंगादिति चेन्न एवं बुद्धिप्रकारत्वादिना घटत्वादेः शक्यतावच्छेदकत्वे बुद्धिप्रकारत्वादिना जा
तित्वादेरपि शक्यतावच्छेदकतावच्छेदकत्वादिकमुपेयते अतो न तदादिपदात् जातिमानित्यादिबोधानुपपत्तिः एवं च भेदाशक्तिभेदस्यानन्यगत्या
स्वीकारात् अन्यथा प्रकृत्यादिनिर्वाहकस्य तदादिपदजन्यविशेषधर्मप्रकारकबोधस्य प्रकारान्तरेणानिर्वाहात् यत्त्वेकस्मिन्नानार्थोच्छेदः
प्रसंगः तत्राप्युक्तरीत्या बुद्धिप्रकारविशिष्ट एव शक्तिसंभवादिति। तन्न तत्तत्केनोपेण विशिष्य शक्तिबोधनात् एतेन तदादिपदाद् घटत्वा
द्यवच्छिन्नस्य बोधस्तदवच्छिन्ने शक्तिः। एवं च तदादिपदाद् घटत्वाद्विशिष्टबोधो जातिमानित्यादिबोधश्चोपपन्नः हर्यादिपदवत्तदादिपद
स्य नानार्थत्वमिष्टमेवेत्यपि परास्तं। तदादिपदस्य नानार्थत्वे मानाभावात्। केचित्तु बुद्धिप्रकारत्वे न शक्यतावच्छेदकं घटत्वादीनामनुग
मेऽपि तादृशधर्मस्योपलक्षणतया शक्तिविषयत्वेनाशक्यतया तदंशपरित्यागेन निर्विशेषणघटत्वादिप्रकारकबोधोपपत्तिः बुद्धिप्रका
रत्वस्याशक्यत्वेऽपि तत्पदं बुद्धिप्रकारविशिष्टं बोधयत्वित्याकारकभगवत्संकेतरूपशक्तेस्तेनानुगतरूपेण घटत्वपटत्वाद्यनानात्वे
रेकं बुद्धिप्रकारत्वस्य संकेतविषयत्वेऽपि तस्य शक्योपलक्षणतया न तु शक्यतावच्छेदकत्वेन भावे तादृशेण तदुपलक्षितघटत्वादिप्रकारकत्वे

नैवबोधस्य संकेतविषयत्वात् ननु तद्विशिष्टप्रकारकत्वेन नानार्थहर्यादिपदस्थले उपलक्षणीभवता केनाप्यनुगतरूपेण प्रवृत्तिनिमित्तानाम्
भानादृशशक्यस्वरूपसहृदनुगतरूपसत्त्वेऽपि शक्तिभेदान्नानार्थतानिर्वाहः इत्यादृशस्वैचिंत्यमितिदिक्। प्राचीनानुयायिनस्तु प्रवृत्त्यादिनिर्वाहकतद्
दिपदजन्यविशेषधर्मप्रकारकबोधानुरोधेन नोक्तरीतिरादरणीया उक्तक्रमेण शक्तिभेदांगीकारे गौरवात्। प्रवृत्त्यादिनिर्वाहकतद्दादिप
दजन्यविशेषधर्मप्रकारकबोधस्य प्रकारांतरेणैव संभवात्। तथाहि। तद्घटादिपदस्य बुद्धिस्थत्वरूपेण बुद्धिस्थमात्रे एव शक्तिः। न चैवं येन रूपेण
शक्तिग्रहस्तेनैव रूपेण पदार्थोपस्थापकत्वनियमेन तमानयेत्यादौ विशेषरूपेण शाब्दबोधो न स्यात् बुद्धिस्थमानयेत्येव शाब्दबोधः स्यात्
पदार्थस्मरणशाब्दज्ञानयोः समानप्रकारकत्वेन कार्यकारणभावादिति वाच्यं। पदज्ञानस्य दोषविधयैव पदार्थोपस्थितिं प्रतिहेतुत्वेनावि
शेषतः कार्यकारणभावात् पदांतरेऽपि तद्रूपेण शक्तिग्रहस्तेनैव रूपेणोपस्थापकत्वनियमेऽपि तद्घटादिपदे तदभावात् बुद्धिस्थत्वरूपेण शक्तिग्रह
देव घटत्वादिरूपेण पदार्थोपस्थितेः फलानुरोधित्वात् कल्पनाया इत्याहुः। अत्रेदमवधेयं। प्रवृत्त्यादेरन्यथैव निर्वाहे तद्घटादिपदजन्यविशेषधर्मप्र
कारकबोधे मानाभावेनोक्तरीतिः संगता। तथाहि। बुद्धिस्थत्वेनैव तद्घटादिपदस्य शक्ततावच्छेदकं पदार्थोपस्थितिः शाब्दबोधावपि तेन रूपेण
वविशेषधर्मप्रकारकबोधत्वमानस एव तेन प्रवृत्त्यादिनिर्वाहः। यत्तु बुद्धिस्थत्वविशिष्टे शक्तौ बुद्धिस्थत्वस्य बुद्धिविषयत्वरूपतयाऽनंतविषयतासु श
क्ततावच्छेदकत्वकल्पनापेक्षया प्रकारतासामान्ये तदवच्छेदकतावच्छेदकत्वकल्पने लाघवं। विशेष्ये प्रकारे च शक्तिकल्पनेऽनंतरूपमतेऽतुल्यमितु
क्तरीतिरेव सम्यगिति। तन्न। उक्तक्रमेणानंतघटत्वपटत्वादेः शक्ततावच्छेदकत्वस्य जातित्वादौ तदवच्छेदकत्वादेः प्रकारतासामान्ये शक्ततावच्छे

२४

मं॰टी॰

दकतावच्छेदकत्वस्य तदवच्छेदकत्वात् । शक्तिभेदस्य च कल्पनामपेक्ष्य विषयतासामान्ये शक्यतावच्छेदकत्वकल्पनाया एव लघुत्वात् तदुच्यते चेत् तन्न तत्प्र
दिपदजन्यविशेष्यधर्मप्रकारकबोधांगीकारे भिन्नविषयकप्रत्यक्षादिकं प्रति तत्तदादिपदजन्यप्रत्यक्षसामग्रीप्रतिबंधकतावच्छेदककोटावुक्तरीत्यानंतशक्ति
ज्ञानेन तत्तत्प्रकारकोपस्थितिनिवेशप्रयुक्तसामग्रीप्रतिबंधकत्वाधिक्येन त्वन्मते महागौरवं मन्मते तु इदंत्वप्रकारकैकशक्तिज्ञानेनोपस्थितिमात्रनि
वेशेन महालाघवमिति । एतदाशयेनैव दीधितिकृता संकेतितेत्यादिनाम्यस्थलांतरे निव्याप्तिरिति व्याख्यातं नापि संकेतितेत्यादिग्रंथो ऽनुपदमेतदाश
येनैवावतारितः । न चातिरिक्तस्यातिरिक्तेतितच्छब्दार्थः तदादिजन्यबोधः समन्यधर्मानिरूपितत्वे कारणतावच्छेदकेद्वत्यस्यैकदेशीकारणत्वेतद्वन्यः
कारणतावच्छेदके पदार्थोपस्थितिनिष्ठकारणतावच्छेदके । अनुप्रवेशमानाभावइत्यत आह व्याख्यायां घटादीत्यादि । अत्र पातिरिक्तस्य पदजन्यत्वे
स्य तत्र प्रवेशेपि अधिकं प्रविष्टमिति न्यायेन तादृशनिश्चयत्वे न हेतुत्वमक्षतमेवेति चेदत्र केचित् । तादृशनिश्चयत्वपर्याप्तावच्छेदकत्वे कारणता
यां निवेश्यं उपदर्शितस्थले च तादृशनिश्चयत्वेन कारणतावच्छेदकतायाः पर्याप्तिः पदजन्यत्वस्याधिकस्यावच्छेदकशरीरे प्रवेशात्पि तु पदजन्य
त्वांतर्भावेणैवेति नातिव्याप्तिरित्याहुः । केचित्तु तादृशनिश्चयत्वनिष्ठनिरवच्छिन्नावच्छेदकताकत्वे कारणतायां निवेश्यं उक्तस्थले च तादृशनि
श्चयत्वनिष्ठावच्छेदकतायाः पदजन्यत्वावच्छिन्नत्वान्नातिव्याप्तिरिति वदंति । अन्ये तु स्वनिरूपकनिरूपितत्वसंबंधेन व्यापकत्वपदार्थविषयकत्वा
तिरिक्तनिष्ठावच्छेदकताविशिष्टान्यनिश्चयत्वनिष्ठावच्छेदकताकत्वे कारणतायां निवेश्यं उक्तस्थले च निश्चयत्वनिष्ठावच्छेदकतायाः उक्तसं
बंधेन पदजन्यत्वनिष्ठावच्छेदकताविशिष्टत्वान्न दोष इत्याहुः । अपरे तु तादृशनिश्चयत्वाघटकधर्मघटितधर्मानवच्छिन्नत्वं कारणतायां
विवक्षणीयं पदार्थोपस्थिते अकारणतानतथाविधधर्मानवच्छिन्नातदवच्छेदककोटौ पदजन्यत्वस्यानिविष्टतया तादृशजनकतावच्छे

एकधर्मस्य तादृशनिश्चयत्वाघटकपदजन्यत्वघटितत्वादिति नातिव्याप्तिरित्याहुः। वस्तुतस्तु पदजन्यत्वानवच्छिन्नत्वमधिकं कारणतायां नि
वेशनीयं पदार्थोपस्थितिकारणतायाश्च पदजन्यत्वावच्छिन्नत्वान्नातिव्याप्तिरिति। अन्ये तु पदजन्यतादृशनिश्चये पदजन्यतादृशनिश्चयेतरा
वृत्तित्वे सति सकलतादृशनिश्चयवृत्तित्वरूपं पदजन्यतादृशनिश्चयत्वं परामर्शे तु शुद्धतादृशनिश्चयेतरत्वादिघटिततादृशनिश्चयत्वमिति
विभिन्नभेदघटितत्वान्नोभयसाधारण्यमेकं निश्चयत्वमिति नोक्तदोष इत्याहुः। एतदस्वरसादेव निश्चयत्वस्येत्यादीत्यपि कश्चिद्वाक्ये त्व
शादिपदसाधारण्याय आहुः। तस्याघटोपस्थापकेति। घटोपस्थापकत्वं घटोपस्थितिजनकत्वं तत्तद्वत्त्वेनेति तृतीयार्थोऽवच्छिन्नत्वमन्वेति एकसंबंधि
ज्ञानत्वावच्छिन्नापरसंबंधिस्मारकतावच्छेदककोटौ संबंधस्य निवेशात् न च घटोपस्थितिजनकत्वेन ज्ञानकत्वे अन्यप्रतीत्यन्यथासिद्धिरिति वा
च्यं तत्रान्यस्मिन्नपि ज्ञाननुगुणत्वनिवेशात् अन्यथा कोमलत्वं गन्धदन्तुत्यादेन दृष्टदंष्ट्रत्वेन दंष्ट्राहेतुतानुपपत्तेः दृष्टत्वस्यापि जनकत्व
रूपत्वात् तस्यास्वजन्येति स्वजन्यत्वं स्वनिष्ठजनकतानिरूपितजन्यत्वं जनकतायां स्वेत्यस्य स्वोक्तरीत्यान्वयः घटत्वप्रकारकज्ञान
त्वेनैव घटत्वप्रकारकनिश्चयत्वेनैव एवकारेण यदृजन्यत्वमात्रव्यवच्छेदः यथाश्रुते निश्चयत्वानिवेशे नातिव्याप्त्यभावादेवतादृशसंग
तेः न च प्रकृते त्यक्तादिसाधारण्येन रूपेणाहेतुत्वे इति प्रसंगः जन्यघटाद्युपस्थितिरूपव्यापारसंबंधेन घटादिपदज्ञानस्याहेतुत्वात्
त्वेन च घटादिपदज्ञानस्य समवायसंबंधेन हेतुता व्यापारस्य पदजन्यघटत्वप्रकारकज्ञानत्वादिनेत्येव किं न स्यादिति वाच्यं कारणतास्य
व्यापारसंबंधेनैव कारणत्वात् अन्यथा व्यापारसंबंधावच्छिन्नकारणत्वरूपकरणत्वस्यैवानुपपत्तेरित्यस्य प्रागेवोक्तत्वात् तथा

द्बोधापत्तिरिति। न च रत्वाज्जन्यघटोपस्थितिर्व्यापार इति पूर्वमुक्तत्वात् कथमेतदिति वाच्यं। करणस्य स्वजन्यव्यापारमात्रसंबंधे
न हेतुतया घटपदज्ञानस्य रत्वास्वजन्योपस्थितिरूपव्यापारसंबंधेनैव हेतुत्वं न तु घटनिवेशः। तादृशव्यापारत्वे च घटोपस्थिताविव
पटोपस्थितावप्यक्षतमित्याशयात्। न चैतदापत्तिवारणायैव घटनिवेशः तन्निवेशं विनैव वक्ष्यमाणादिशा तदापत्तेर्वारणीयत्वात्
यद्वा घटरशाद्बोधापत्तिः घटरशाद्बोधस्वीकारापत्तिः करणस्य स्वजन्यव्यापारसंबंधेन फलजनकतया व्यापारत्वस्य घटपटोपस्थि
तिसंबंधेनैव स्वजन्यपटोपस्थिति संबंधे नापि हेतुत्वस्य स्वीकर्तुमुचितत्वादित्याशयः रष्टत्वादिति। एतेनार्थताजनकव्यावृत्तरू
पेण कारणत्वे संभवति तत्ताधारणरूपेण कारणतायाः अन्याप्यतया प्रकारांतरेण घटोपस्थितिव्यावृत्तपदजन्यघटत्वप्रका
रकनिश्चयत्वमेव घटरशाद्बोधजनकतावच्छेदकमिति परास्तं। तस्या अपि स्वरूपयोग्यत्वेनार्थताजनकत्वाभावात्। तथैव रुत्तरी
त्यैव घटबोधकविधया उद्बोधकत्वेन वृत्तीयार्थो वैशिष्ट्यं पदज्ञानान्वितं। तस्य व्यापारस्य अवांतरवाक्यार्थबोधपूर्वकमहावाक्यार्थबो
धस्थले स्मरणरूपव्यापारासंभवादाह घरशाद्बोधरूपतयाचेति वाकारश्चार्थे अनवस्थितविकल्पार्थः तथा चोद्बोधकपदज्ञानान्यतरवि
धयास्वजन्यघटाद्युपस्थितिर्व्यापारः उक्तस्थले चावांतरवाक्यार्थबोध एव व्यापारः। न चाननुगमः संबंधाननुगमस्यादोषत्वा
त्। तद्वारणाय निश्चयभिन्नमात्रवारणाय संशयान्यज्ञानत्वस्येति। प्रकारांतरेणोपस्थितित्तत्संशये ज्ञादेरपि स्वरूपयोग्यत्वे
न तत्साधारणघटत्वप्रकारकत्वादिनैव व्यापारस्य हेतुतेत्याशयः। न चैवं सति सविषयकत्वे सप्रकारकत्वं वा तदवच्छेदकमन्य

।।ज्ञानं तद्विषयतानां प्रकारतानां वा तत्त्वेऽगौरवात्। प्रकारतासंबंधेन घटत्वादिकमेव तत्तदनुमितित्वादिलाघवादिति चेद्दुष्टत्वात्। यत्त्वेवं सति वु
ल्पन्यायाव्याप्तिज्ञानस्यापि स्वजन्यपरामर्शसंबंधेन जनकत्वे परामर्शस्यानुमितिजनकतायामपि निरूपयत्वं न निवेशनीयमित्यसं
भवेदिति तन्न। तत्र निविष्टस्य विशेषणज्ञानविधया जन्यत्वस्य संशयात्मकपरामर्शसाधारण्यात्। अथ तत्र संशयान्यत्वनिवेशेऽपि ज्ञा
नत्वनिवेशे मानाभावः इच्छादेर्विशेषणज्ञानविधया व्याप्तिज्ञानजन्यत्वाभावेन ततोऽनुमित्यापत्त्याभावादिति चेन्न विशेषणज्ञानं
स्य विशेषणाविषयकत्वेन हेतुत्वे इच्छादिसाधारणतत्प्रकारकत्वस्यैव कार्यतावच्छेदकतया ततोऽनुमितिवारणाय ज्ञानत्वनिवेश
स्यावश्यकत्वात्। अत एवेच्छादितः संस्कारात् वेत्यादिज्ञानत्वेनैव तत्र हेतुत्वाद्वित्यतो ग्रन्थे दीधितिरपि संगच्छते अन्यथोक्तरी
त्या तस्यासंगतेः यद्वा विशिष्टबुद्धित्वावच्छिन्नं प्रति विशेषणज्ञानत्वेन हेतुतायां तदा ज्ञाननिवेशप्रत एव तत्र ज्ञानत्वं संशयान्यत्वेऽरु
पनिष्ठयत्वावच्छिन्नप्रकारतानायाप्तावत्तु क्षणघटकस्याव्यवनासंभवः इत्याहुः इत्युदारसङ्क्षेपोक्तयुक्त्यापरजन्यत्वं न
निविष्टमिति ज्ञानत्वमधिकं प्रविष्टमित्थं क्रियैव संगतेति केचित्तु ननु स्मृतिनिष्ठादोषभयसाधारणोपदर्जन्यत्वेनैक
स्कतावच्छेदकविभाजनादेत्वस्यैव एवापदर्थज्ञानस्य जनकत्वात्तत्तः पदजन्यत्वं संसर्गविधयैव प्रविष्टं संसर्गानतु
गमस्यारोपत्वात्। तथा च शाब्दबोधं प्रति वह्निव्याप्यधूमवत्पर्वतानित्ययत्वेन हेतुतायां पदजन्यत्वावच्छिन्नसमवा

च्छिन्ना २ प न२

मावत्वस्योभयाभावत्वादुपाधेःसाधनाव्यापकतानुपपत्तिरिर्वारैवो वचेन्न एकव्यक्तिवृत्तिप्रतियोगिवद्विशेषाभाववत्त्वेन यावद्विशेषाभावे उभयाभाव
विवक्षणे न एकावच्छिन्नो वृत्तित्वाभिमतस्य स्वभिन्नैकस्य । किंतु वृत्तिप्रतियोगिवद्विशेषाभावावच्छेदकावच्छिन्नवृत्तित्वार्थकत्वेन वा पर्याप्तिकवृत्तित्व स२
निखिलतत्तत्संयोगाभावानामेकावच्छेदकाभावेनोपाधेः साधनाव्यापकत्वोपकत्वोपपत्तेः अत्र बहवः एकावच्छेदेनैतस्य विभिन्नावच्छेदकानु
वच्छिन्नप्रतियोगिवद्विशेषाभाववत्वार्थकस्य फलतो निरवच्छिन्नवृत्तिकप्रतियोगिवद्विशेषाभाववत्वमित्यर्थः तस्य मूलावच्छेदेन कपिसंयोगसामान्या
वृत्तेयाप भाववति वृक्षे प्रतियोगिवद्विशेषाभावांतः तथा तद्वृक्षीयतत्कपिसंयोगाभावस्य मूलावच्छिन्नवृत्तिकतया सामान्यतः साध्यव्यापकत्वासंभवेऽपि प्र६
गुणसंयोगाभावादिपसंयोगसामान्याभावरूपपर्यवसितसाध्यव्यापकतयोपाधित्वनिर्वाहः इत्याहुः तन्न तथा सति विशेषणतावच्छेदकस्य
स्यानिर्णयात्वोपाधेरप्रसिद्धिवत्त्वेन तद्रूपेणासाध्यानिर्वाजित्वापत्तेः नवीनास्तु प्रतियोग्यधिकरणात्वरूपपक्षधर्मावच्छिन्नसामान्याभावरूपसाध्य
व्यापकतया एकावच्छेदेनैव मते पर्याप्तस्यैवोपाधिता निर्वाहः यत्र प्रतियोगितिव्यस्य सामान्याभावस्यैकावच्छेदेन तस्य यावद्विशेषाभावव
त्वमिति सामान्यव्याप्तेः कपिसंयोगादिमतः कपिसंयोगादिसामान्याभावाधिकरणवृक्षादेरेकावच्छेदेन कपिसंयोगविशेषाभाववत्वे
त्वनियमेन सुवृत्ततया गुणादावेकावच्छेदेन यावद्विशेषाभाववत्वेऽपि तत्र प्रतियोग्यसत्त्वेन प्रतियोग्यधिकरणात्वाव । छिन्नसाध्यव्याप
कत्वोपपत्तेः नच वृक्षांतरीयकपिसंयोगाभावाभिमतवृक्षे कपिसंयोगाधिकरणे निरवच्छिन्नवृत्तितया यथाश्रुतस्य साध्यव्यापकत्वासंभव
एवेति वाच्यं इतवृक्षस्य वृक्षांतरीयकपिसंयोगाभावप्रतियोगिवृक्षांतरीयकपिसंयोगानधिकरणत्वादिति प्राहुः सर्वं [illegible] विस्तरेणाग्रे धितो संयोग

चं१ गा२

गु३ नि सा व्य२ ध४

शि·म·प्र सामान्याभाववानित्यादिरनुव्याप्तिर्विधाकपि स्वंवक्ष्यमाणः दोषांतरमाह व्यर्थेति त्वन्मते संयोगसामान्याभावस्यापि केवलान्वयितया भाववत्वादित्यस्यैवमप्युक्तेन
१७ तरांशस्य व्यर्थत्वादिति भावः नन्वपूर्व्वहेतावपीदं कुतो नोक्तमिति चाच्यं तत्र रूपत्वादिघटिते हेतावितरांशानिवेशे व्यभिचारात् उपाध्यंतरमप्याह निर्गुणा
त्वादेरिति निर्गुणत्वपादिपेशगासत्ताभाववत्वेन दानसाधनाव्यापकत्वसंयोगाभाववदेतस्यापि तेन द्रव्ये भीकारसंभवादित्याह व्याप्ये त्यापी निर्गुणत्वमिति
न ध्वसनुमानामिति द्रव्यत्वस्य पाठानं संयोगविशेषाभाववत्वं संयोगसामान्याभावव्यभिचारित्वादिति व्यभिचारानुमानमपि न संभवतीति सिद्धसाधना गुणत्व
तेन च प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वरूपव्यभिचारानुमानेनासिद्धसाधनमिति वाच्यं द्रव्ये संयोगसामान्याभावसंदेहदशायां तस्यका व्यभिचारित्वा दिति
नि६ व्यभिचारित्वेनानिश्चितसाधनासंभवादित्यपि द्रष्टव्यं पदाभावाधिकरणपदं व्याप्यधर्मावच्छिन्नप्रतियोगिताकपावदभावाधिकरणत्वोपयोगि
नः पदार्थस्य तदभावावच्छेदकत्वरूपविशिष्टाभावावच्छेदकं त्वत्र यदनवच्छेदकाभिन्नत्वं तदभावावच्छेदकाभिन्नत्वं चावच्छेदकत्वं स्व
रूपसंबंधविशेषएवेति ध्येयं नगुणाधिकरणावृत्तित्वसत्तिकालेप्यव्याप्ति निर्गुणाभावानभ्युपगमादिति भावः दीधितौ संयोगसामा
न्यस्येति द्रव्यत्वादौ संयोगस्य भिन्नत्वेपीसादि द्रव्यत्वादौ साद्ध्यादिना द्रव्यत्वादिघटितहे सद्धैवचत्वादिति तथा च द्रव्यत्वादौ संयोगानवच्छे
दकत्वेनैव संयोगाभावावच्छेदकत्वं साधनीयं तच्च स्वरूपासिद्ध्या न संभवतीति भावः ननु द्रव्यत्वादौ सर्वावच्छेदेन द्रव्यनिराकाशसंयोगोव्याप्यवृत्ति
रेव तन्नत एव च तस्यैकत्वं तथा च द्रव्यत्वादौ संयोगस्याभिन्नत्वात् किं द्रव्यत्वादौ संयोगसामान्यावच्छेदकत्वे प्रिप्याविशेषगते साधनेनानेकाने व्याख्यापान
चिसादि त्याकाशसंयोग एवेति द्रव्यत्वादाविति शेषः किं चिदिति तथा च स विषयापादविषयवृत्तिजातेरव्याप्यवृत्तित्वे निर्दृत्तित्वाभावनियमेन राम
न स्याप्यव्याप्यवृत्तित्वमेवेति भावः नवत्वादिरेव न तस्यैकव्याप्यवृत्तित्वासिद्धेः तादृशनियमनाभाववत्त्वसत्त्वात् आह आकाशे इति द्रव्यत्वाद्यवृत्तिरस्याकाशम १७

क्ष्ये १ ग १ दे १

योगस्येत्यादिके चित्तु तदभावाधिकरणत्वादिनोत्पत्त्याहोस्वित्संयोगगगनसंयोगाभावासंभवेनैव स्वरूपासिद्धिरूप असंभवेऽयुक्तत्वाद्दोषः संयोगावच्छेदकत्वसा
धनाय दीधितिकारयत्नो निष्फलत्वं सार्थक्यं निषेधति त्वाकाशेत्यादीत्याहुः दीधितौ संप्रदायविद इतिकपिशाच्चसंयोगाभावः प्रतियोगिसमानाधिकरणा
इतिवक्ष्यमाणमूलासंगतिरवासरसः तेषव संगमयत्राह नवीना इतिगुणस्येति ध्वंसप्रागभावयोरत्यन्ताभावविशेषित्वस्य दूषितत्वादितिभावः तथा
च संयोगत्वव्यापकगुणत्वावच्छिन्नाभावसत्वे संयोगत्वावच्छिन्नाभावस्यावश्यतरां सत्वमितिसूचितं तत्कालावच्छेदेन घटादौ गुणसामान्याभावे
मानाभावः न च तत्र प्रत्यक्षंप्रमाणासंभवति संनिकर्षाभावात् न च रूपादिवत्सभावप्रत्यक्षे तु चित्तेनतासंयुक्तसमवेतविशेषणतैवात्रासंनि
क्ष८ कर्ष इतिवाच्यं तथापि आत्मरूपद्रव्यवृत्त्यभावप्रत्यक्षे हेतुत्वेन क्लृप्तायाः संयुक्तविशेषणताया विनिगमनाविरहेणात्र हेतुतयाऽऽदरभावेन तत्र
७ क्षा सन्निकर्षसंभवात् परमाणुरूपादावभावप्रत्यक्षवारणाय संयुक्ताशे महत्त्वस्यावश्यं निवेशनीयतया त्रुटिवृत्त्यभावप्रत्यक्षे निर्वाहेण तत्कार्यताव क्षा७
च्छेदककोटौ समवेतत्वांशे द्रव्यान्यत्वांशनिवेशस्यावश्यकतया तेन द्रव्यवृत्त्यभावप्रत्यक्षस्याश्रयहेणाहृदिन्द्रियसंयुक्तविशेषणताया एव द्रव्यवृत्त्यभावप्र
त्यक्षजनकत्वात् न च रूपादिमति रूपाद्यभावप्रत्यक्षवारणाय रूपादिकं प्रति रूपाद्यभावत्वादिना हेतुत्वस्यावश्यकतया तद्धीनतत्र रूपाद्यभावेऽसि ग३
द्धेर्गुणसामान्याभावोऽप्यर्थासिद्ध एवेति वाच्यं एवमपि संयोगादिमति संयोगादेरसत्त्वादेन संयोगादिकं प्रति संयोगाद्यभावस्याहेतुतया गुणसा
मान्याभावसिद्धेरसंभवात् यत्तु तत्र वैरुप्यतो सामग्र्यभावेन तत्र गुणसामान्याभावोऽनुमेय इति तन्न पक्षतारोहि पक्षत्वे सामग्र्यभावस्तेऽन्य
रस्तत्र कार्याभावस्तेनानुमीयते अन्यथाति प्रसंगात् तत्कालोत्पत्तिकस्य सगौ घटे तत्सामग्र्यभावस्तदा घटस्यासत्त्वात् तत्रस्थानात् एव सारोपितत्वमि

स्य ५ क्ष न्य

भ.प्र. न घटे गुणसामान्याभाववति छिन्नसंगादित्विवेदश्च केचित् तदा तन्नजसैकत्वे हेतुभूतस्य एकत्वात्वावच्छिन्नाभावस्यापि च दृष्टकत्पात्स्येव स्वसमनि
१८ पत्तगुणसामान्याभावरूपत्वापातात् छिद्रविकले साहस्रसैस्यैकत्वाभावरूपत्वेष्टरिमाणाभावादिभिस्सर्मावनियतत्वाविरहेणाद्रव्यत्वाभा
वरूपता यास्वीकारात् सामन्यवं हितो स्यगास्यासा । निमर्वतभावकार्यवत्त्वनियमस्येवास्य पर्मकार्यसरेखतिवक्क त्वेमोनानाभावेन ग३
तदासकत्वाभावस्याप्यसिद्धेः सामान्यात्मक घटो गुणसामान्याभाववान् न चान्यत्वादि सत्तामानमेव तस्य तदानीं तत्र सत्वे माने न चाप्रयोजकत्वं
गुणसामान्याभावत्वं यदि जन्यत्व स्मिन्प्रतियोगिमद्विकरणाभावप्रतियोगितावच्छेदकं स्यात् तदा उत्पत्तिकालावच्छिन्नजन्यवृत्त्यभावप्रतियोगि योगि
तावच्छेदकं स्यादित्यनुकूलतर्कसत्वात् तस्य च फलतो जन्ये उत्पत्तिकाले गुणास्यापत्तिपर्यवसानात् न च प्रागभाव एव तद्गुणत्वाव
७भि च्छिन्नप्रतियोगिताकत्वं प्रागभावादेस्तन्नाभावस्यातिरिक्तस्याकल्पने न लाघवादिति वाच्यं अनंतप्रागभावेषु तत्कल्पनापेक्षया
तदतिरिक्तत्वकल्पनाया एव लघुत्वात् प्रागभावस्यैव विनिराकरिष्यमाणत्वाच्चेति प्रागुः घल्पेति महापल्लयेसर्थः जन्याभाववधिकरणा
सु स्यानुत्तरोसंयोगाभाववत्त्वमितिभावः द्रव्यस्यापि व्याप्यवृत्तित्वमाहतत्ययेति किंचेत्यर्थः केचित्तु उत्पत्तिकालावच्छेदेन गुणसामान्याभावेवत्वा
भा २ वच्छेदेन संयोगसामान्याभावाविवक्षणास्य संदिग्धत्वादाहत येसाहुः न्वन्विहपवेतुइत्या दिपतीनेः शिखरेरू तासना वच्छेदकत्वाभा
वो विषयोस्तित्तस्माहवेतेरिति अकंभावित्वमेव विह्स्यैति व्याख्यापाहेव्वापातेस्स्यादिनाप्रथाक चिदृत्ते र्थापहस्तिलेपिहभिमतो राम
व्याप्यवृत्तित्वेन तथा वा क्वचिद्वृत्तेरव्याप्यवृत्ति तिपिहतिमतो व्याप्यवृत्ति विंमत्वि घातिप्रतीतोत्पो द्विसाशपनाशंकते नवोतितन्नाभिसितथावद १८

ष्टांतासिद्धिरिति भावः प्रतियोग्यनधिकरणदेशेतिरिदानीं गोष्ठे गौर्नास्तु मंडपे शयानेत्यादिप्रतीतेस्तत्काले मंडपावच्छेदेन गवाद्यभावस्यावि
षयिकरणादिति भावः प्रतियोग्यनधिकरणकालेति इदानीं गोष्ठे गौर्नतर्हीदानीमित्यादिप्रतीत्या गोष्ठावच्छेदेन तत्कालावच्छेदेन गवाद्यभाव
स्याधिकरणादिति भावः गुणत्वावच्छिन्नाभाववद्रूपवायवच्छिन्नाभावस्याप्यव्याप्यवृत्तितया रूपत्वाद्यवच्छिन्नसाध्यकेपि तद्व्यावृ
त्तिमाह रूपवानिति तत्प्रयोजनाभावादिति संयोगात्मकसाध्याभावस्य हेत्वधिकरणगुणेऽसत्त्वादिति भावः क्वापीति यथा चैतत्तथाग्रे स्फु
टीभविष्यतीति दीधितौ वदंतीत्यनेनास्वरसः सूचितः स चानुमितिजनकज्ञानविषयव्याप्तिस्वरूपस्यैवात्र निर्वक्तव्यत्वेन व्याप्यवृत्तिसाध्य
व्याप्य
केपि साध्याभावस्याव्याप्यवृत्तित्वमहदृशायां प्रतियोगिसमानाधिकरणपदघटितलक्षणस्य साध्यकव्याप्तिज्ञानासंभवेन तदानीं तदनुमितिसंभवापत्त्या तदनुमि
त्यनिर्वाहापत्त्यानुमितिजनकतावच्छेदकवैशिष्ट्ये प्रतियोगिसमानाधिकरणपदविशेषस्याचरणीयकतया सर्वत्रैव तदुपादानमावश्यकम् एतद्दशायां नै
वव्याप्यवृत्तिसाध्यकएव प्रतियोगिसमानाधिकरणपदघटकप्रतियोगितावच्छेदकावच्छिन्नत्वव्याहतिः स्वपदवत्त्वेन एवपदावृत्त्यानियामकसंब
धेनाभावप्रतियोगितावच्छेदकः तेन संबंधेन व्यापकताचाभ्युपेयते तदा तेन संबंधेन व्याप्यवृत्तिसाध्यकेपि साध्यतावच्छेदकसंबंधेन प्रतियोगि
सामानाधिकरणपदमवश्यमुपादेयमेव तथा च नोपादेयं चेत्तादृक् असंगतमेवेति प्रतियोगितावच्छेदकावच्छिन्नेति प्रतियोगितावच्छेदकावच्छि
न्नं च प्रतियोगितावच्छेदकताघटकसंबंधेन बोध्यं अन्यथा वह्नेरपि कालिकसंबंधेन धूमत्वविशिष्टतया धूमाभावस्य प्रतियोगितावच्छेदकाव
च्छिन्नसामानाधिकरण्येन लक्षणघटकतयाव्यभिचारित्वापत्तिप्रसंगापत्तेः अत्र केचित् प्रतियोगिसामानाधिकरण्यमात्रमेव च सम्यक् न तु प्रतियोगिताव

भ. प्र.
१९

८

दकावच्छिन्नत्वपर्यंतनिवेशनस्याप्यावश्यकं विशिष्टसत्तात्वादिनाजात्यादिरूपहेतुसमानाधिकरणाद्यभिनिषेधगपसमानाधिकरणाभावाद्यातिप्रसङ्गित्वप्रमाभं
मवेपिबाधादेवगुणादौ गुणाद्यन्यत्वादिविशिष्टसत्तात्वादिविशिष्टवैशिष्ट्यानुमितिवारणासंभवात् बाधानवतारदशायां च साध्यवत्तानवच्छेदकदेशका
लविशिष्टे साध्यवद्भिन्ने पक्षे साध्यवैशिष्ट्यावगाहिभ्रमानुमितेरिव भ्रमपरामर्शात् भ्रमानुमितेरपि स्वीकारे बाधकाभावात् अत एव बाधग्रंथे मणिगंधप्रागभाव
कालावच्छिन्नो घटो गंधवान् पृथिवीत्वादित्यादौ बाधानवतारदशायां भ्रमात्मकपरामर्शाद्भ्रमानुमितेर्मणिकृतास्वीकारोपि संगच्छते यद्विभ्रमानुमितिजनक
परामर्शस्य कथंचित् भ्रमत्वोपपादनसंभवे भ्रमात्मकपरामर्शात् भ्रमानुमितिस्वीकारेणैव तदुपदर्शितरीत्या भ्रमात्मकपरामर्शाद्भ्रमानुमितिवार
णापत्तौ तेन तत्परामर्शस्य भ्रमत्वनिर्वाहाय प्रतियोगितावच्छेदकावच्छिन्नत्वपर्यंतनिवेशनमावश्यकमेव गंधप्रागभावकालावच्छिन्नो घटो गंधवा
न्पृथिवीत्वादित्यादौ परामर्शस्य कथंचिदपि भ्रमत्वासंभवेनागत्या भ्रमात्मकपरामर्शात् भ्रमात्मकानुमितिस्वीकारो बाधग्रंथे मणिकृतां न विरु
द्ध इति विभाव्यते तथापि तन्निवेशनमफलमेव तदुपलक्षितवत्ताबोधक विशिष्टधीनां स्ववावयोर्वैलक्षण्यापादकविशिष्टवैशिष्ट्यबोधविशिष्टप्रतियोगिकस एवै
बंधस्यैव संबंधतयाभानस्यावश्यकतया विशिष्टवैशिष्ट्यावगाह्यनुमितौ विशिष्टप्रतियोगिकसमवायादेः संबंधतयाभानेन तत्स्यैवसाध्यतावच्छेदकसं
बंधतयाभानेन संबंधेन च विशिष्टाभावस्य यथाश्रुतप्रतियोगिसामानाधिकरण्यस्यैव सुलभत्वात् तदुपलक्षितवैशिष्ट्यबोधे विशिष्टपर्याप्तप्रकारताकु
पलक्षितवत्ताबोधयोरनतिप्रसक्तएव तयोर्वैलक्षण्यनिर्वाहेण विशिष्टवैशिष्ट्यबोधे विशिष्टप्रतियोगिकसंबंधस्य संबंधतया भाने मानाभावदत्र किंच तथापि सत्ता राम
रूपविशेषणस्य सम्यक्समवायादेर्गुणादौ सत्त्वेन गुणादौ गुणान्यत्वादौ विशिष्टसत्तावैशिष्ट्यावगाहित्वस्य भ्रमत्वानिर्वाहेण तस्य यथानुपपत्तेरेव तद्भ्रमत्वात् नचवि १९

शोध्यानुयोगिकसंबंधेस्वरूपतःप्रकारतावच्छेदकविशिष्टप्रतियोगिकत्वपर्यंतस्यप्रवेशेत्वं नियामकत्वोपगमात्कुदपपत्तिरितिवाच्यंत
दुपलक्षितवैशिष्ट्यत्वस्यप्रवेशेत्वानुपपत्तसानेथावक्रमशक्यत्वात् नन्वयादृशधर्मप्रकारतायाःपर्यवसितस्तादृशविमेवैशिष्ट्यप्रतियोगितायां
स्वरूपसंसर्गतापर्याप्तेरेवसर्वत्रप्रमात्वनियामकत्वान्नदोषइतिवाच्यंतथापिवि[redacted]शिष्टाभावविस्वयस्यविशिष्टवैशिष्ट्यज्ञानेप्रतिबध्यतत्तूपल
क्षितवैशिष्ट्यज्ञानमितिनियमनिर्वाहायविशिष्टवैशिष्ट्यबोधेविशिष्टप्रतियोगिकसंबंधभानस्यावश्यकत्वादितिवदंतितन्नविंसाविशिष्टपर्य
तिप्रकारता[redacted]पाएवविशिष्टाभावनिश्चयप्रतिबध्यतावच्छेदकत्वोपगमेनैवोक्तनियमनिर्वाहात ... तेनचाद्रिर्नास्तिमहानसीयवह्निमा
दिबुद्धेबुध्द्यादिविशेषविषयप्रतिबध्यत्वादिनियमस्यविशेषणतावि[redacted] विलक्षणतापाएवनिर्वाहेरातानोतिपोगिरोगीभवद्वह्निः ... दुहेन
हा[redacted]न[redacted]सीयत्वसहितवह्निस्वावच्छिन्नवैशिष्ट्य ... प्रतियोगिताकत्वभानस्याविरोधाय[redacted]सोथाभावप्रतियोगितायास्तादृशधर्मावच्छिन्नत्वमेवचत्ता
द्धर्मावच्छिन्नविरोधितावीजमित्यभावप्रतियोगितायांतत्तद्धर्मावच्छिन्नत्वभानमे[redacted]वाभावबुद्धिप्रतियोगिमज्ज्ञानबुद्ध्योर्विरोधिवीजंतथाप्रतियोगिवैशि
ष्ट्यविशिष्टप्रतियोगिकत्वतदंशेषेनविशिष्टाभावस्यविरोधिवीजमितितन्नतत्तमानमेवहिशिष्टाभावबुद्धिविरोधितायांजनकमितिविशिष्ट
वैशिष्ट्यबोधेविशिष्टसंबंधभाननावश्यकमिसपिनिरस्तं दृष्टेतिश्चनुभवसिद्धस्यतत्तद्धर्मादिविप्रतियोगिताकत्वभाव[redacted]स्यासंभवात्के
पत्यान्तरस्यविरोधिवीजस्याभीस्तोपिदाहृष्टांतकेविषोपराग।विषयताविलक्षणतायाएवविरोधितानिर्वाहकत्वात्विरोधबीजतायाःका
रसमायाणाभावात् अतएवविशिष्टाभावोपलक्षिताभावयोर्वैलक्षण्यायविशिष्टप्रतियोगिकसंबंधस्यविशिष्टाभावप्रतियोगितावच्छेदकसंबंधत्वमु

यता
त्वप्रति

नी
प्र
य
प्रयो ४

कारे
त्वे

भा·प्र: द्धसंबंधस्योपलक्षिताभावीयप्रतियोगितावच्छेदकत्वमित्यवश्यमुपेयं तथाच विशिष्टसत्ताद्यभावस्य प्रतियोगितावच्छेदकेन विशिष्टसमवायादिसंबंधेन यथाश्रुतमेव प्रतियोग्यसा
२० मानाधिकरण्यं निर्वहतीति प्रतियोगितावच्छेदकावच्छिन्नत्वपर्यन्तनिवेशो ज्ञानीयमित्यपि प्रत्युक्तं विशेषणत्वोपलक्षणत्वाभ्यां प्रतियोगितावच्छेदकतावैलक्षण्यादेव त
योर्वैलक्षण्यनिर्वाहात् एकत्वप्रागभावविशिष्टघटादेः संयोगादिसंबंधेनाभावस्य प्रतियोगितायामप्रसिद्धतया विशिष्टनिरूपितसंयोगादेरवच्छेदकत्वासंभवाच्च वस्तुत
स्तु यद्रूपेण प्रतियोगितावच्छेदकविशिष्टसंबंधतात्पर्यावच्छिन्नस्यैव प्रतियोगितावच्छेदकसंबंधपदार्थत्वेन विशिष्टसमवायस्यापि समवायत्वेनैव संबंधतया तदवच्छिन्न
स्य गुणादौ सत्त्वेन प्रतियोगितावच्छेदकावच्छिन्नत्वोपादानं विना तिप्रसंगवारणासंभवेन तदुपादानमावश्यकं न च न तदुपादाने कथं न दूषणमिति वाच्यं तदुपादानेन प्रतियोगि
तावच्छेदकविशिष्टप्रतियोगिकप्रतियोगितावच्छेदकसंबंधात्मकस्य प्रतियोगितावच्छेदकसंबंधेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिसंबंधित्वस्य लाभेन प्रकृते न विशि
ष्टावच्छिन्नसमवायस्यैव विशेष्यसंबंधत्वेन गुणादौ तदभावादिति समस्तद्वयावधातव्यम् अस्यां एकत्वेऽपि विशिष्टसत्तासाध्यकस्थले पत्तन्नभेदत्वोभयत्वावच्छिन्नसाध्य
के स्वरूपेणास्वरूपसंबंधेन भूतत्वमूर्तत्वोभयावृत्तिविशेषगुणविशेषपरिमाणविशेषरूपत्वेन अनुगमेन भूतत्वाद्यनुगताकारप्रतीत्यनिर्वाहः एवं पृथिव्यादिचतुष्टयवृत्तिनिर्गुणत्वके र्म
न्यभावेनोभयाभावस्य यथाश्रुतप्रतियोग्यसामानाधिकरण्यसंभवेन प्रतियोगितावच्छेदकावच्छिन्नत्वस्य माहात्म्यसंगतिरयीति तत्र यो रूपत्वं भत्वादि रूपत्वमित्याद्याशयः
प्रतियोगिवैयधिकरण्यप्रवेशादिति तथाच व्याप्तिरेव न संभवतीति भावः अत्र ब्रूते तिरस्कारसंगतं अव्याप्यवृत्तिसाध्यकस्थलीयप्रतियोगिवैयधिकरण्यघटितलक्षणस्ये
व व्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिव्याप्तिः संभवात् अव्याप्यवृत्तित्वादेर्लक्षणाप्रवेशेन प्रकृतहेतु साध्यस्यानेन व्यभिचारिहेतुसाध्ययोर्निवेशेन लक्षणस्य स्वव्याप्तिव्याप्ति
पदार्थत्वात् अन्यथा तन्मते तु साध्यघटितलक्षणस्यान्यत्र कथमप्यसंभवेन क्वाप्यतिव्याप्तेरसंभवापत्तेरिति अत्रोच्यते विषयतया अनुमितिजनकतावच्छेदकव्या
प्तेरेव निर्वक्तव्यतया तत्त्वानस्य व्यतिरेकव्यभिचार एव वा व्याप्तिः अन्वयव्यभिचार एव चातिव्याप्तिः एवं चाव्याप्यवृत्तिसाध्यकस्थलीयप्रतियोगिवैयधिकरण्यघटितव्या
प्तित्वानस्य व्याप्यवृत्तिसाध्यकसद्धेतौ प्रतियोगिवैयधिकरण्याघटितव्याप्तित्वानादनुमित्युदयेन व्यतिरेकव्यभिचारपर्यवसन्नाव्याप्तिवारणाय याव्याप्यवृत्तिसाध्य राम:
कानुमितित्वमेव तत्त्वनतावच्छेदकं वाच्यमिति अन्वयव्यभिचारपर्यवसन्नोक्तव्याप्यवृत्तिसाध्यकोक्तिव्याप्तेरप्यसंभवः व्याप्यवृत्तिसाध्यकानुमितित्वस्य तादृशच्छेदका २०

नाक्रांतत्वेनापत्त्यभावात् ननु अव्याप्यवृत्तिसाध्यस्यापि व्याप्यवृत्तित्वभ्रमदशायां प्रतियोगिवैयधिकरण्याघटितव्याप्तिज्ञानादेवानुमित्युदयेन तत्र तद्घटितव्या
प्तिज्ञानस्य व्यतिरेकव्यभिचारो दुर्वारः अव्याप्यवृत्तित्वेन ज्ञायमानसाध्यकानुमितित्वस्य तज्जन्यतावच्छेदकत्वे च व्याप्यवृत्तित्वविशिष्टसाध्यकानुमितेरव्याप्यवृत्तित्वभ्रमदशा
यां तत्साध्यकव्यभिचारिण्युत्पत्त्या निर्दुर्वारैवेति चेन्न व्याप्यवृत्तित्वेनाव्याप्यवृत्तित्वभ्रमो न स्वीक्रियते तत्स्वीकारे व्याप्यवृत्तित्वस्य लिङ्गावच्छेदकविशेषान्तर्भावेण प्रतिबध्य
प्रतिबन्धकभावकल्पने गौरवेतरस्वीकारेव सामान्यतस्तद्वृत्तित्वनिश्चयत्वेन तदभावज्ञानत्वेन च प्रतिबध्यप्रतिबन्धकभावकल्पने लाघवे अव्याप्यवृत्तित्वेच एका
वच्छेदकान्तर्भावेण प्रतिबध्यप्रतिबन्धकभावानुभवबलाद् गत्यास्यपि यद्द्रतिमताचलेवनेनेतस्याकत्वादिति सुधीभिर्विभाव्यं यावत्तोमम्भनेनिरस्तमिति दीधितौ न
चेति उभयत्वमिति सर्वत्रेति शेषः तथाचैववैशिष्ट्यातिरिक्तोभयत्वेङ्कापि नास्तीत्याशयः तेन द्रव्यवृत्तिगुणरूपोभयत्वस्यापि घटवृद्धि विशेष्यविधेयत्वरूपोभयत्वस्यवाय
त्र साध्यतावच्छेदकत्वे तत्र प्रतियोगितावच्छेदकावच्छिन्नत्वव्याप्तिसंभवतीत्याशङ्का निराकृता तादृशोभयत्वेहि नैसादिन्य त्रैलाविशिष्टत्वादतिरिक्तोभयत्वमित्युपपत्त्यान
घटस्यायेन नञ्द्वयाभिधाने निष्फलत्वं नञ्चोभयत्वत्वावच्छेदेन वैशिष्ट्यात्मकत्वाभावबोधायन नञ्द्वयाभिधानं नञ्सोनुयोगितावच्छेदकावच्छेदेनाभावबोधकत्व
स्यसत्त्वेरितिवाच्यं नकलेनभेदयोरित्यादौ गुरुमते कार्यत्वसामानाधिकरण्येन नञ्द्वयान्वयेन सर्वमतस्य वधुमत्त्वसामानाधिकरण्येन व्याप्तिनिश्चयकालीनधूमो
वह्निव्याप्योनवेति संशयस्य धूमोवह्निव्याप्योनवेति शब्देनोल्लेखेन च तस्य नियमासंभवेन भावान्वयबोधौत्सर्गिकत्वात् न विशिष्टत्वमिस्तुनपापितद्बोधसंभवेनत
द्वयेन नञ्द्वयाभिधाने नैष्फल्यं दुर्वारस्याद्वेत्यचिरत्नकेचित् अत्र वैशिष्ट्यभेदसाधकस्य वैशिष्ट्यविरहेपि घटत्वपटत्वयोरित्यादिहेतोः घटत्वांशेघटत्व
वैशिष्ट्यस्य ज्ञानाविषयत्वेपि तदुभयत्वस्य प्रत्यक्षविषयत्वादित्यर्थः तदंशे घटत्ववैशिष्ट्याविषयकप्रत्यक्षविषयत्वादितियावत् फलितोर्थो वैशिष्ट्यत्वेना
नवच्छिन्नविधेयितानिरूपकत्वादितिपर्यवसितोर्थः एकंच संख्यापरिमाणोभयत्वेतानमिसादौ संख्यापरिमाणोभयत्वस्यफलतं तेसादृशैकज्ञानविषय
त्वरूपतयावैशिष्ट्यस्यापि तत्र संख्याविधेयिविषयत्वरूपस्यफलत्वेतादृशविषयत्वरूपतयातयोर्भेदासम्भवेन यथाश्रुतस्य वैशिष्ट्यभेदरूपसाध्यस्याशनीवा
धायमिति तियथोक्तहेतुपर्यवसन्नवैशिष्ट्यभेदएवसाध्यत्वेनानुसरणीयइतिसाध्यहेतोरविशेषइति नञ्द्वयाभिधानेतेन वैशिष्ट्यत्वेनानवच्छिन्नविधेयिता
निरूपकत्वाभावाभाववदितिसाध्यंतादृशविधेयितानिरूपकत्वादित्येव हेतुरितिपर्यवसितं वैशिष्ट्यत्वावच्छिन्नविधेयित्वउभयत्वत्वावच्छिन्नविधेयित्वयोर्भेदा

भा.प्र.
२१

ज्ञानपर्योक्तबाधः असमानप्रकारकतयावहेतोर्भानं न सिद्धसाधनतया विरोधि न हि वह्निमद्दिति तत्तानैकस्य भावाभावकरस्य नुमितौ विरोधीति कश्चिदस्यापेती स्याहुः अभे
दत्तुभयत्वस्य वैशिष्ट्यस्य चैकस्याभावेन विशिष्टैव यद्रूपत्वेन साध्यत्वेन च घटत्वपटत्वोभयत्वे घटत्वविशिष्टपटत्वादतिरिक्तमित्यादिरूपेणोऽव साध्यतायां च घटत्ववि
शिष्टपटत्वाप्रसिद्ध्या साध्याप्रसिद्धिरिति तद्वारणाय घटत्ववैशिष्ट्यविषयितानिरूपितपटत्वविषयिताशून्यप्रतीतिविषयत्वमेव साध्यं कर्तव्यं तादृशी विषयिता च
भ्रमस्य च प्रसिद्धा तथा च हेतोः साध्याविरोधः वैशिष्ट्यविरहेऽपि भ्रमत्वस्य प्रसिद्धत्वादित्यस्यापि वैशिष्ट्यविषयिताशून्यत्वरूपविषयत्वरूपस्यैवार्थपर्यवसानादिति न उद्
यमार्थे साध्यनिर्देशः तेन तादृशविषयिताशून्यप्रतीतौ संन्यप्रतीत्यविषयत्वरूपमेव साध्यं करणीयमिति निरोक्तदोषः स्याहुः वस्तुतस्तु अत्र घटत्वपटत्वोभयत्वत्वादिरूप
णान्यरूपतोभयत्वस्य वैशिष्ट्यानतिरिक्तत्ववादिमते तस्यालीकत्वात् किं तु प्रसिद्धतावदुभयत्वव्यक्तीनां तावद्विषयकतानविषयत्वरूपेणैव यथार्थ न च सामान्येन रूप
णपद्रूपत्वे घटत्वपटत्वयोः सारिहेतोर्भागासिद्धिरिति वाच्यं सामान्येन विरुद्धत्वतानकालीनेतत्तद्वैशिष्ट्यविषयिताशून्यप्रत्यक्षविषयत्वादिरूपस्यैव हेतुत्वात् घटत्वपटत्व
योरित्युक्तिस्तु विरुद्धत्वतानुकालीनत्वस्फोरणायैव एवं च सार्वभौममते न रूपेण वैशिष्ट्याभेदः साधनीयः अस्माभिरपि तेन रूपेण तदतिरेकः साधनीयः न हि तेन सा
मान्यतो वैशिष्ट्याभेदः साधयितुं शक्यते वैशिष्ट्यस्यैकस्याभावात् नापि तत्तद्वैशिष्ट्याभेदः बाधात् किं तु तत्तद्वैशिष्ट्यातिरिक्तभेदस्य च साधनीयः अस्माभिरपि तदति
रेक एव साधनीय इति साध्यस्य तत्तदुभयगर्भतावच्छेदकीनिरूपस्य दृशावच्छेयमिति दिक् । ननूभयत्वस्य विशिष्टत्वातिरेकेऽपि वृत्तिव्याप्तिमिति यादृक्तनयाप्यवस्थापनी यन्न
तदुभयत्वावच्छिन्नाभावस्य विशिष्टत्वावच्छिन्नाभावातिरिक्तत्वमपि तस्यानित्याप्तसंपादकत्वादिति न चेत्यादिनातदतिरिक्तत्वव्यवस्थापनमसंगतमतओ हमा एवायं
नन्वितिविशिष्टाभावएवातिरिक्तत्वेनातिरिक्तविशिष्टाभावेनैव तादृशप्रतीत्युपपत्तेरिति भावः विशिष्टमेव प्रतियोगीति तथाच तदनतिरिक्तत्वे उभयत्वस्य हे
नुसमानाधिकरणविशिष्टरूपप्रतियोगिव्यधिकरणतादृशाभावप्रतियोगिताच्छेदकत्वात्यातिव्याप्तिरिति तदतिरिक्तत्वस्यातिव्याप्तिसंपादकत्वेनेन
वेत्यादिनाव्यवस्थापनेनाप्युक्तमिति भावः नन्वत्रहेत्वधिकरणे प्रतियोग्यपृथिकरणत्वसामान्याभावविवरणः प्रसिद्धिरिति यादृशप्रतियोगिताव्यधिकरणेऽधिक
रणांहेत्वधिकरणे तादृशप्रतियोगितानवच्छेदकत्वमिस्यवश्यं विवक्षणीयं तथाच तदनतिरिक्तत्वेपितत्प्रतियोगितानविशिष्टमात्रवृत्तिः अयमेकोऽडिला
वच्छिन्नाभावप्रतियोगितिप्रतीसाद्धित्वावच्छिन्नप्रतियोगिताया अतिरिक्तत्वमभ्युपगम्यमस्यैकस्मिन्नपि तदभ्युपगमस्यावश्यकत्वादिति हि त्वावच्छिन्नप्रतियोगि रामः
२१

त्व

तायास्ताहशत्वाभावेन विशिष्टत्वावच्छिन्नप्रतियोगितायाल्ताघाएवलक्षणघटकत्वयानरनवच्छेदकत्वस्योभयत्वेसत्वेनातिव्याप्तिर्दुरुद्धरैवेतितदतिरिक्तत्वेनातिव्याप्तिसंवारकमितिचेन्नप्रति
योगितावच्छेदकावच्छिन्नत्वानुपादानेपरमावीयपक्षेकिंचित्प्रतियोगिताया आश्रयानधिकरणं हेत्वधिकरणंतरमावप्रतियोगितानवच्छेदकत्वमेवलक्षणंएवंचदेवांतरसत्वेपितदनतिरिक्तत्वे
प्रकृतातिव्याप्तिवीरयितुंशक्यतेहेत्वधिकरणेविशिष्टाभावस्यविशिष्टत्वेनपक्षेकिंचित्प्रतियोगितायाआश्रयानधिकरणत्वस्यसत्वेनतादृशाभावस्यलक्षणघटकतयातत्प्रतियोगितावच्छेदकत्वस्यो
भयत्वेसत्वात् केचित्तुउभयत्वस्यैकविशिष्टापरत्वतःउभयत्वावच्छिन्नाभावस्यचविशिष्टत्वावच्छिन्नाभावत्वमेवस्वव्यवस्थापनमेवमुक्तंदेशपक्षेपक्षोपित्तुभयोस्तुउभयाभेदमाराधेवरस्य
चातिव्याप्तिरपरिमाताभवतीत्यभिप्रायेणगोणीदृष्टपतयातादृशाभावरस्यादेरभिधानंसिद्धांतंत्रंथेचमुख्यमुदृष्टमन्त्रोव्यवस्थाप्यातिव्याप्तिसंवारतस्पगौणस्यछलनएवयुक्तस्याघनामि
त्याहुः मान्यास्तत्तुभयत्वगुणरूपमपेक्षाबुद्धिविषयत्वरूपंवाविशिष्टत्वादतिरिक्तमस्त्येतथाप्युभयत्वास्त्वीतिपनीतिविषयोविशिष्टत्वावच्छिन्नाभावएवतथाचोभयत्वस्यप्रतियोगिता
वच्छेदकत्वप्रतियोगितावच्छेदकावच्छिन्नेनिवेशाप्यतिव्याप्तिरतआहनेवेतीत्याहुः नपुंसकलिंगस्यानीतिस्त्रीत्यमिसस्यतदवच्छिन्नाभावस्यनेनाभ्यपास्तभयादाहअनीतिस्त्रोपदेस्या
दि भतत्वमनैत्वियोरित्यादिदष्टमुपलक्षणंसर्वत्राभयाकारप्रतीतिरेकविषयत्वोचितसाक्षीत्यपिद्रष्टव्यंउभयत्वावच्छिन्नसाध्यकस्थानव्याहितापाप्यनत्वादाहतत्रेतिभतत्वेतिआदिनावि
शिष्टसत्वावान्तातिरिक्तस्यापिपरिग्रहः एवंचाभयत्वाधिकरणस्यादेकदेशिघताउपलक्षणंवैशिष्ट्याधिकरणस्यत्वस्यगुणादेःसत्वादितिएवंसिद्धांतेविशिष्टेनरूपेणतस्यासत्वा
त्तनात्रविशिष्टसत्तातिप्रतीतेर्द्वारत्वादेस्तोपदृष्टमलत्वमेवेतितथाचहेत्वधिकरणेसामान्यसाध्यतावच्छेदकाश्रयसत्वस्यचस्पतावच्छेदकस्यकसैतत्रसत्वेनलक्ष्यत्तयातद्वारकविरोधवण
मनुचितमितिभावः तथाचेत्यादि तथाचतादृशाधिकरणतारूपलक्ष्यतावच्छेदकस्यतत्रासत्वात्तत्रतत्त्वमितिभावः एवंचनन्वनन्यस्येवंचेनेतादृशाधिकरणस्यतत्रआहदेशिघ
तानात्रेतितथाचोभयत्वावच्छिन्नाधिकरणत्वविरोधितादृशाभावप्रतीतेनतत्रतदधिकरणत्वआहदेशिघतोनत्रेतितथाचोभयत्वावच्छिन्नाधिकरणत्वविरोधितादृशाभावप्रतीते
नतत्रतदधिकरणत्वमितिभावः वस्तुतस्तुलक्ष्यमेवेतिमनोसमासाध्यतावच्छेदकाश्रयत्वेनप्रतियोगिरूपाभावविरोधिनः तत्स्वन्तरयच्छिन्नाभावस्यसत्वाद्व्यभिचारसत्वेव्याप्ति
सत्वावश्यकत्वादितिभावः तथाचेत्यादितथ्यवच्छ्रतयोगितावच्छेदकावच्छिन्नस्यैवाभावविरोधितयातन्नामितरावच्छिन्नाभावसत्वेबाधकाभावेनसाध्यतावच्छेदकावच्छिन्नाभाव
वदवृत्तित्वरूपव्यभिचारसत्वेनव्याप्तिसंभवतीतिभावः एवंचनतुप्रतियोगिनएवाभावविरोधित्वमस्त्वतआहनात्रेतितथाचप्रतियोगिनएवाविरोधित्वेतादृशप्रतीतिनस्यादिति
भावः नचैवमपिमनसिसमवायेनोभयत्वावच्छिन्नस्यमनस्त्वस्यसत्वेनप्रतियोगितावच्छेदकावच्छिन्नमप्यस्येवेतिवाच्यं प्रतियोगितावच्छेदकतानियामकसंबंधेनप्रतियोगिना
वच्छेदकावच्छिन्नस्याभावविरोधितयाप्रकृतेतादृशेनसंबंधेनापासंबंधेनोभयत्वावच्छिन्नस्याभयस्यतत्रासत्वादितिरिक्तध्वंसप्रागभावादिनामिति आदिनाभेदपरिग्रहः सात्म
कभेदातियघपिघटाभावादिभेदस्यघटाभावादिरूपाधिकरणस्वरूपत्वनसंभवति तथैहतस्याभावमात्राधिकरणत्वाभावात्तद्घटाभावाद्यात्मकत्वेभावप्रतियोगिकत्वेनाभावमात्रप्रतियो

भावा

६

भा॰प्र॰ गिकत्वाभावाच्च नचैवमेदस्यघटाभावत्वादिनाभावप्रतियोगिकत्वेपितभेदत्वादिनाभावमात्रप्रतियोगिकत्वमस्त्येव अभावमात्रप्रतियोगिकस्यतेनाभावेभावमात्रवृत्तिप्रतियोगिताकइतिवाच्यंविवक्षितंप्रति
योगितावच्छेदकभेदेनचप्रतियोगितायाभिन्नत्वमितिनिरोघटइतिवाच्यंतथासतिघटध्वंसात्यन्ताभावस्यसाघग्निमग्रन्थासंगतेस्तथापितादात्म्यभेदस्यतेनघटाभावभिन्नत्वाघवच्छिन्नभेदोन्यापटाभावत्वा
२२ घवच्छिन्नभेदस्याधिकरणत्वस्वरूपत्वासंभवेपिनक्षतिः नचैवंघटत्वाभावाभिन्नत्वात्घटत्वाभावत्वेनतत्प्रतियोगितावच्छेदकत्वेप्यग्निमग्रन्थासंगतिरितिवाच्यं तद्रूपस्याभावमात्राधिकरणकाभावत्वरूपाभा
वमात्रप्रतियोगिकाभावत्वरूपाभावाधिकरणेकाभावप्रतियोगिकोप्यभावाधिकरणत्वस्वरूपइतिमतानुसारेणाधिकरणभेदेनाभावभेदइतिमतानुसारेणयासंगमनात् वस्तुतस्तु तद्रूपघटत्वाभाव
वानित्यनेनगोत्वाभावभिन्नत्वानितिविवक्षितं तेनघटत्वाभावभिन्नत्वादिस्यनेननचगोत्वाभावभिन्नभिन्नत्वादिरितिविवक्षितं तेनघटत्वाभावत्वानित्यनेनतचगोत्वाभावभिन्नत्वंविवक्षितं तेनघटत्वाभावभिन्नत्वादित्यने
नघटत्वाभावप्रतियोगिकभेदविषयकत्वेननघटत्वाभावस्यगोत्वाभावभिन्नत्वेनचतस्याद्रूपार्थत्वाभासभयात्तथाचतस्याभावमात्राधिकरणकतयानमत्वातत्रप्रमापकत्वंतद्रूपस्येतिद्रष्टव्यम् अवद्रू व
पेतिवन्ह्यादिरूपेत्यर्थः सत्वमपितिवह्निभिन्नत्वावच्छिन्नभेदस्याभावमात्राधिकरणकत्वाभावेनवन्ह्यादिस्वरूपत्वासंभवादितिभावः स्वसमानाधिकरणभेदइतिवन्ह्यादिभेदस्यार्थः तत्र
दस्यचवन्ह्यादिभेदभेदस्यच ननुभावदन्नेभेदस्यनाधिकरणस्वरूपत्वसंभवः अभावमात्राधिकरणकत्वाभावादतआह अभावमात्राधिकरणकेति अभावमात्रप्रतियोगिकोपीति त
थाचभावदन्नेभेदस्याभावमात्रानधिकरणकत्वेप्यभावमात्रप्रतियोगिकत्वादेवाधिकरणस्वरूपत्वसंभवतीत्याशयः घटाभावादिरूपभेदवन्ह्यादिभेदभेदस्यापिनाधिकरणस्वरूपत्वमुक्तयुक्तेरि
तिभावः स्मादितिगर्वः वस्तुतस्तु प्रतियोगितयातदधिकरणतानवच्छेदकभावाप्रतियोगिकत्वरूपमेवाभावमात्रप्रतियोगिकत्वंप्रतियोगितयातदधिकरणतानवच्छेदकत्वंचप्रतियोगि
११ स्थ तासंबंधावच्छिन्नावच्छेदकतयातदधिकरणत्वाभाववत्त्वेनभावस्यसंभवेनानुपपत्तिः एवंचपटाभावत्वाघवच्छिन्नभेदस्याप्यभावमात्रप्रतियोगिकतयाधिकरणस्वरूपत्वसंभवेनतस्मा
दाघापिदोषेपिसंभवत्येव अधिकरणभेदेनाभावभेदेतुघटाभावस्यतस्याप्यभावमात्रप्रतियोगिकत्वस्वीकारेनकोपिविरोधः किंतुभावरूपाभावस्यापितादात्म्यभेदप्रतियोगिनास्वावच्छिन्ने
नसामानाधिकरण्यान्प्रतियोग्यसामानाधिकरण्यंदुर्लभमितिनिरीधितिकाराशयः अतएववक्ष्यतिनिरुक्तानहिघटभिन्नभेदोघटत्वादन्निरिच्यतइत्यस्वरसमितिप्राहुः नवीनास्तु अभावप्र
तियोगिकोभावाधिकरणकोभावोधिकरणस्वरूपइतिमतानुसारेणघटाभावादिरूपेनेः पटाभावादिभेदस्यघटाभावादिस्वरूपतयाप्रतियोग्यसामानाधिकरण्यस्यदुर्लभत्वमितिदी
धितिकाराशयइतिवदन्तिविशिष्टाभावाघनात्मकइति आदिनात्यन्ताभावस्वप्रतियोग्यवच्छिन्नाभावपरिग्रहः पर्वतरूपाणादिस्थानेतत्वविशिष्टाभावघटाघभावस्तत्स्वभावस्यापितद्राधिकरणेपिप्र
तीत्यानतस्याधिकरणस्वरूपत्वेअन्यत्रदृष्टेनतस्मिन्नीतिवत्पर्वतरूपेपिनप्रतीत्यापत्तेरेवमुक्तत्वाघवच्छिन्नाभावस्याधिकरणरूपत्वेघटाभावपटाभावोभयत्वाघवच्छिन्नाभावस्यतद्भूयोरिप
त्यपितस्मिन्प्रतीत्यापत्तेरितिभावः नेष्टमिदमितिलाघवादितिभावः अतएवकुत्रभावमात्रप्रतियोगिकाभावस्याधिकरणानतिरिक्तत्वांगीकारादेव अधिकरणानात्मकत्वादितिवस्यघटप्र
तियोगिकत्वेनाभावमात्रप्रतियोगिकत्वाभावादितिभावः यथाश्रुतेनिरस्संबंधमेदाघटितेत्यर्थः तत्रविशेष्यतावच्छेदकसंबंधत्वादितिभावः अभावसाध्यकइतिइदम
पितादात्म्यभेदस्यघटाभावत्वाघवच्छिन्नभेदार्थकत्वमितियथाश्रुताभिप्रायेणवस्तुतस्तुघटाभावभिन्नत्वाघवच्छिन्नभेदार्थकत्वेसाध्यतावच्छेदकसंबंधेनेत्यादिविवक्ष्याभावसाध्यकेपि राम॰
प्रतियोग्यसामानाधिकरण्यघटकत्वमभावेतिथ्येहेतुसमानाधिकरणत्वस्याभावविशेषणत्वमनिरासायाह हेतुसमानाधिकरणत्वेत्यादि आवश्यकत्वादितिवह्न्यादिसमानाधिकरणाद्यादिः गु २२
वात्यन्ताभावविरोधित्वादितिनिषेधसमवायसंबंधावच्छिन्नात्यन्ताभावेनैवसहध्वंसस्यविरोधेनघटध्वंसकालिकसंबंधावच्छिन्नगवात्यन्ताभावविरोधित्वनसंभवतीतिबोध्यं गोध्वंसवतिसाम्नादौ
समवायेनगोनास्तीतिबुद्धेर्ध्वंसेनैवोपपत्तेस्तत्रसमवायेनतदसो

वृप्रतियोगितावच्छेदकत्वमेव साध्ये धर्मत्वादिरिति हेतुः एवं च कं बुग्रीवादिमत्त्वस्य हेतोः सत्त्वात्तेन च कंबुग्रीवादिमत्त्वसमानाधिकरणो भ्रमपातृत्वि धर्मावच्छिन्नप्रतियो
गिताकाभावव्यापकीभूताभावप्रतियोगितावच्छेदकत्वरूपसाध्यस्यासत्त्वाद्व्यभिचारवारणाय हेतौ प्रतियोगितावच्छेदकीभूतेति विशेषणं तथा च कंबुग्रीवादिमत्त्व
प्रतियोगितावच्छेदकीभूतधर्मत्वहेतोरभावान्न तत्र व्यभिचारः इत्थं च घटत्वव्याप्तिलिनवस्तुमात्रास्य एकावच्छेदेन यावद्विशेषाभाववत्त्वस्य एकावच्छिन्नयावद्विशेषाभाव
व्यापकीभूताभावप्रतियोगितावच्छेदकत्वमिति वार्थो वसेप इति स्पर्शत्वत्पद्धर्मसामानाधिकरण्यमात्रोपादाने कंबुग्रीवादिमत्त्वादिरूपगुरुधर्मे मारस्यैव हेतुमतिनिर्धा
टादेः साध्याभावेन व्यभिचारः प्रतिद्रव्यसाध्याभावाप्रतिवत्त्वे स्यैव व्यभिचारतया साध्याप्रसिद्धत्वपित्तत्संभवात्तो व्यभिचारवारणाय साध्याप्रसिद्धिवारणायैषवात
द्रव्यावच्छिन्नाभावाभाववत्त्वात्यर्थकं तद्वे भेव्याप्यत्वमुपात्तं तद्व्यादौ नित्वगुरुधर्मावच्छिन्नाभावाप्रसिद्ध्यानतमादायकापि हेतुः सत्त्वमिति न व्यभिचारादिकं
संयोगत्वव्याप्येतत्संयोगान्यसंयोगत्वेन तद्व्यवहृतत्रिसंयोगत्वावच्छिन्नाभावमादाय स्वरूपासिद्धिवारणाय तन्न्याक्तिवीयविशेषणताविशेषणात्तिमदर्थकं द्वितीयध
र्मपरमुपात्तं एवं च कालिकादिसंबंधमास्थाय तद्व्यक्तित्वस्यापि संबंधसामान्येन व्याप्यत्वानिर्वाहे रासंबंधविशेषेणाव्याप्यत्वविवक्षणास्यावश्यकत्वेनैनैव संबंधेन
व्याप्यत्वविवक्षणीयं न चासिद्धिवारकविशेषणस्य वैयर्थ्यमेवेति वाच्यं व्याप्तिप्रकारकत्वस्य धर्मतो ग्रहस्यैवानुमितिजनकत्वेन व्याप्तिग्रहोपयिकस्य सधर्मताग्र
होपयिकस्य च सार्थक्येन प्राचीनमतेः सिद्धिवारकस्यापि विशेषणस्य सार्थक्यात् स्वत एव शब्दप्रमाणो शब्दस्य विभिन्नत्वसाधकानुमाने विशेषगुणान्तरासमानाधिकरणे
कहृतिगुणत्वहेतौ शब्देतरार्थकस्यान्तरपदस्यासिद्धिवारकतयैव सार्थक्यं शब्दलोकेसमर्थितमालोकेकृत्स्नैः महानसीयवन्ह्यभावादिमतिपर्वतादौ वह्निसामान्याभावा
सत्त्वेन व्यभिचारवारणाय यावत्त्वोपादानं न चात्र व्यधिकरणसंयोगादिविषयितादिसंबंधावच्छिन्नत्वस्य विवक्षणात्तान्येव संबंधोत्तरस्यापि विशेषाभावकूटस्याव्यभि
चारित्वापत्तिरितिवाच्यं हेतावपि व्याप्यत्वघटकाभावप्रतियोगितावच्छेदकतैयाश्रयप्रतियोगितायास्वसमवायावच्छिन्नत्वेन विवक्षणात् स्वथयावत्संयोग
भावे संयोगात्मक संयोगसामान्याभावाभाववद्वृत्तित्वरूपव्यभिचारतानसत्त्वात्कयंव्याप्तिग्रहः दूरस्थाबीं प्रतियोग्यसमानाधिकरणनिवेशासिद्धान्तद्रुहितव्यान्यापि संयो
गसामान्याभावसाधनासंभवादिति चेन्न प्रहमं तन्मीत्याव्यभिचारहोनस्य प्राचीनमतेः प्रतिबंधकत्वात्तत्प्रतिबंधकत्वेपिताद्दशप्रतिबंधकसत्त्वेन विशेषव्याप्तिग्रहासंभवमभिप्रेत्यैव सामान्य

प्रतियोगितातद्वच्छेदकता कसंयोगसामान्याभावमादाय सिद्धसाधनमितिवाच्यं
साध्ये प्रतियोगितातद्वच्छेदकतयोः सम्बन्धायावच्छिन्नत्व

मुखव्याप्यनुसरणाच्चेत्याहुस्तन्निरंशद्वालोकेपरेषामसिद्धिवारकस्यापीत्यादिग्रंथेनमीमांसकमतएवासिद्धिवारकविशेषणासार्थक्यस्योक्तत्वात्पुनर्यत्तेषैनतत्तन्मतेप्याप्यत्वज्ञानस्यपक्षध
र्मताज्ञानस्यविघटकत्वेहेतुतयाघटकधर्मताज्ञानसंपादकतयासिद्धिवारकस्यापि कथंचित्सार्थक्यमुपपद्यते अस्मन्मतेचव्याप्यत्वेनपक्षधर्मताज्ञानस्यैवहेतुतयातत्संपादकेनासि
म०प्र० द्धिवारकस्यवैयर्थ्यस्यैवोचितत्वात् सामान्यात्मकपः समवायावच्छिन्नप्रतियोगितायास्तद्व्यक्तित्वावच्छिन्नविशेषणतानाविशेषावच्छिन्नावच्छेदकतासंबंधेनपरंपरिकरणाद्वसमभावविशिष्टसंव्या
२६ प्यपावद्धर्मेकः समनद्धस्यभावीपसमवायावच्छिन्नप्रतियोगितावच्छेदकइतिव्याप्तिः एतद्दृष्ट्योक्तव्यभिचारस्तानकालेपिसंभवतीतिनदोषः उपाधिलेनवसमानाधिकरणस्येकावच्छेदेसाद्धेका
वच्छिन्नवृत्तिसत्त्वस्वभावेनस्वीयसमवायावच्छिन्नप्रतियोगितानिरूपिततद्व्यक्तित्वावच्छिन्नविशेषणतानाविशेषावच्छिन्नावच्छेदकतासंबंधेनविशिष्टस्यव्याप्ययावद्धर्मेकत्वमिमर्थः स्यादय
परमभावपरंद्वितीयंचयद्धर्मेपरमिन्याहुः शेषितेमानमिति अनुमानविषयासंयोगसामान्याभावानुमानमित्यर्थः नवसामान्यतोव्याप्यासामान्यरूपेण तस्मिहावयपिसंयोगाभावत्वेन
तरमित्यानमकेनमिद्धिरितिवाच्यं तद्धर्मावच्छिन्नाभावव्याप्यतद्धर्मव्याप्यधर्मावच्छिन्नप्रतियोगिताकाभावत्वावच्छिन्नस्यइतिपरामर्शेणामधर्मः संयोगत्वमितिज्ञानसहकृ
तेनतत्सुः संयोगत्वावच्छिन्नाभाववानितिमनुमितिसंभवइतिपावामोक्षपान अनुगमादितिनघावसामान्यव्याप्तिग्रहासंभवइतिभावः ननुयोग्यधर्मेधनपत्नेतपद्मामुपमि
परमधीतेसस्रवेनोधेत्तामपीभवतियेविद्रांस्तमानयस्वपितःस्फोटघातकेनोस्वदारानुपगच्छेदित्यादिनानुगतआहवेधानुपपत्त्यापत्त्वतत्वादिकमनुगतेप्राचीनैरूपपत
इत्यतोदोषांतरमाहएकावच्छेदेनेति व्याख्यायामेकेनेतिएतत्स्नेनेरेएकावच्छिन्नाद्वतित्वावच्छिन्नवृत्तित्वोभयाभाववद्घावद्विशेषाभावस्यैत्यर्थइत्येवपाठः अत्रपदपीत्यादि
तथापीत्येतत्पाठस्मामाणिकः अतएववहुषुपुस्तकेषुनोलिखितएवद्दृश्यते तेनयथाश्रुतेनविशेष्यान्यार्थकरणेनावच्छेदकविरहेपीतिव्याप्यर्थत्तत्त्वछेदकानंगीकारादित्याशयकत्व
सिद्धिरितितथाध्यसत्वमित्यर्थः तथाचगुणसंयोगाभावस्यावच्छिन्नवृत्तित्वाभाववत्वात्साध्यव्यापकतानिर्वाहः उभयाभावप्रतियोगितावच्छेदककोटौद्वितीयदलमयोजनमं अतद
विभाशयः अत्रस्वोचयथावच्छेदेननानासंयोगवतिवृक्षादेविभिन्नावच्छेदेनवृत्तेर्नोनासंयोगाभावस्योभयाभाववत्ताभावात्साधनाव्यापकत्वेवोध्यं सामान्यतःसाध्यव्याप्तोसमर्थनं
साध्यव्यापकस्यैवोपाधित्वात्मूलावच्छेदेनकपिसंयोगस्यामान्याभाववृत्तिवृक्षेविद्यमानस्यवृक्षांतरीयतत्तत्कपिसंयोगाभावस्यव्याप्यवृत्तित्वावच्छिन्नवृत्तित्वाभावेपियावद्विशेषाभा
वातःपातितद्वृक्षीयतत्तत्कपिसंयोगाभावस्यमूलावच्छिन्नवृत्तित्वेनोपाधेस्साध्याव्यापकतानिर्वाहइत्युभयाभावप्रतियोगितावच्छेदककोटौप्रथमदलोपादाने तद्व्यादानेचतत्स
मूलरूपैकावच्छिन्नवृत्तित्वेनोभयाभाववत्वात्साध्यव्यापकतानिर्वाहः पत्रवृक्षेस्वाग्रेमूलेपिकपिसंयोगः मध्येवकपिसंयोगसामान्याभावस्तत्रतद्वृक्षीयतत्तत्कपिसंयोगाभावस्य
विभिन्नावच्छेदेनविद्यमानस्यापिमध्यरूपैकावच्छिन्नवृत्तित्वेनोभयाभाववत्वमसत्त्वमेव अयथैवमपियथासाध्यकवृक्षेतत्तदेशावच्छेदेनविद्यमानानांतत्तत्संयोगानांप्रत्येकंत्वोभावा राम०
त्तेषांसर्वेषामेकावच्छेदकासंभवेपियत्केकेविहायान्येषांसर्वेषामेकावच्छेदकसंभवेनसर्वेषामेकावच्छिन्नवृत्तित्वेनतत्तद्वृत्तिसंयोगाभावानांव्याप्यवृत्तितयावच्छिन्नवृत्तित्वा २६
त्वाभावेनयावद्विशेषा१

चत्वेन कालिकसंबंधावच्छिन्नगवात्यंताभावेन सह विरोधस्य संभवात् दैशिकसंबंधेनेति न च दैशे दैशिकसंबंधेन विरोधवत् काले कालिकसंबंधेनाविरोधात् कालस्य
कालिकसंबंधेन गोध्वंसवत्त्वेप्यतिव्याप्तिसंगतेर्दैशिकसंबंधेन गोध्वंसवत्त्वाभावेपि न क्षतिरिति वाच्यं तथा सति गोत्वावच्छिन्नध्वंसस्य महाप्रलये दैशिकसं
बंधेनासत्त्वेन संसर्गाभावनिवेशेप्यतिव्याप्तिवारणासंभवेन संसर्गाभावमात्रोक्तावित्यग्रिमग्रंथासंगतेः नतु प्रतियोगिसमवायिन एव दैशिकसंबंधेन ध्वं
सवत्त्वमिति नियमेन दृष्टांतासिद्ध्या दार्ष्टांतिकासिद्धिरिति चेत् अत्राहुः अतएवेति तादृशनियमे मानाभावादेवेत्यर्थः इत्थं च दैशिकसंबंधेन ध्वंसत्वेन प्रतिके
वलान्वयित्वे दैशिकतादेव ध्वंसोस्ति तथा च संसारस्यानादितया सर्वस्यैव कालस्य दैशिकसंबंधेनाश्रयतानाशजन्यगोध्वंसवत्त्वमेव विरुद्धमिति भावः विवक्षितं प्रति
योगिवैयधिकरण्यघटितलक्षणेपि विवक्षितं नित्येति हेत्वधिकरणे नित्यस्य प्रतियोगिन एवाभावात्तस्य च ध्वंसस्य सत्त्वादिति भावः पूर्वक्षणेति प्रलयपूर्वक्ष
णेत्यर्थः मात्रेति नित्यत्वांशव्यवच्छेदपरं महाप्रलय इति अन्यथा ध्वंसस्यानंततया भावविरोधितया कर्तृप्राचीनमते महाप्रलये गोनीलीति मते त्वनुपपत्तेरि
ति भावः नातिव्याप्तिरिति उक्तमते त्वनुपपत्तेः कालिकसंबंधावच्छिन्नगोत्वावच्छिन्नप्रतियोगिध्वंसस्येति हेतौ साध्यतावच्छेदके गोत्वे हेतुसमानाधिकरण
तादृशध्वंसीयकालिकसंबंधावच्छिन्नप्रतियोगितावच्छेदकत्वस्य सत्त्वादिति भावः एतेनात्र संसर्गाभावमात्रोक्ताविति ग्रंथः साध्यतावच्छेदकसंबंधेन प्रति
योगिवैयधिकरण्यनिवेशाभिप्रायेण प्रतियोगितायां साध्यतावच्छेदकसंबंधातिरिक्तसंबंधानवच्छिन्नत्वनिवेशाभिप्रायेण वा अन्यथा प्रतियोगितायां
साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशे ध्वंसस्य प्रतियोगितावच्छेदकसंबंधेनाभावेन ध्वंसप्रतियोगितायां कालिकसंबंधावच्छिन्नत्वाभावेनातिव्या

१

भ.प्र प्रिकारणासंभवादितिपरास्तं उक्तप्रतीतिबलेन ध्वंसप्रतियोगितायाः सामान्यधर्मावच्छिन्नत्वस्यैव संबंधावच्छिन्नत्वस्यापि सिद्धेः संदेहसत्त्वादिति महाप्रल
२३ यपूर्वमित्यादि हि तदुत्पन्ननाशानुरोधादिति भावः अतः गोत्वावच्छिन्नध्वंसस्य संदेहसमानाधिकरणत्वेन गोः साध्यत्वेऽतिव्याप्त्यसंभवात् घटएकपर्यंतेति
घटएकस्य साध्यत्वपर्यंतेत्यर्थः ननु घटएकस्य साध्यत्वेपि नातिव्याप्तिः घटएकत्वावच्छिन्नयावद्घटएकनाशेन तस्यापि संदेहसत्त्वादत आह अत्र चेति
घटएकनाशादिति महाप्रलयपूर्वं घटएकत्वावच्छिन्ननाशादित्यर्थः चरमघटएकनाशजनकस्य संदेहस्योत्तरदेशसंयोगनाश्यत्वेन तत्संयोगनाशानु
रोधेन पुनः संदेहोत्पत्तिः तन्नाशानुरोधेन पुनरुत्तरदेशसंयोगोत्पत्तिरित्यनवस्थया महाप्रलयस्यैवासंभव इति तस्य संदेहस्य एवं संयोगस्य च सुंदोपसुंद
न्यायेनैकदैव नाशादिति भावः चरमपरमाणुकर्मणेत्यादि चरमघटएकनाशानुगुणे चरमे परमाणौ कर्म ततः परमाणुद्वयविभागस्ततः परमाणु
द्वयसंयोगनाशस्ततो घटएकनाशोत्तरसंयोगोत्पत्तिः सुंदोपसुंदन्यायेन तत्कर्मोत्तरसंयोगनाशौ स एव च महाप्रलयः स्वाद्यव्यवहितः एवं क्षणे संदेहवति घ
टएकत्वावच्छिन्नध्वंसस्य सत्त्वान्नातिव्याप्तिः यदि च तत्कर्मनाशानंतरं तत्कर्मनाशजन्योत्तरसंयोगनाशात्मको महाप्रलयस्तदा महाप्रलयाव्यवहितपूर्वद्वि
तीयक्षणे संदेहवति घटएकत्वावच्छिन्नध्वंससत्त्वान्नातिव्याप्तिरित्याखंडलार्थः महाप्रलयाव्यवहितपूर्वक्षणश्चेति द्वितीयपक्षेऽव्यवहितपूर्वत्वं क्षणद्वय
साधारणं बोध्यं न क्षतिः नातिव्याप्त्यसंभवः संदेहाधिकरणे खंडप्रलयादौ जन्यज्ञानत्वावच्छिन्नध्वंसाभावादिति भावः स्वसाक्षात्कारेति अविहितस्व
दुःखमानाभावादिति भावः तत्प्रतियोगितेति ध्वंसप्रागभावप्रतियोगित्वेत्यर्थः दीधितौ खंडप्रलयनिष्ठेति पाठः खंडप्रलयादाविति पाठे आदिशब्देन खंड प्र०
२३

स

प्रलयपूर्वकालत्वमणुकाद्यधिकरणे द्व्यणुकाद्यनधिकरणेत्याहुः व्याख्यायां द्व्यणुकत्वावच्छिन्नेति च अनेन द्व्यणुकध्वंसस्य प्रतियोगितावच्छेदकावच्छिन्न
वैयधिकरण्यं प्रदर्शितं द्व्यणुकध्वंसस्येति इदमुपलक्षणं द्व्यणुकप्रागभावस्यापि द्रष्टव्यं उक्तरीत्या नातिरिक्तवृत्तित्वरूपावच्छेदकत्वासंभवादाह अवच्छेद
कत्वं चेति नहीत्यादि हि हेतौ प्रमेयत्वेन नस्थितमखण्डप्रकाशयति वस्तुतः इति संभवतीति तथा च सकलविशेषध्वंसप्रागभाववत्त्वे सत्यपि सामान्याव
च्छिन्नध्वंसप्रागभावयोरसंभवः यथा महाप्रलयादौ गोत्वाद्यवच्छिन्नध्वंसः एतत्कपालवृत्तिघटत्वाद्यवच्छिन्नानुत्पादे दशायामेतत्कपालवृत्तिघटत्वाद्य
वच्छिन्नप्रागभावः एतद्घटाद्युत्पत्तिदशायामेतद्घटवृत्तित्वसत्त्वाद्यवच्छिन्नप्रागभाव इत्यभावः। ननु त्ववच्छेदकत्वं चेहात्मत्वे वृत्तित्वमेवेत्यक्रमेवानुपपत्त्यैक
विशेषप्रागभावध्वंसविशिष्टान्तरध्वंसप्रागभावत्वसपितयोः संभवे नहीत्यादि संभवद्भावनमनुपपन्नमेवेत्यत आह अवच्छेदकत्वस्येति अनतिरिक्तवृत्तित्वनियमस्य ख
तद्धात्मकत्वनियमस्यातिरिक्तयोः सामान्याभाववत्त्ववादिभिरपि अनुपगमादिति न चैवं ध्वंसप्रागभावप्रतियोगितावच्छेदकत्वस्य सामान्यधर्मेऽनुपपत्ति
रेव महाप्रलयादिवृत्तिध्वंसप्रागभावयोः प्रत्येकव्यक्तिमात्रवृत्तिप्रतियोगिताकतया कस्यापि ध्वंसस्य प्रागभावस्य वा प्रतियोगितायाः अन्यूनानति
रिक्तवृत्तित्वरूपावच्छेदकत्वस्य तत्रासंभवादिति वाच्यं तैः स्वरूपाद्यव्यक्तिध्वंसप्रागभावयोरेव यावद्व्यक्तिप्रतियोगिकत्वोपगमेन तत्संभवात् यत्तु ध्वं
सप्रागभावयोर्व्यधिकरणप्रतियोगिकत्वाभावनियमेन चरमाद्यव्यक्तिध्वंसप्रागभावयोर्यावद्व्यक्तिप्रतियोगिकत्वं न संभवतीति नवीनैरुक्तं तद्वि
तत्सर्वसिद्धव्यधिकरणप्रतियोगिकेऽत्याश्रयनाशजन्यद्रव्यगुणादिनाशे व्यभिचारेणाभाभावेन च तादृशनियमस्यैवासिद्धेः यद्यपि ध्वंसप्रागभावयोः

भ.प्र.अ
२८

२

सामान्याभावत्वव्याप्तिमत्ते सामान्यधर्मावच्छिन्नप्रतियोगिताको ध्वंसप्रागभावौ नातिरिक्तौ तयोश्च स्वस्वाद्यव्यक्तिमात्रप्रतियोगिकत्वे सामान्यधर्मस्यातिरि
क्तवृत्तित्वेन प्रतियोगितावच्छेदकत्वानुपपत्तिः सर्वव्यक्तिप्रतियोगिकत्वोपगमे प्रतियोगितासंबंधेन ध्वंसप्रतियोगिताद्यन्यसंबंधेन जन्याभावत्वेन हि
त्वे व्यभिचारप्रसंगात् किंतु प्रतियोगिस्वरूपप्रतियोगिताकत्वेऽननुगतानां सामान्यात्यंताभावप्रतियोगितानामिवच्छेदकं ध्वंसप्रागभावस्य प्र
तियोगितानां तत्प्रतियोगितात्वेनानुगतीकृतानामनतिरिक्तवृत्तितया सामान्यधर्मावच्छेदकः एवं च प्रत्येकमपि ध्वंसेषु प्रागभावेषु सामान्याव
च्छिन्नप्रतियोगिताकत्वं संभवत्येव न च तयोरुक्तत्वमानाभाव इति वाच्यं प्राचीनमते ध्वंसप्रागभावाधिकरणेऽत्यंताभावाभावेन घटादिध्वंसप्रागभा
ववति कपालादौ घटो नास्तीति प्रतीत्यनुपपत्त्या तत्प्रतीतिकाले घटादिमत्तयानुदयनिर्वाहाय तत्र ध्वंसप्रागभाववृत्तानित्ययस्यातिरिक्तप्रतिबं
धकत्वकल्पने गौरवात् तद्धर्मावच्छिन्नवत्तावुद्धौ तद्धर्मावच्छिन्नप्रतियोगिताकाभावनिश्चयत्वेन संसर्गाभावनिश्चयस्यैकप्रतिबंधकत्वे लाघवेन च
तत्सिद्धेः अत एव तयोः प्रतियोगितावच्छेदकसंबंधस्यापि सिद्धिः अत्यंताभावनिश्चयप्रतिबंधकत्वस्य संबंधविशेषनियंत्रितत्वात् अथैवं यत्किं
चिद्घटादिध्वंसप्रागभाववति घटोत्पत्तिपूर्वकाले घटो नास्तीत्यादिप्रत्ययापत्तिः न च तद्घटादिध्वानसत्त्वे तद्वत्प्रतिबंधकं तद्धसत्त्वेपि चेष्टापत्तिरिति
वाच्यं तद्धसत्त्वे जायमानप्रत्ययस्य विषयावाधेन प्रमात्वापत्तेरिति चेन्न सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वस्याव्याप्यवृत्तित्वोपगमेन तद्धानीं तत्र त
स्याभावेन विषयवाधस्तत्वादेव प्रमात्वायत्वाभावात् यद्वा वस्तुगत्या येयेत्तद्व्यक्तिप्रतियोगिताकध्वंसप्रागभावास्तेतांभावान्यतमरूपात्यभाव एं०
२८

कूटाय यत्र नास्तीति प्रतीतिविषयास्तेषु कूटेषु प्रतिकूटं पर्याप्तसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वं व्यासज्यवृत्तित्वस्य पृथगभावेनैतत्कूटप्रतियोगिताको
चान्यतरत्वान्यतमत्वादिनाऽनुगतीकृतानामन्यूनानतिरिक्तवृत्तितया सामान्यधर्मोऽवच्छेदकः यत्किंचिद्घटादिप्रतियोगिकालीनादृशकूटाभावादिरेव न सामा
न्यधर्मावच्छिन्नप्रतियोगिताकाभावस्तत्त्वमिति विषयबाधादेवोक्तप्रसंगस्य सत्प्रमाणाव्याप्तेः न चैतत्कूटत्वप्रतियोगितासंबंधेन धूमे प्रतिजन्यभावस्य
हेतुतायां व्यभिचारित्वादेरेवं तिवाच्यं व्यासज्यवृत्तिप्रत्येकपर्याप्तप्रतियोगितायाएव कार्यतावच्छेदकसंबंधत्वात्तद्दोषे एवं चैतत्तत्कालेतत्कालावच्छेदकं
स्यानतिरिक्तवृत्तित्वनियमस्तैर्नोपपद्यत एव च व्यासज्याभ्युपगमेवाविरोधभंजकावच्छेदकत्वमेव तद्विषयेण तद्वन्ने सिंहनाद इत्यादिप्रतीतिसिद्धं स्वरूप
संबंधरूपं प्रतीतिकमवच्छेदकत्वं तच्च क्वचिदतिप्रसक्तमपि प्रतीतिबलादभ्युपेयत एव तथा चोक्तं सर्वेषु केवलेषु घटादिकत्वादिघटादिकोटि
प्रत्येकं प्रलयादिनिष्ठध्वंसप्रागभावप्रतियोगितावच्छेदकत्वसंभवेन ध्वंसप्रागभावयोः सामान्याभावत्ववादिप्राचीनमतेऽपि घटादिकत्वादिना
साध्यतायामतिव्याप्तिवारणेन दुर्घटं तथापि प्राचीनमते गौरवं वस्तुगत्या तयोः संसर्गाभावेन सह विरोधमानाभावेनावश्यक्लृप्तसामान्यधर्मा
वच्छिन्नप्रतियोगिताकात्यन्ताभावेनैव नास्तीति वक्तुमुपपत्तेर्ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकत्वे मानाभावश्च ता
शयेनोक्तमतिव्याप्तिवारणोपायमपश्यन् वस्तुगतिमनुरुध्यातिव्याप्तिसंपादकं ध्वंसप्रागभावयोरत्यन्ताभावविरोधमेव खंडयति दीधितौ प्रति
योगिमत्ताइवेति तद्धूमोऽदिमत्ताइति प्रतियोगिमद्भिन्नस्य तादृशविरोधाभावात्तद्बाधकाभावात्तथा च देहत्वधिकरणे प्रलयादौ गोत्वाद्यवच्छिन्नाभा

भप्र वस्त्वाचोक्तातिव्याप्तिरिति भावः व्याख्यायांप्रलयेइति व्याहृत्तोधयघरस्ताद्दृशायां एतत्कथालेघटोनास्तीत्यादिप्रतीतिपरिग्रहः प्रतीतेरेवेतिनच
तस्याः ध्वंसप्रागभावयोरेवविषयत्वमास्त्विति वाच्यं सामान्यावच्छिन्नप्रतियोगिताकत्वेनावश्यकल्पनीयात्यन्ताभावेनैवोपपत्तेः दैशिकसंबंधेने
२५ तियत्तुकालिकसंबंधावच्छिन्नगवाद्यत्यन्ताभावस्य दैशिकसंबंधेनकालाद्यवृत्तित्वेदृष्टापत्तेः कालस्यकालिकसंबंधेनैवजगदाधारत्वात्तथाचवि
रोधोत्सेवेतितन्नतथासतिइदानींगोष्ठेगौर्नचत्वरेइत्यादिप्रतीतेरनुपपत्तेः इदानीमपिगवादिध्वंसप्रागभावयोःसत्वेनगवाद्यत्यन्ताभावसत्वस्या
संभवात्कथमितितथाचदृष्टांतासिद्धिरितिभावः ध्वंसाद्यधिकरणेऽत्यन्ताभावत्वेनस्वनिरवच्छिन्नत्वेनस्वरूपावच्छिन्नाभिमतानुपपन्नमतोव्याचष्टे
स्वसेतिकालवृत्तेः देशभेदावच्छेदेनकालवृत्तेः प्रतियोगिवैयधिकरण्येप्रतियोग्यधिकरणवृत्तित्वाभावरूपप्रतियोग्यसामानाधिकरण्येप्र
तियोग्यनधिकरणवृत्तित्वेतियद्यपिगवाद्यभावस्यगवादिमत्कालावच्छेदेनप्रतियोगिसामानाधिकरण्याभाववत्त्वमपिसंभवत्येवसा
मानाधिकरण्यस्याव्याप्यवृत्तितामतएवतत्साधनाविवेचिष्युणत्वात्तथापितद्व्याप्यवृत्तित्वस्याग्रेदूषणीयतयाप्रतियोग्यनधिकरणवृत्ति
त्वरूपप्रतियोगिवैयधिकरण्यस्यैवनिष्कृष्टतयावक्ष्यमाणत्वात्तद्वेवोक्तमितिमंतव्यं अन्योन्याभावेऽतिप्रसंगवारणायाहतादात्म्यातिरिक्तेतिइ
त्यत्वेसेत्यनेनसंबंधितमस्वरसंसूत्रारोपस्यप्रतियोग्यारोपस्यहेतुतयाअभावप्रत्यक्षहेतुतयाभानाभावादितिहृदयंपलक्षणं अभावलौ
किकप्रत्यक्षप्रतियोगिवत्तद्वेनातीन्द्रियसंसर्गाभावेऽव्याप्तिर्गौरवाच्चेत्यपिद्रष्टव्यं प्रयोजनविरहएवेतिएवकारेणाव्याप्तिर्व्यवच्छेदः अव्याप्तिरपीति रामः
२५

अपिनामप्रयोजनविरहस्तत्त्वयं कालोपाधाविवस्वत्साहित्ययाचयप्रासमवायादिसंबंधेन तत्तत्सहायाधिकरणएवकालोपाधौतत्तत्सहायस्यदैशि
कसंबंधः स्वीक्रियते अन्यथा सर्वेषामेव दिगुपाधितया मूर्त्तात्मककालोपाधौ घटदेहो ~~घटदेशे~~ घटीयरूपादेर्दैशिकसंबंधस्वीकारस्यावश्यकतयाघटादेःके
मात्रीयेहघटीयरूपादिकमितिप्रत्ययापत्तिरत्यासमवायादिसंबंधेनतत्तत्सहायाधिकरणएवदिगुपाधौतत्तत्सहायस्यदैशिकसंबंधः स्वीक्रियते अ
न्यथापरमाण्वादिकेमात्रीयेहघटीयरूपादिकमितिप्रत्ययापत्तिरितिभावः तत्तन्मूर्त्तमध्येदंसंप्रत्ययादितियत्तन्मूर्त्तेतत्योधीलत्वादिगुपाधिताघट
कसंबंधः स्वीक्रियतेइतिपर्यवसति तत्र त्वेनाहमन्त्रेपि विशेषणताइतिधीविरहेणनसदृशाशयः ननुसंबंधसामान्येनप्रतियोगिव्यधिक
रणाभावाप्रसिद्ध्याव्याप्तिरित्यतआह अन्यत्रेतिप्रमेयत्वान्नद्रव्यत्वेतीदमुपलक्षणं तत्र येपि अतीतत्वंघटकाभावस्यतादृशत्वं द्रव्यं
जातिमानितीतिकेचित्तुप्रतियोगितावच्छेदकसंबंधतायाः साध्यतावच्छेदकसंबंधतायावाप्रयोज्यधिकरणेतावन्मात्रेणतादृशप्रतियो
गप्रसंबंधित्वमवश्यंवाच्यंअन्यथैकार्थसमवायस्यापिसमवायघटितत्वात्तद्जातिमानात्मावत्वादिसाध्यकेर्वारणमित्यभिप्रायंप्रकाशयितुमाह
जातिमानित्यादीत्याहुः अत्र जातित्वोपादानेनतपातल्लाघवेकप्रतियोगप्रसामानाधिकरणानिवेशाद्केयमतिव्याप्तिरितिनत्वाशंकनीयं ए
कोक्ताभिप्रायेणातिव्याप्तेरभिधानात् एवमग्रेपिप्रतियोगप्रसामानाधिकरणपघटितलक्षणस्याव्याप्तेरतिव्याप्तेर्वाभिधानेनैकोक्ताभिप्राये
णसमर्थनीयं ननुसमवायेसमवायाभावेनतत्तज्जातेरेकार्थसमवायाभावात्संबंधसामान्येनप्रतियोगप्रसामानाधिकरणपजातमभावस्यसं

४

भ॰भ॰ ध्वसेवेत्यत आह ज्ञानेति अप्रसिद्धेति प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वस्याविवक्षणीयत्वादिति भावः नन्वन्योन्याभावस्य प्र
२६ तियोग्यसामानाधिकरण्याभावेऽकाक्षतिरत आह तथा चेति अन्योन्याभावस्य प्रतियोग्यसामानाधिकरण्ये इत्यर्थः न त्वविशिष्टस्यानतिरिक्तत
या ज्ञाव्याप्तिताहवस्य भेत अत आह हेत्वधिकरणे इति विशिष्टाभावाधिकरणेनेति प्रतियोग्यसमानाधिकरणे हि तत्समानाधिकरणाभावत्वं ए
कविशिष्टेऽपरविशिष्टमिति रीत्यान्वयेन प्रतियोग्यसामानाधिकरण्यविशिष्टः सद्धेत्वधिकरणवृत्तिर्योऽभाव इति लाभेन तल्लक्षितिवेद्यतया हे
त्वधिकरणेऽपि प्रतियोग्यसामानाधिकरण्यविशिष्टाभावाधिकरणतालाभादिति भावः नाव्याप्तिरिति तद्विशिष्टाधिकरणत्वतदभावविशि
ष्टाधिकरणत्वयोर्विरोधेनैकपि संयोगाभावस्य लक्षणाघटकत्वादिति भावः नन्वन्योन्याभावस्याव्याप्यवृत्तितया प्रतियोगिसमानाधिकरण
भिन्नत्वोक्तौ वोक्ताव्याप्तिवारणासंभवे प्रतियोगिसामानाधिकरण्याभावस्य क्वाप्यद्विशिष्टस्य हेत्वधिकरणवृत्तित्वविवक्षणस्य फलमत आ
ह द्रोषिते तद्वतीति अप्रतिमसंगादिति अधिकरणभेदेनाभावभेदाभावादिति भावः न हंगीकर्तव्येति चकारः प्रतियोगिकत्वविशिष्टसमवायाभा
वेवान द्रव्यत्वादि साह्यवति व्याप्तिरिव्याप्त्येवक्ते हि तयोः साध्याभावस्य समवायसंबंधेन साध्याभावस्य प्रतियोगिसमानाधिकरणतया द्वि
त्वत्वाभावोऽपि व्याप्यतया द्वित्वत्वाभावादिति संयोगे वह्नित्वभिन्नत्वाभावादित्यर्थः अव्याप्यवृत्तिधर्मावच्छिन्नभेदस्याप्यव्याप्यवृत्तित्वादिति
अव्याप्यवृत्तिधर्मावच्छिन्नान्योन्याभावस्यत अव्याप्यवृत्तित्वात् दोषः इत्याशयेनाह तद्वृत्तित्वाभावस्येति संयोगे वह्नित्वाभावस्येत्यर्थः राम॰

२६

हेत्वधिकरणगुणाद्यवच्छेदेनेति न वृत्त्यनर्हत्वेन्त्वा नाव विशिष्टाधिकरणता हेत्वधिकरणगगनादौ वर्त्तत इत्येव वक्तुमुचितं पूर्वं तत्रैवोक्तत्वादि
ति चेन्न एवमापाततस्तथोक्तावपि हेत्वधिकरणावच्छेदेन प्रतियोग्यसामानाधिकरण्ये निवेशेऽपि वा आसिकारणस्यासंभवेन तत्स्वविशिष्टवृत्तित्वमान्नाभा
वेन पूर्वोक्तरीत्यैरसंभवेन च हेत्वधिकरणावच्छेदेन प्रतियोग्यसामानाधिकरण्ये वा त्वाभावेनिवेशमपि तन्निश्चितमेव तदाशयात् अथ यत्र शब्दमयो दे
या एवोपदर्शितस्यैवलाभेन हेत्वधिकरणावच्छेदेन प्रतियोग्यसामानाधिकरण्यस्य शब्दाद्यलाभेन विवक्षामात्रलभ्यतयाऽभावे हेतुसामानाधिक
रण्यविशेषणतावर्थ्येन च प्रतियोग्यसामानाधिकरण्यविशिष्टविधेयतया हेतुसामानाधिकरण्यान्वयमनाहृत्य हेतुसामानाधिकरण्यविशिष्टएव
विधेयता प्रतियोग्यसामानाधिकरण्यान्वयोगीकारेण तत्सशब्दलभ्यत्वमेवेति वाच्यं तावता हेतुसामानाधिकरण्यावच्छेदेनैव प्रतियोग्यसामाना
धिकरण्यस्य शब्दाल्लाभेऽपि हेत्वधिकरणावच्छेदेन प्रतियोग्यसामानाधिकरण्यस्य कथंचिदपि शब्दाद्यलाभादिति चेन्न तादृशविवक्षातात्पर्यग्राह
कतयैव हेतुसामानाधिकरण्यविशेषणस्य सार्थक्यात् वस्तुतस्तु हेत्वधिकरणे वृत्तित्वपातं तेऽन्यथा हेत्वधिकरणस्याभावेऽन्वयस्वीकारेण हेत्वधिक
रणविशिष्टाभावे प्रतियोग्यसामानाधिकरण्यान्वयेन च हेत्वधिकरणावच्छेदेन प्रतियोग्यसामानाधिकरण्यशब्दलभ्यमेव तत् चैवमपि वृत्तित्वांश
वैयर्थ्यमेवेति वाच्यं अवच्छेद्याधिकरणसंबंधत्वेनावच्छेदकत्वसंभवस्य वक्तत्वेव तत्सार्थक्यात् अत्रेदमवधेयम् सामान्यतःप्रतियोगित्वस्या
व्यावर्त्तकतया प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यसामानाधिकरण्यमप्रसिद्धं स्वप्रतियोगितावच्छेदकसंबंधेन स्वप्रतियोग्यसामानाधिकरण्यम०

५

भा·प्र· ण्यमपि तद्याः सर्वस्यैवाभावस्य स्वाश्रयवृत्तित्वविशिष्टस्वाभावादिरूपस्वप्रतियोगिसामानाधिकरण्याच्च स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नास
२८ मानाधिकरण्याद्धेतुसमानाधिकरणाभावीयत्वं प्रतियोगिताविशेषणं स्वपदं प्रतियोगितापरमित्यपि न संभवत्स्वत्वसंक्ष्याभावेनाननुगततया तद्दुष्टि
त्वाच्चेद्दुष्टैयत्वापत्तेः तस्मात्स्वत्वैकावाद्यिमाचीनमभावत्वं वतेनेनेदं स्वत्वैक्यानंगीकर्तॄन्नवीनमते च स्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छिन्नसामा
नाधिकरण्यनिरूपकत्वसंबंधावच्छिन्नाया हेतुमन्निष्ठभेदप्रतियोगितावच्छेदकतात्मकहेतुप्रतियोगितास्वावच्छेदकसंबंधेन स्वावच्छेदकावच्छि
न्नसामानाधिकरण्यविशिष्टाभावाधिकरणत्वसंबंधेन हेतुमन्निष्ठप्रतियोगितावत्ताहेतुसामानाधिकरण्यनिरूपकत्वसंबंधेन हेतुमन्निष्ठा
प्रतियोगितावत्ताहेतुसामानाधिकरण्यानवच्छेदकत्वसंबंधेन हेतुमन्निष्ठा वा प्रतियोगितानिवेशनीया सर्वत्र स्वत्वस्य परिचायकतया सं
बंधमध्ये निवेशेनाननुगमप्रसक्तो हीत्यपि इति अत्रेप्रतियोगपूसामानाधिकरण्यघटितलक्षणे हि विनिगमोपपादितत्वात्तदुपपादितत्वप्रायुक्तत्वात्
सत्त्वायां गुणेन द्रव्यत्वसामानाधिकरण्यमित्यादिप्रतीतिरेवान्यथोपपादनेनाप्रमाकृतैः संगतेः तथा च सामानाधिकरण्यस्याव्याप्यवृत्तित्वमा
नाभावहतिमावः अव्यवसायसामानाधिकरण्यस्याव्याप्यवृत्तित्वेन अव्याप्यवृत्तिसाध्यकव्यभिचारिण्यतिप्रसंगवारणाय स्वादि नेतसामानाधिकर
ण्यस्याव्याप्यवृत्तित्वेप्यतिप्रसंगो न संभवतीत्यैतत्समानाधिकरणाभावे प्रतियोग्यसामानाधिकरण्यमनिवेश्यापि हेतुसमानाधिकरणस्य प्रतियोग्य
समानाधिकरणाभावस्य प्रतियोगिसामानाधिकरण्यानवच्छेदकहेत्वधिकरणाकाभावेन वा निवेश्य लक्षणसंभवात्सिद्धौ कुत्रापि हेतुसमानाधि एण्य°
२८

करणे साध्याभावप्रतियोगिसामानाधिकरण्यस्य हेत्वधिकरणे साध्याभावप्रतियोगिसामानाधिकरण्यानवच्छेदकत्वस्यासत्त्वेनाव्यभिचारिणि च सर्वत्राव्यभिचा-
नि रूपैकाधिकरणवृत्तित्वेति तद्व्यक्तित्वादेः साध्याभावसमानाधिकरणत्वेन जलहृदाधिकरणे साध्यसामानाधिकरण्यानवच्छेदकत्वेन साध्याभावस्य संग्रहासं-
ग्रहाभावप्रसंगात्प्रसंगयोर्निरासः व्याप्यवृत्तेरपि प्रातीतिकावच्छेदकांगीकारान्न दोषः तदनंगीकारे निरूपकत्वमेवावच्छेदकत्वे बोध्यं अथ प्रतियोगि-
पदस्य स्वप्रतियोगिपर्थिकैत्वापत्त्याननुगमेन तत्र व्यक्तित्वेनाभावानां निवेशनीयतया व्याप्ये दैर्घ्यापत्त्या स्यादिति प्रतियोगिपदं साध्याभावप्रतियोगिपरं वा-
च्यं तथा च समानाधिकरणे तेन साध्यतावच्छेदकावच्छिन्नाभाववन्निष्ठसाध्यसामानाधिकरण्याभाववत्त्वमवश्यं हेतुसमानाधिकरणाभावे विवक्षणी-
यं स हेतौ हेतुसमानाधिकरणाभावमात्रस्यैव साध्यसामानाधिकरण्येनासंभवेवारणाय निष्ठान्तं साध्यसामानाधिकरण्यविशेषणं साध्यसामानाधि-
करण्यविशेषणीभूतसाध्याभावे साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वनिवेशप्रयोजनाभावेन व्याप्यवृत्तिसाध्यकस्थलेऽपि संबंधान्तरा-
वच्छिन्नसाध्याभावे साध्यसामानाधिकरण्यप्रसिद्ध्या लक्षणसंगतिरिति सामानाधिकरण्यस्याव्याप्यवृत्तित्वं विना नातिप्रसंगवारणं संभवति न चैव-
मपि साध्यतावच्छेदकावच्छिन्नाभाववन्निष्ठसाध्यसामानाधिकरण्यानवच्छेदकहेत्वधिकरणाभाववन्निवेशलक्षणाकरणान्नातिप्रसंग इति वाच्यं
तथा सति सर्वत्रैव सद्धेतौ हेत्वधिकरणस्य संबंधान्तरावच्छिन्नसाध्याभाववन्निष्ठसाध्यसामानाधिकरण्यावच्छेदकतया समवायेनेति चेत्र तथा सति तत्-
पु न्याव्यस्यमाणप्रतियोगिवैयधिकरण्यनिवेशपक्षेऽपि स्वत्वाननुगमपरिहाराय साध्यवद्वृत्तिसाध्याभावाधिकरणतात्मिकत्वे हेतुमन्निष्ठाधिकरणताका-

भा॰प्र॰ भावस्यैव निवेशनीयतया कालो घटवान्महाकालपरिमाणादित्यादौ साध्याभाववद्भिन्नाभाववन्मात्रवृत्तित्वाद्यैव लक्षणसमन्वयसंभवेन नत्वच्छेदकत्वनिरुक्ते
२८ स्याद्यग्रिमग्रंथविरोधात् न चो क्रमप्रकारद्वयेपि स्वरूपानन्तर्गमात् द्योषेद्वेर्त्यत्ताद्वीरीतिवाच्यं अनुगतस्वत्ववादिप्राचीनमतानुयायिणामग्रिमे स्वनिष्ठाभा
वप्रतियोगिसामानाधिकरण्यनिरूपकं प्रतियोगिकत्वसंबंधेन हेतुसमानाधिकरणविशिष्टाभावेतिविवक्षणेन द्वितीये स्वनिष्ठाभावप्रतियोगितावच्छेद
कतानिरूपकसामानाधिकरण्यनिरूपकप्रतियोगिकत्वसंबंधेन हेत्वधिकरणविशिष्टाभावेतिविवक्षणेन तद्दोषस्य तथा वारणसंभवाच्चेति चेन्मैवं तत्स्वल
क्षणे तत्त्वेनाभावविशेषणतापत्ते प्रतियोग्यसामानाधिकरण्यघटितप्रकृतलक्षणे सामानाधिकरण्यस्य व्याप्यवृत्तित्वेऽतिप्रसंगस्य दुरुद्धरत्वात् व्याख्यायां हे
त्वधिकरणाद्यमिति अत्र सप्तमपर्यायभेदो वच्छेदकान्वयितया चेद्धेतुसमानाधिकरणपदसमभिव्याहारेणाभावांतः प्रतियोगिव्यधिकरणावच्छेदक
हेत्वधिकरणावच्छिन्नाभावलाभः व्याप्यवृत्तेरपि प्रतीतिकावच्छेदकांगीकारेण तेन प्रतियोगिव्यधिकरणस्य व्याप्यवृत्तित्वेपि न क्षतिः तद्वेतेगो
कारे तु अवच्छेदकत्वनिरूपकत्वं अवच्छिन्नत्वं चेद्वृत्तित्वमिति बोध्यं प्रतियोगितावच्छेदके तु अत्राग्रिमे द्वप्रतियोगितावच्छेदककोटौ प्रतियोगितावच्छेद
कपर्यंतमुपलक्षणं प्रतियोगिमात्रस्यैव विशेषणत्वं द्वितीये प्रतियोगितावच्छेदकादि प्रतियोग्यंतं सर्वमेव विशेषणं तृतीये प्रतियोगितावच्छेदक
त्वस्योपलक्षणत्वमिति तदंशस्याविशेषणत्वमिति कस्यं त्रयमभेदो द्वयं प्रतियोगितावच्छेदकादिरिति आदिना प्रतियोगितावच्छेदकतादिपरिग्रहः यावंति प्रति
योगितावच्छेदकानि प्रत्येकं तदवच्छिन्नानधिकरणत्वादिकं तद्द्वितीयकल्पांतर्गतमेवेति न पृथगुद्दंकितं प्रतियोगिव्यक्त्यंतरगतया च प्रतियोगिवैयधि एवं

२८

कारणोपादानेपि कपिसंयोगेपि तद्धस्तत्वादिना हेतुत्वव्याप्तेरवारणेन तद्वैयर्थ्यमेवेति भावः । न चैतत्कपिसंयोगेपि तद्धस्तत्वादिनाहेतुत्वव्याप्तिवारकतत्प्रवेशवत्त्वा
भकमिति वाच्यं एतत्कपिसंयोगाभावस्यापि एतत्कपिसंयोगानधिकरणवृत्तित्वेऽत्याभावाभावरूपतद्द्रुमयोगितत्पात्तस्यापि तद्द्रुमयाभावरूपप्रतियोगिवैयधि
करणेनाव्याप्तेरवारणात् तदोषापत्तेरिति अतिव्याप्तिमित्यादि । एवमग्रेऽपि तिस्सत्वादिविशिष्टद्रव्यत्वेति नचैतत्सद्द्रव्यत्वरूपत्वे उत्पन्नद्रव्येपि तिस्सत्वविशि
ष्टद्रव्यत्वस्याभावो नास्तीति प्रतीत्यापत्तिरितिसत्त्वस्य संख्यादिरूपत्वमेवोचितं तथाच नातिव्याप्तिरिति वाच्यं उत्पन्नद्रव्ये विशिष्टद्रव्यत्वसंबंधाभावादेवमा
द्यप्रतीतिवारणे नित्यानेतत्संख्यापरिमाणादीनां तादृशाभावत्वकल्पने गौरवेण द्रव्यत्व एव तादृशाभावत्वकल्पनात् नन्वधूमवान् वह्नेरित्यादौ भावसाध्य
केऽतिप्रमाभावादेर्नित्यत्वाद्विशिष्टस्याभावादिरूपप्रतियोगिसामानाधिकरण्येन लक्षणाघटकतयातिव्याप्तिसंभवेनाभावसाध्यकानुधावनेनमफ
लमिति वाच्यं धूमाभावादौ साध्यतावच्छेदकसंयोगादिना प्रतियोगिवैयधिकरण्यसंभवेन साध्यतावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यविव
क्षापक्षेप्यतिव्याप्तिसत्वेनोपतदनुधावनोक्तेः ननु एकाधिकरणमात्रवृत्त्यभावस्य नवीनमते तदधिकरणावृत्तित्वविशिष्टस्याभावरूपप्रतियोगिसा
मानाधिकरण्यसंभवेऽपि तत्राह एकाधिकरणेति कथमतिव्याप्तिरित्यत आह किंतु प्रतियोगितावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यनिवेशात्तादृशा
भावाप्रसिद्ध्याऽसंभवः साध्यतावच्छेदकसंबंधेन प्रतियोगिवैयधिकरण्यनिवेशपक्षे चाभावसाध्यके तदप्रसिद्ध्याऽव्याप्तिरेवेति भावः अतिव्याप्ति
पदस्यासंभवपरत्वे द्रव्यत्वाभाववानित्यादिसद्धेतुविरोधं उद्धरत्यापत्तिं चाप्रसंगं हृदि निधायाह वस्तुतस्त्विति गगनाद्यभावस्य प्रतियोग्यधिकरणाप्र राम॰

७

भा·प्र·
२१

सिद्धायथात्मत्वप्रतियोगिवैयधिकरण्यसंभवाद्वाहाहवस्त्राणेति गगनाद्यभावस्यापि नित्यत्वाद्धि विशिष्टस्याभावलक्षणप्रतियोगिसामानाधिकरण्याद्दा
हनित्यत्वविशिष्टेति नित्यत्वमेव विशेषणीभूतमिति तत्स्वरूपं वा विशिष्टस्वरूपस्य विशिष्टाभावाभावस्य विशेष्यविशेषणानतिरिक्तत्वाद्धि तिभावः। न
हि तस्य विनिगमकाभावेन विशेष्यगगनाभावस्वरूपत्वमेवास्त्वत आह न गगनाभाव इति तस्य विशेष्यरूपगगनाभावस्य अतिप्रसक्तत्वाद्धि इति तथा च
विशेष्यस्य गगनाभावस्य अतिप्रसक्तत्वेन तत्रापि नित्यत्वविशिष्टगगनाभावाभावो नास्तीति प्रत्ययप्रसंगेन नित्यत्वरूपविशेषणस्यानतिप्रसक्तत्व
मेव विनिगमकमिति भावः। एवं विशिष्टाभावाभावस्य विशेषणमात्ररूपत्वे यत्र विशेषणविशेष्यान्यतरमात्रस्यानतिप्रसक्तत्वं तत्रैव तस्या
तन्मात्ररूपत्वं यत्र चातिप्रसक्तत्वं तत्र तस्य विशेषणविशेष्योभयरूपत्वमेवेत्याशयेनाह नित्यत्वस्येति ननु तथापि गगनाद्यभावस्य पूर्वक्षणवृत्ति
त्वविशिष्टगगनाभावाभावादिरूपप्रतियोगिसामानाधिकरण्येन तादृशाभावाप्रसिद्धिर्दुर्वारा न च पूर्वक्षणवृत्तित्वविशिष्टगगनाभावाभावा
भावादिरपि पूर्वक्षणवृत्तित्वादिस्वरूप एवेति न दोष इति वाच्यं पूर्वक्षणवृत्तावृत्तावपि पूर्वक्षणवृत्तित्वविशिष्टगगनाभावाभावो नास्तीत्यादि
प्रत्ययेन पूर्वक्षणवृत्तित्वादिमात्रे तादृशाभावरूपत्वासंभवेन पूर्वक्षणवृत्तित्वविशिष्टगगनाभावादेरेव तादृशाभावरूपत्वावश्यकत्वात् अ
थैवं पूर्वक्षणवृत्तित्वविशिष्टगगनाद्यभावः पूर्वक्षणे चेन्नेति वृत्तिमत्तोऽवृत्तेर्यावान्तेषु तदभावस्य पूर्वक्षणोत्पत्तेर्वैयर्थ्यात् पूर्वक्षणोत्पत्तेर्येन तत्त्वे
नित्येषु तदभावस्य पूर्वक्षणेऽवृत्तेर्यावत्तेषु वृत्तेरिति फलितं तच्च न संभवति पूर्वक्षणवृत्तित्वविशिष्टगगनाद्यभावस्य पूर्वक्षणाभा एवं॰

२१

अवृत्तित्वेन पूर्वक्षणकालीनवृत्त्यवृत्तिसाधारण्यासंभवादिति चिन्त्यं कालिकसंबंधेन पूर्वक्षणावृत्तित्वविशिष्टगगनाद्यभावस्याभावीयविशेषणतासंबंधे
न पूर्वक्षणातिरिक्ते वृत्तित्वे बाधकाभावात् न च विशिष्टघटत्वे वैशिष्ट्यप्रतियोगिवृत्तित्वनिरूपकतावच्छेदकधर्मत्वस्य नियामकतया कथमेवमिति वा
ख च्यं विशिष्टघटत्वे वैशिष्ट्यप्रतियोगिवृत्तित्वनियामकसंबंधयोरैक्यस्यैव तन्नियमात् अत एव गुणकर्मान्यसमवेतत्वे विशिष्टसत्तावत्त्वं द्रव्य एव न तु
गुणे कपालसमवेतत्वविशिष्टघटवत्त्वे तु महत्तालाहावपि स्वीक्रियत इति संगच्छते इति चेन्नैवं गगनादेरपि हेतुत्वसहतानेन बाधकत्वापत्त्या वृत्ति
मत्त्वस्वीकारेण पूर्वक्षणावृत्तित्वादेरेव तादृशाभावरूपत्वे बाधकाभावात् महाहेतुत्वोहि किं संबंधितत्वघटितं तत्त्वमेव गगनादौ वृत्तावपि क्षणादिका
लस्य वृत्तित्वनियामककालिकसंबंधोऽस्त्वेव एवं च पूर्वक्षणासंबंधादेरेव तादृशाभावरूपत्वांगीकारान्न दोषः अत एव हानौ गगने शब्द इति प्रतीति
रपि संगच्छते अन्यथावच्छेदकदेशव्याधिकरणासंबद्धकालस्यावच्छेदकत्वासंभवेन तादृशप्रतीत्यसंभवापत्तेः न च तथापि गगनाद्यभावस्य संयोगा
दिसंबंधेनाभाववाच्यत्वाद्यभावसमनैयत्येन तत्त्वरूपतया विशेषणतया घटाद्यभावस्य स्वरूपतया च घटः प्रसिद्धापि तस्य प्रतियोगिव्यधिक
रणत्वेन संभवतीति वाच्यं समनियताभावानेकपक्षावलंबनात् केचित्तु यथाश्रुते मागत्कर्मणा प्रतियोगिव्यधिकरणाभावाप्रसिद्ध्या
वह्निमान् धूमादित्यादावसंभव इति यत्किंचित्स्वप्रतियोगित्वं यादृशसंबंधावच्छिन्नं तादृशसंबंधेन स्वप्रतियोगितावच्छेदकावच्छिन्नस्या
मान्यानधिकरणं यत्संबंधेनाधिकरणं तन्निष्ठाभावस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वमेव लक्षणे प्रवेशनीयं तथा एप०

भा॰प्र चसहितस्य लक्षणत्वद्रव्यत्वाभाववान्सत्त्वादित्यत्रापि संयोगेन घटाद्यभाववत्त्वप्रतियोगिव्यधिकरणस्तद्दीपे घटनिष्ठप्रतियोगित्वे यादृशेन संयोगसंबंधेनावच्छिन्नं तत्ता
३० दृशसंयोगसंबंधेन साधनवतो द्रव्यस्य तदीयप्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणत्वात् नचैवमपि तदीयस्य साध्यतावच्छेदकीभूतस्वरूपसंबं
धावच्छिन्नप्रतियोगित्वस्याप्रसिद्ध्या न संगतिरिति वाच्यं पूर्वलक्षणोक्तदिशा तत्वादिविशिष्टस्य घटाद्यभावस्याभाववत्त्वप्रसिद्धेरिति प्राहुः संभवात् नवीनमते संभ
वात् लाघवादितिसत्तादेरनुगतजातिरूपतया तेनैव समवायसंबंधावच्छिन्नमेयसामान्याभावो नास्तीत्याद्यनुगतप्रतीत्युपपत्तौ तद्विषयस्य सकलमेयादि
रूपत्वमानाभावत्वस्याशयः एतेन समवायेन मेयसामान्याभावाभावादेः सकलमेयरूपत्वे गौरवेण लाघवात्सत्तादिरूपत्वे गुणसामान्याभावाभावस्यापि स
कलगुणरूपत्वे गौरवेण लाघवादेकत्वादिरूपत्वमेवोचितमित्यात्मत्वादिहेतुकेऽपि नाव्याप्तिरिति निरस्तं एकत्वादेरजातित्वात्तद्विनिगमनाविरहेण संयोगाद्या
त्मकत्वस्यापि सुवचतयाऽऽत्मत्वादावव्याप्तिसंभवाच्च गुणसामान्याभावो नास्तीत्यनुगतप्रतीतेरनुगतोपस्थितगुणत्वावच्छिन्नविषयकत्वौचित्याच्च अ
त एव घटपटादिसमवेतत्वविशिष्टाभावादिरूपप्रतियोग्यनधिकरणत्वस्य घटादौ संभवेन घटत्वादिकं किमिति नोपेक्षितमित्यपि निरस्तं ॥ घटपटादिसमवेत
त्वविशिष्टाभावाभावादेरपि लाघवेन घटत्वादिरूपत्वात् नचैवमपि घटत्वसंयोगान्यतरत्वाद्यवच्छिन्नाभावाभावस्य कपिसंयोगाद्यात्मकस्य प्रतियोगि
तावच्छेदकं घटत्वान्यतरत्वावच्छिन्नाभाववत्त्वं तदवच्छिन्नानधिकरणत्वस्य घटादौ संभवेन घटत्वादिकं किमित्युपेक्षितमिति वाच्यं प्रक्रियागौरवेणातदुपे
क्षणात् गुणत्वमित्यादि नव्यगुणसामान्याभावाभावो द्रव्यत्वमेवेति वाच्यं उत्पत्तिकालावच्छेदेनापि द्रव्ये तत्सत्त्वप्रसंगात् यादृशत्वस्य प्रतियोगि एम
३०

तावच्छेदकविशेषणत्वेयादृशावच्छेदकविशिष्टस्यानधिकरणंहेतुमत्तादृशावच्छेदकभिन्नत्वेयत्साध्यतावच्छेदकभिन्नस्यैवसम्बन्धेनप्रतियोगिता
दिप्रवेशवैयर्थ्यंप्रतियोगिताविशेषणत्वेचयथासंनिवेशेनवैयर्थ्यंप्रतियोगितायांहेतुसमानाधिकरणाभावीयत्वपर्यन्तनिवेशप्रयोजनाभावच्छिन्ना
शर्थेनादृग्यादृशणाःप्रतियोगितायाइत्यादि अत्रेदमेवधेयं यादृशत्वतादृशत्वयोरननुगमेननभेदकृत्यवगाहिसमूहालंबनज्ञानस्यानुमितिहेतुत्वे
विशिष्टपरामर्शस्यानुमितिहेतुत्वानुपपत्तिर्व्याप्तेर्द्वैविध्येयत्वेचेतितयोरैकवादिप्राचीननमताभिप्रायेणोहंतयोरैक्येनानुपादृशत्वतादृशत्वम
नुगतेबुद्धिविषयतावच्छेदकत्वपर्यवसन्नमतिरिक्तंवायादृशादिपदानामनेकार्थत्ववारणायशक्तावुपलक्षणतयाशक्यतावच्छेदकानुग
मकतयावश्यमपेक्षणीयत्वेननानुगमः वस्तुतस्तु स्वावच्छेदकावच्छिन्नानधिकरणत्वसंबंधावच्छिन्नहेतुमद्वृत्तिप्रतियोगितात्वेनवृत्तित्वप्र
तियोगितानामनुगमादिकस्यैवतदवच्छेदकत्वेसामान्याभावस्यव्याप्तिघटकत्वे स्वावच्छेदकावच्छिन्नानधिकरणत्वेचस्वावच्छेदकत्वीयल
क्षितधर्मविशिष्टवृत्तिप्रतियोगितावच्छेदकताकभेदघटितत्वेनसंबंधमध्येस्वत्वस्यप्रवेशेऽननुगमोऽप्रवेशेऽप्यसंभवः अवच्छेदकावच्छिन्ना
नधिकरणत्वस्यहेतुमत्संभवादितिशंकायाअनवकाशः अथवाहेतुमन्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकावच्छिन्नप्रतियोगिता
त्वेनप्रतियोगिताधिकरणाहेतुमन्निष्ठाभावप्रतियोगितानांनिवेशसंभवेवक्तेनस्वैराप्रतियोगिताअनुगममप्यतदवच्छेदकत्वसामान्या
भावोविवक्षितः एवंचोपदर्शितपरंपरासंबंधस्यसंबंधत्वेमानाभावेपिनक्षतिः।नचवह्निमान्धूमादित्यादौवह्नित्वादेःस्वरूपसंबंधात्मिका २४०

भा-प्र याप्रमाहिमान्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकतत्तद्व्यक्तित्वावच्छिन्नाभावः प्रतियोगितायाश्चावच्छेदकत्वेनाव्याप्तिरितिवाच्यं यत्त
३१ त्पदेविहायोपात्तानां योग्यादृशपदार्थानां तादृशावच्छेदकतावच्छेदकावच्छिन्नत्वं यद्रूपेण तद्रूपविशिष्टप्रतियोगितावच्छेदकत्वस्य लाभेनादो
षात् नचैवंहेतुमन्निष्ठभेदप्रतियोगितावच्छेदकत्वमेव साध्यतावच्छेदके निवेश्यव्याप्तिः सुवचा सैवान्योन्याभावघटितेतिशेषं चेयत्र
मितिवाच्यं यथासंनिवेशेनावैयर्थ्यात् तत्रद्वयेक्ष्यगौरवंपरमवशिष्यतेतिच्छलकारएवान्योन्याभावगर्भैवव्याप्तिरत्रमितिहेतुत्ली घ
वादिस्ताहिनाग्रेवक्ष्यतित्वात्रतादृशावच्छेदकतावच्छेदकतासाध्यतावच्छेदकतां घटसंबंधेनविवक्षणीयातेनायोगोलका
देहेत्वधिकरणस्यकालिकादिनाघ्नमत्वादिविशिष्टवह्न्यादेः संयोगादिनाधिकरणत्वेपि नातिव्याप्तिः नचाव्याप्यवृत्तिधर्मावच्छि
न्नभेदस्याव्याप्यवृत्तित्ववादिनवीनमतेनोक्तरीत्याः सुमभवतिकपिसंयोगेयत्नहृक्षत्वादिसाध्यावव्याप्तेर्वारणाद्वित्तिवाच्यं तन्मतेहे
तुमन्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकत्वेनैतवद्रूपितप्रतियोगितानामनन्तगर्भत्वात्ः एवंचलाघवमपि नचैवंप्रतियोगि
तायाः प्रतियोगिभेदेनभेदेघटाद्यभावप्रतियोगितापात्त्वाद्यस्येनसमनियमत्तलघुघटादेर्वभेदप्रतियोगितावच्छेदकतावच्छे
दकत्वंप्रतियोगितावच्छेदकभेदेनभेदे चघटत्वादेरेवतद्वच्छेदकतावच्छेदकत्वमितिसमयथापिकेसापि प्रतियोगित्वस्य हेतुमन्निष्ठभे
दप्रतियोगितावच्छेदकतावच्छेदकत्वासंभवेनात्रापिपारिभाषिकावच्छेदकत्वनिवेशस्यलद्धयेतन्निवेशप्रयुक्तगौरवंदुर्वारमि राम० ३१

त्तिवाच्यं भेदस्याव्याप्यवृत्तित्ववादिभिर्नवीनैर्गुरुधर्मस्याप्यवच्छेदकत्वांगीकारात् केचित्तु स्वनिरूपकानुयोगिताविशिष्टनिरूपित
त्वस्यावच्छेदकविशिष्टाधिकरणानुयोगिकत्वोभयसंबंधेन प्रतियोगिताविशिष्टान्यत्वे हेत्वधिकरणनिष्ठाधिकरणतानिरूपक
तावच्छेदकानुयोगितानिरूपकप्रतियोगितानवच्छेदकत्वे सति गगनसाध्यतावच्छेदके निवेशनीयं न च स्वनिरूपकत्वस्यावच्छे
दकविशिष्टाधिकरणानुयोगिकत्वोभयसंबंधेन प्रतियोगिताविशिष्टान्यत्वस्याभावविशेषणत्वे एव निवेशयितुमिति वाच्यं त
था सति द्रव्यत्वस्वरूपाभावस्य निरुक्तोभयसंबंधेन नित्यत्वविशिष्टद्रव्यत्वाभावत्वावच्छिन्नप्रतियोगिताविशिष्टत्वेन लक्षण
घटके तयोर्द्रव्यत्वाभाववान्नित्यत्वादित्यादावव्याप्तेः न च निरुक्ताधिकरणतानिरूपकत्वस्याभावविशेषणतया निवेशयितुमिति वा
च्यं कपिसंयोगाभाववानात्मत्वादित्यादौ आत्मनिष्ठकपिसंयोगादिस्वरूपगुणसामान्याभावाभावत्वाद्यवच्छिन्नाधिकरणता
यो संयोगसामान्याभावत्वावच्छिन्नप्रतियोगितायां गुणसामान्याभावत्वावच्छिन्नप्रतियोगितायाः कपिसंयोगाभावत्वावच्छि
न्नप्रतियोगितायां वा निरुक्तोभयसंबंधेन वैशिष्ट्याभावेनात्मत्वाधिकरणतानिरूपककपिसंयोगात्मकाभावमादायाव्याप्त्या
पत्तेः यद्योक्तेः च तादृशाधिकरणतानिरूपकत्वावच्छेदकानुयोगितानिरूपकगुणसामान्याभावत्वाद्यवच्छिन्नप्रतियोगितान
वच्छेदकत्वस्य कपिसंयोगाभावत्वादौ सत्त्वेनाव्याप्तेरनवकाशः एतेन स्वावच्छेदकावच्छिन्नाधिकरणानुयोगिकत्वस्वनिरूप

१०

भा·म· कीभूतताभावनिरूपितत्वोभयसंबंधेन प्रतियोगिताविशिष्टान्याया हेत्वधिकरणनिष्ठाधिकरणतायास्तन्निरूपकीभूताभावप्रति

३२ योगितानवच्छेदकत्वं साध्यतावच्छेदके निवेशनीयमित्यपि परास्तं सर्वसाध्य एव घटाभावाद्यधिकरणताया निरुक्तोभयसंबं

धेन एवंलक्षणाक्रान्तत्वविशिष्टस्याभावत्वाद्यवच्छिन्नप्रतियोगिताविशिष्टत्वेन प्रतियोगिताविशिष्टान्यहेत्वधिकरणनिष्ठाधिकरण

तायाश्च प्रसिद्धेः यद्वा स्वावच्छेदकविशिष्टाश्रयानुयोगिकत्वसंबंधावच्छिन्नाया हेतुमदनुयोगिकाधिकरणतानिष्ठभेदप्रतियोगि

तावच्छेदकतातद्व्यतियोगित्वोभयानुगतेन प्रतियोगिता निवेशनीयाः साध्यवन्निष्ठस्वाध्याभावाद्यधिकरणतास्वरूपवोक्तसं

बंधेन साध्यतावच्छेदकावच्छिन्नप्रतियोगिताविशिष्टाः अत्र तनकुत्रापि तादृशाधिकरणतायाः दर्शितसंबंधेन तादृशप्रतियोगिता

वच्छेदः व्यभिचारिणि व्यभिचारनिरूपकाधिकरणानुयोगिकसाध्याभावाधिकरणतायां तादृशसंबंधेन साध्यतावच्छेदकावच्छि

न्नप्रतियोगितावच्छेदस्य न तु तत्रिनको पि दोषः संयोगेन कालिकपरंपरासंबंध स संबंधत्वे भेदप्रतियोगितावच्छेदकतावच्छेदकत्वे च मा

नाभावात् महाकालो घटवान् महाकालपरिमाणाद्वित्वाद्वह्निगगनाद्यभावीयप्रतियोगितायास्तादृशसंबंधानोव्यधिकरण

त्वेन हेत्वधिकरणनिष्ठगगनाद्यभावत्वाद्यवच्छिन्नाधिकरणतायास्तदुभयसंबंधेन प्रतियोगिताविशिष्टान्यत्वसंभवेन तादृशसंबं

धावच्छिन्नहेतुमदनुयोगिताधिकरणनिष्ठभेदप्रतियोगितावच्छेदकतावत्त्वसंभवेन चाव्याप्तेरनवकाशेन न च षष्ठद्वयसाध्यग्रिमग्रं राम॰ ३२

ता

थेत्विशेषाचस्तेनसाध्यवन्निष्ठसाध्याभावाधिकरणताभिन्नहेत्वधिकरणनिष्ठाधिकरणतानिरूपकाभावप्रतियोगितात्वेनहेतुनिष्ठप्रतियोगिता
अननुगमप्रसंगस्त्ववच्छेदकत्वसामान्याभावस्यावच्छेदकेनिवेशनीयत्वेतेनैकोपिदोषःतथापिनिरुक्तंमहाकालोघटवान्महाकालपरिमाण
दित्यादौसाध्याभाववद्भिन्नाभावमात्रस्यैवतादृशस्यप्रसिद्धिसंभवेननन्वयव्याप्तिरितिकिंसाध्यव्यधिकरणत्वस्यसंगतेर्वृत्तिमत्त्वेऽपियत्वादितिसंक्षेपःदीधितौ
हेतोर्हेतुतावच्छेदकविशिष्टहेतोःयादृशयादृशरूपविशिष्टःहेतुतावच्छेदकसंबंधस्तादृशावच्छिन्नत्रयःसंबंधस्तेनकोदृशोविशिष्टसत्त्वादिसाध्येविशि
ष्टसमवायस्यसामानाधिकरण्यप्रवेशेशुद्धसमवायस्यापितन्निवेशनावाप्तिरितत्सत्त्वरितार्गःआख्यायांसंबंधभेदःसंबंधविशेषःनतुनिवेशनी
यइतिसंबंधसामान्येनैवाभावस्यवृत्तित्वेनिवेशनीयमित्याशयःइदंचसंबंधभेदेकमित्यभिमानेनेदंकृतंतत्संबंधत्वस्यैकाभावेनववक्ष्यमाण
रीत्यासर्वत्रदैशिकसंबंधसामान्याभावसाधारणदैशिकविशेषणतायाएवैवानिवेशमुचितमितिध्येयंप्रयोजनंतुनाभावादिकालिकादिनाहेतुसं
मानाधिकरणाभावस्यप्रतियोगितैवयधिकरणत्वादेर्वारणादिभावःच्वभावस्येतिवृत्तावितिशेषःतेनदैशिकसंबंधत्वेनदैशिकविशेषणा
तायाःसमवायादेश्चनिवेशेन नातिव्याप्तिरितिद्रव्यत्वादेःसमवायादिनैववृत्तित्वादितिभावःनन्वेवंकालिकेनात्मत्वाभावादेर्निरवच्छिन्नवि
शेषणतयासाध्यत्वेकालत्वादिहेतावव्याप्तिःतत्रहेत्वधिकरणेकालेसाध्याभावस्यात्मत्वादेर्दैशिकविशेषणतयासमवायादिनाचासत्त्वा
तेनघतत्स्याविरुद्धतयासाध्यसामानाधिकरण्याभावादेवतत्रनातिव्याप्तिरितिवाच्यं तथापिव्यापकतालक्षणातिव्याप्तेर्दुर्वारत्वात्महाका

ति

११

मा·प्र लमात्रवृत्तिकालिकविशेषणतासंबंधावच्छिन्नात्मत्वत्वाभावस्य निरवच्छिन्नविशेषणतया साध्यतायां खंडकाले साध्यसमानाधिकरणे महाकालमेतत्
३२ मीव्यभिचारिणि कालत्वे साध्यसामानाधिकरण्यस्यापि सत्त्वेन व्याप्तिलक्षणस्याप्याप्तिर्व्याप्तिर्ग्रहणेपि दुरुद्धरत्वाच्चेत्यत आह वस्तुतस्त्विति तल्लेति
तल्लत्वं च नत्तुल्लेखित्वेन स्वीकार्यमिति तथा च दैशिकविशेषणतैवाभावस्य वृत्तौ निवेशनीया तत्स्याभावसाधारण्येऽपि द्रव्यत्वाभावादिसाध्यकेनातिव्या-
प्तिः कालिके कालिकेनात्मत्वाभावो निरवच्छिन्नविशेषणतया नास्तीत्यादिप्रतीतिबलात्साध्याभावस्यात्मत्वादेर्दैशिकविशेषणतया काले सत्त्वात्का-
वतारणेऽत्यातिव्याप्तिरपीति भावः यत्तु अभावाभावसाधारणविशेषणतास्वीकारे विशेषणतया द्रव्यत्ववत्ताज्ञानस्यापि द्रव्यत्वाभाववत्ताज्ञानेऽति-
रिक्तप्रतिबंधकत्वकल्पनापत्तिः समवायेन द्रव्यत्ववत्ताज्ञानस्य प्रतिबंधकत्वं ह्यस्य वादिसिद्धमिति तन्न तदनंगीकारे द्रव्यत्वाभावाभाववत्त्वेन समवा-
येन द्रव्यत्ववत्ताज्ञानस्यातिरिक्तप्रतिबंधकतायामभावेऽप्यावश्यकत्वात् अत एव दैशिकविशेषणतासमवायादिसाधारणदैशिकसंबंधेनाभा-
वाभावसाधारणदैशिकविशेषणतासंबंधेनैवावाऽभावस्य हेत्वधिकरणवृत्तित्वनिवेशाद्दशव अतिव्याप्तिरिति साध्याभावस्य द्रव्यत्वादेः सम-
वायेनैव वृत्तेरिति भावः दूषणे दैशिकसंबंधस्य समवायादिरूपत्वे द्रव्यत्वाभावसाध्यकेऽव्याप्तिरूपे दैशिकविशेषणतामात्ररूपत्वे तत्रातिव्या-
प्तिरूपे ननु साध्यवत्ताग्रहविरोधितानियामकसंबंधेनाभावस्य हेत्वधिकरणवृत्तित्वनिवेशात्त्राव्याप्तिः तादृशेन कालिकसंबंधेनाकाशाभाव-
स्यात्मन्यवृत्तेरित्यत आह कालिकसंबंधेनेति अप्रसिद्धेरिति तथा च तथा निवेश एव न संभवतीति भावः न हि साकाशाभाववति आत्मत्वाधिकरणे वृत्ति राम० ३२

साध्याभावात्मकाशाभावेनार्थः देयमिति नैवं नोपादेयं च सर्वथैव व्याप्यवृत्तिसाध्यके इति प्राक्तनदीधितिग्रंथविरोध इति वाच्यं साध्ये प्रतियोगि
वैयधिकरण्येनानुपादानप्रयोजकं व्याप्यवृत्तित्वस्य स्वसमानाधिकरणाभावाप्रतियोगित्वरूपस्य साध्यतावच्छेदकसंबंधेन स्वाधिकरणे दैशिक
विशेषणतया स्वात्मभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकसाध्यतावच्छेदकवत्त्वपर्यवसितस्य निरुक्ताकाशाभावाभाव
रूपसाध्येऽसत्वात् इत्थं चेव्याख्यायां व्याप्यवृत्तिसाध्यकेपि तत्समनिरवच्छिन्नत्वे वृत्तित्वरूपव्याप्यवृत्तित्वाभिप्रायकतया न पूर्वापरविरोध इति
ध्येयं केचित्तु स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिमत्ताग्रहविरोधितानियामकसंबंधेनाभावस्य हेत्वधिकरणवृत्तित्वं वाच्यं निरु
क्ताकाशाभावाभावसाध्यके चाकाशाभावस्य साध्याभावसत्ताग्रहे शकालिकसंबंध एव तेन संबंधेन च हेत्वधिकरणात्मनि तत्स्यासत्वात्तद्घ
यभावादेरेव दैशिकविशेषणतात्मकतादृशसंबंधेन तत्र सत्त्वाच्च नाव्याप्तिरित्याहुः तत्र एतन्निवेशापेक्षया लाघवेन प्रतियोगिवैयधिक
रण्यनिवेशं सैवोचितसात् नवीनास्तु सर्वत्रैवाभावस्य हेत्वधिकरणवृत्तित्वं संबंधसामान्येनैव वाच्यं प्रतियोगिवैयधिकरण्यानुपादानप्र
योजकं साध्ये व्याप्यवृत्तित्वं च पारिभाषिकं तच्च हेत्वधिकरणीयसंबंधसामान्यावच्छिन्नाधेयताकाभावप्रतियोगितानवच्छेदकं पघटि
त्वेनत्वं तथा च सत्त्वादिजातिरपि स्वाधिकरणघटादिनिरूपितकालिकसंबंधावच्छिन्नाधेयताकाभावप्रतियोगित्वेन पारिभाषिकोक्तव्याप्य
वृत्तित्वाभावान्न साध्यकेपि प्रतियोगिवैयधिकरण्यं हेयमेव निरुक्ताकाशाभावाभावसाध्यकेपि तदुपादेयमेव तन्मात्रस्यापि तादृशव्याप्य०

१२

भा॰प्र॰ प्यवृत्तित्वाभावात् परंत्वात्मत्वादिसाध्यकज्ञानादिहेतौ केवलान्वयिसाध्यके वक्तव्यो पाधिरयं तत्साध्यस्य पारिभाषिकपर्योक्तव्याप्यवृत्तित्वाक्रांतत्वा

३४ त्तच्चात एव दीधितिकारैर्विशिष्टसत्तादिसाध्यके प्रतियोगितावच्छेदकावच्छिन्नपद व्यावृत्तिदानमपि संगच्छते अन्यथा तत्साध्यके यथाश्रुतव्याप्य

वृत्तित्वाभावेन प्रतियोगिवैयधिकरण्यस्यैव तत्साध्यके निवेशेन तदसंगत्यापत्तेरित्याहुः तच्चिंत्यं तथा सति संयोगादिसामान्याभावस्य द्रव्यत्वा

धिकरणे कालिकादिसंबंधेनैव सत्वेन संयोगिद्रव्यत्वादिसाहावेव प्रतियोगिवैयधिकरण्यपदव्यावृत्तेः प्राचीनोक्तायाः सामंजस्येन दर्शसंयो

गसामान्याभावे मानाभावादित्यनेन प्राचीनमतदूषणस्य प्रकाशेन तैरगानवीनादृत्यादिनातद्व्यावृत्तिव्यवस्थापनस्य चासंगत्यापत्तेः उपदर्शि

तरीत्या यथाश्रुतव्याप्यवृत्तित्वोक्तावेव दोषे पारिभाषिकव्याप्यवृत्तित्वोक्तेरनौचित्यात् तत्सामान्याभावाय यादृशप्रतियोगितावच्छेदकावच्छिन्ना

भाववत्तावच्छेदकसंबंधेन हेतुमद्वृत्तिरभावः तादृशप्रतियोगितानवच्छेदकत्वं साध्यतावच्छेदके वाच्यं निरुक्ताकाशाभावाभाववत्साध्यके पि प्र

तियोगिवैयधिकरण्यं न देयमेव तद्धेतावप्यव्याप्तेरभावात् कालिकसंबंधेनैव तत्र तत्संभवात् एवं च हेतुमत्त्वव्याप्यवृत्तिसाध्यके प्रतियोगि

वैयधिकरण्यं देयमिति फलितमित्याहुः साध्यस्यैव यादृशः संबंधेन तत्र यादृशसामानाधिकरण्यं इत्यनुषंजनीयमित्याशयेनाहुर्यादृशे

ति साध्यस्य यादृशः संबंध इति साध्यतावच्छेदकसंबंधस्यान्वर्थ अत्रापि महानसीयवह्निसंयोगेन वह्निसामान्याभावस्य स्वत्वमित्सत्वेना

व्याप्तिवारणाय यः संबंध इति परित्यक्तं संबंधद्वयप्रवेशे स्थलद्वये संबंधविशेषनिवेशो गौरवात् एवं कल्पे गौरवात् यद्धेतौ तियत्र एतत्कल्पे साध्य यम॰

३५

तावच्छेदकसंबंधातिरिक्तानंतसंबंधावच्छिन्नाधेयताकप्रतियोगितावच्छेदकभेदकूटनिवेशेऽपि गौरवेणास्य लक्ष्ये संबंधनिवेशघटितपूर्वकल्पस्यैव
लाघवमिति तत्र उपदर्शितरीत्या केवलसामान्याभावनिवेशेन भेदकूटस्यैवानिवेशात् हेत्वन्नियामकसंबंधेन व्याप्यत्वव्यापकत्वव्यवस्थापनमु
पक्रमते दीधितौ एवं स्थितइति सामानाधिकरण्यादिघटितं व्याचष्टे व्याख्यायां सर्वत्राधिकरणत्वांशे इति इदं च सामानाधिकरण्यांशे व्याख्या
नेः हेतुसमानाधिकरणे तत्संबंधावच्छिन्नाभावनिष्ठहेतुमद्वृत्तित्वस्य परिग्रह इति तथा चाभावे हेतुमद्वृत्तित्वे हेतुमत्संबंधित्वं वाच्यं अन्यथा हेत्वनियाम
कव्यभिचारित्वादि संबंधावच्छिन्नप्रतियोगिताकाद्येनाद्यभावे साध्ये द्रव्यत्वादावतिव्याप्त्यापत्तेरिति भावः इदमुपलक्षणं साध्यसामाना
धिकरण्येपि तत्संबंधावच्छिन्नत्वमपि संबंधित्वरूपं बोध्यं वस्तुतस्तु सामानाधिकरण्यघटितव्याख्यायां सर्वत्र सामानाधिकरण्ये साध्यसामानाधिकरण्ये इत्याशये
नाह व्याचष्टे सर्वत्रेति साध्याधिकरणत्वेऽधिकरणतानिरूपकत्वरूपं हेतुघटकाधिकरणत्वे चेत्यर्थः हेत्विति हेत्वधिकरणत्वस्य वृत्तित्वघ
टकाधिकरणत्वस्य चेत्यर्थः शेषं पूर्ववत् सर्वत्राधिकरणत्वांशे संबंधित्वनिवेशफलमाह दीधितौ तथा चेति तादात्म्येनेति शेषः व्याख्यायां
व्याप्यव्यापकधर्मवतः व्याप्यधर्मवतो व्यापकधर्मवतश्च एतत्संबंधेन धर्मवत्तावच्छिन्नेत्यनेनान्वयः दीधितौ अन्योन्याभावइति इ
दं चैवमुक्तरीतिमनुसृत्य तत्संबंधेन तादात्म्यसंबंधावच्छिन्नप्रतियोगिताकत्वान्तर्गतत्वेन निवेशः लक्षणेऽभावत्वेनैव निवेशात् तादात्म्यसं
बंधावच्छिन्नत्वेन च पूर्वसंबंधभेदेन प्रतियोगिताविशेषणीयस्य संसर्गभेदादिति वाच्ये तादात्म्येन साध्यतायां व्याप्यवृत्तिसाध्य राम०

ना॰प्र॰ कत्वेन प्रतियोगितावैयधिकरण्यस्यैवाभिनिवेशेन संबंधान्तरावच्छिन्नसाध्याभाववारणाय प्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वनिवेशस्यावश्य-
३५ कत्वात्प्रतियोगिवैयधिकरण्यघटितकल्पाभिप्रायेणोक्तमिति चेन्न सम्यक् व्याप्यहेतौ साध्यकेतुहेत्वनुपादानेन च व्याप्यहेतावव्याप्यहेतौ त्वधर्मसंबंधेन
कारणीभूतज्ञानेन तद्वश्यमुपादेयमिति वाच्यं पूर्वोपदर्शितरीत्या तादृशभ्रमानंगीकारात्तद्धेतोरप्रतीकाराच्च वह्निमत्त्वेनेति न च वह्न्यात्मकस्य वह्नि-
मत्त्वस्य कथमवच्छेदकत्वमिति वाच्यं परंपरासंबंधेन वह्नित्वस्यैव वह्निमत्त्वान्न तदनवच्छेदकेन्यस्यात्र तदवच्छेदकतानवच्छेदवह्नितावच्छिन्नेत्यस्यैकत्वा-
हीनेनु तादात्म्येन व्याप्तेरनभ्युपगमे न क्षतिरित आह अत एवेति उक्तेः पृथिवीत्वेनेतरभेदसाधने पर्यायितयोक्तेः संगच्छत इति तथा च पृथिवीत्वादीनां
मितरभेदानुमापकत्वरूपपृथिव्यादिलक्षणत्वानुपपत्त्या तदभ्युपगम आवश्यक इति भावः पक्षविशिष्टज्ञाने पक्षधर्मताज्ञाने क्वचित्स्वरूपनिष्ठ
त्वज्ञानेऽसिद्धिवारणाः विशिष्टानुमितिरित्यत्र अभावेऽकप्रत्ययः व्याख्यायोऽयथार्थस्य तादृशधूमवत्त्वग्रहे तादृशवह्न्यनुमित्युत्पत्तेरनेकान्तस्याहीयत इतो ता-
दात्म्यात्तर्यदि शिंशपात्वतादात्म्येन वृक्षव्याप्यानस्यात्तदा तादात्म्येन वृक्षवती न स्यादित्याकारकानुकूलतर्करूपात्तत्पंचम्यर्थो जन्यत्वं तेन स च व्या-
प्तिनिष्ठ्यर्थान्वयः वस्तुतस्तु तादात्म्यादित्यत्र पंचम्यर्थोऽनेन सत्तायोगगुणान्यत्वविशिष्टगुणान्यत्वविशिष्टसत्त्वमिति संज्ञैवैवं पंचम्याघटितत्वमर्थः न
स्य च विशिष्टव्याप्यावन्वये विशेषणीव्यापकतायामप्यन्वयः वृक्षशिंशपयोरिति वृक्षस्य स्वरूपेत्यव्यापकता निरूपकत्वं शिंशपा पापाद्याधेयत्वेष
स्यार्थः तस्य च व्याप्यावन्वयः वृक्षस्य व्याप्यत्वभ्रमनिरासायाह व्याख्यायां पाशिंशयेति अत्र नदृष्टीति मान्यायक्त्वनन्तु तादात्म्यादित्यादिग्रन्थेन ता दात्म्य०
३५

हेत्वेनव्याप्तिव्यापकतयोस्साधकंतादृशधूमादिसपक्षशिंशपायादिसमवायेनवह्न्याभाववत्तिसमवायेनवृत्तिमत्तौस्यात्तदाहदृष्टान्तिकानस्यादित्या
कारकानुकूलतत्कीदिशत्वघटकतयाव्याप्तेस्समवायेनव्याप्तौतद्घटकतयासमवायेनैवतयोस्साधकत्वान्नचतथापिजलादीनांपृथिवीत्वाभा
ववाप्यत्वोक्तौरेवतादात्म्येनतत्साध्यकेइतिवाच्यंतस्यास्तादात्म्येनव्याप्तिसाधकत्वेपिव्यापकत्वासाधकत्वात्तत्रयुक्तिमाहअतएवेतितादा
त्म्येनव्यापकत्वस्यापिस्वीकारादेवेत्यर्थः ननुपृथिवीत्वेकदेशेजलादिभेदसिद्ध्यातादृशजलादिभेदाभावव्यापकीभूताभावप्रतियोगित्वे
नपृथिवीत्वज्ञानादेवपृथिव्यांजलादिभेदसिद्धिसंभवेतादात्म्येनव्याप्त्यनभ्युपगमेपिनक्षतिरतआह अतएवेतिसर्वत्रैवतेनसम्यक्
जलादिव्यापकीभूताभावप्रतियोगित्वेनपृथिवीत्वज्ञानादप्यनुभवसिद्धायाः पृथिव्यांजलादिभेदसिद्धेरुपलापेनुमशक्यत्वात्तदुपला
पेवक्ष्यमाणोप्यपलापस्यसुवचत्वाच्चेतिप्राहुः वक्तुमशक्यत्वादित्यत्रयाचतादात्म्येनव्यापकत्वेनसिद्ध्यादिरित्यभावः ननुस्वरूपतदुपस्थि
तएवेत्यादिपर्यालोचनयातादृशप्रतियोगितानवच्छेदकत्वेनाभावमात्रेणसाध्यतावच्छेदकावगाहिपरामर्शहेतोरित्यपर्यवसितत्वाच्चवह्नित्वा
दिनावह्निवाद्यविषयकात्तादृशप्रतियोगितानवच्छेदकधर्मसमानाधिकरणावृत्तित्वादिपरामर्शहेतोद्धूमादानुमित्यापत्तेः नैवापत्तिरितिवा
च्यंतथासतिकदाचिद्वह्नित्वेनकदाचिद्द्रव्यत्वादिनावह्न्यनुमितिरितिनियमानुपपत्तेः नचतादृशप्रतियोगितानवच्छेदकत्वेनतत्तद्
मीवगाहिपरामर्शस्यतत्तद्धर्मावच्छिन्नविधेयकानुमितिहेतुत्वोपगमान्नानुपपत्तिरितिवाच्यंतादृशानवच्छेदकत्वेनैववह्नित्वादिभानेन राम०

भा॰म द्रव्यत्वादिमानस्यापिप्रायशःसंभवेनतथाप्यनित्यत्वादिमत्त्वाद्यवगाहित्वस्यगोविषयताशालीतिसामानाधिकरण्यनिरूपकतावच्छेदक
३६ मुद्रयागोत्वावगाहीत्यर्थः तादृशप्रतियोगितानवच्छेदकेवह्नौसंबंधिसंबंधौसाध्याहिदिरित्याकारकइतियावत्तच्चानुमितिहेतुः गोत्वप्र
कारकानुमितिहेतुः तथावसामानाधिकरण्यनिरूपकतावच्छेदकसंबंधात्तत्साध्यतावच्छेदकावगाहिनस्तादृशप्रतियोगितानव
च्छेदकवह्निसमानाधिकरणाभावानित्यादिपरामर्शस्यैववह्नित्वाद्यवच्छिन्नविधेयकानुमितिहेतुत्वोपगमात्तत्कानुपपत्तिरितिभावः
असंभवादितिउक्तरीत्याग्रहदशायामनवच्छेदकत्वधर्मितावच्छेदकतयागोत्वत्वादिग्रहस्यावश्यकत्वादितिभावः अलौकिकप्रत्यक्षे
ति अभावाधिकरणादेशविप्रकर्षादिनातादृशप्रतियोगितावच्छेदकत्वस्याप्यग्रहसंभवेनापादनासंभवेनयोग्यानुपलब्ध्यभावेन
लौकिकप्रत्यक्षासंभवादितिभावः यत्तुनिर्धर्मितावच्छेदकस्यतादृशानवच्छेदकत्वग्रहस्यानुमितिहेतुत्वेव्यभिचारज्ञानकालेपिता
दृशज्ञानसत्त्वेऽनुमित्यापत्तिः तदप्रतिबध्यस्यतादृशज्ञानस्यतदानीमपिसंभवात्नचेष्टापत्तिः तथासतिव्यभिचारस्यहेत्वाभास
त्वानुपपत्तेरितितन्नकदाचिद्वह्निमानकदाचिद्वह्नित्ववांस्त्वानित्यान्यनुमितिनियमनिर्वाहायस्वरूपतोवह्नित्वाद्यवगाहिनस्तादृशा
नवच्छेदकवह्निसमानाधिकरणाभावानित्यादिपरामर्शस्यवह्नित्वत्वादिनातदवगाहिनोऽपितादृशानवच्छेदकवह्नित्ववत्समानाधि व द्धा
करणाभावानित्यादिपरामर्शस्यहेतुत्वस्यवाच्यत्वतयासधर्मितावच्छेदकस्यतादृशानवच्छेदकत्वग्रहस्याप्यनुमितिहेतुत्वात्तद्विरोधितयैवव राम०
३६

मिचारस्यहेत्वाभासत्वोपपत्तावुक्तस्थलेनुमित्यंगीकारेबाधकाभावात्तत्रयथानुमितिजनकत्वात्किंचिज्ज्ञानविरोधित्वेनहेत्वाभासत्वेदुष्टत्वादि
निश्चयवद्व्यभिचारस्यापिधूमादिलिंगकानुमितौतज्ज्ञानेकीभूतसमूहालंबनपरामर्शविरोधितयाहेत्वाभासत्वापत्तिरितियत्सयुक्तोनुमि
त्यनुत्पादस्यएवहेत्वाभासतयाचभवन्मतेव्यभिचारस्यहेत्वाभासत्वानुपपत्तिरेवंतज्ज्ञानेपिनिर्धर्मितावच्छेदकज्ञानोत्पत्त्यानुमित्युत्पादे
नानुमित्यनुत्पादप्रयोजकत्वासंभवादितिचेत्तद्धर्मावच्छिन्नपक्षकतद्धर्मावच्छिन्नलिंगकतद्धर्मावच्छिन्नसाध्यकानुमितित्वावच्छिन्न
जनकतावच्छेदकीभूतविषयतावच्छिन्नप्रतिबध्यतानिरूपितप्रतिबंधकताशालिज्ञानविषयत्वस्यैवहेत्वाभासतानियामकत्वेनानु
पपत्त्यभावात्एतेनतादृशज्ञानवच्छेदकद्रव्यत्ववद्वह्निसमानाधिकरणधूमवानयमित्यादिज्ञानस्यैवतादृशज्ञानवच्छेदकवद्वह्निसमा
नाधिकरणधूमवानयमित्यादिज्ञानस्यापिवह्निमानयमित्याद्यनुमितिजनकतायाआनुभविकत्वादिदमसंगतमित्यपिनिरस्तंदृष्टां
तेतथानुभवेपिदार्ष्टांतिकेतथानुभवस्यासिद्धेः विलक्षणविषयताशालीत्यनेनदृष्टांतव्यावृत्तेर्दार्ष्टांतिकमात्रवृत्तिविषयताया
एवोक्तत्वेनानुपपत्त्यभावात्नचैवंकेवलाचापिग्रेथ्यस्वरूपताज्ञानताविगाहिन्याज्ञानवान्यमित्याद्यनुमितेरनुपपत्त्याव्यापक
ताज्ञानेहेतत्राखंडनेहीविविक्तताभसंगतेउक्तरीत्यैवोपपत्तेरितिवाच्यंव्यभिचारज्ञानकालेनुमित्यनुदयस्यानुभाविकत्वाभिमानेन
एतेनेसक्तानुभाविकत्वाभिमानेनचसधर्मितावच्छेदकानवच्छेदकत्वग्रहस्यैवानुमितिहेतुत्वमित्याशयेनैवतत्स्यसंगमनीयत्वात्एमं॰

२४

मा॰म॰ यद्वा ग्राह्याभावावगाहितया विरोधितया एवंधर्मितावच्छेदकनियंत्रितत्वपर्याप्तेन रूपेण विरोधिन एव निर्धर्मितावच्छेदकस्य नाविरोधित्वे
३७ साध्याभाववद्वृत्तित्वरूपव्यभिचारज्ञानस्य च मणिमंत्रादिन्यायेनैव स्यात् तत्प्रकारेण विरोधितया निर्धर्मितावच्छेदकज्ञानेपि विरोधित्वमेव एवं
च व्यभिचारज्ञानकाले नानुमित्यापत्तिः मणिमंत्रादिन्यायेन विरोधित्वे मानाभावेन साध्यतावच्छेदके तादृशावच्छेदकत्वरूपव्यभिचारज्ञा
नस्य ग्राह्याभावदृगाहितयैव विरोधित्वेनोक्तापत्तिवारणाय सधर्मितावच्छेदकतादृशानवच्छेदकत्वग्रहस्यैव हेतुत्वं वाच्यमित्याशये
नाग्निमद्व्यापकताज्ञाने हेतुताखंडनसंगतिः अथवा धर्मितावच्छेदकभेदेन प्रतिबध्यप्रतिबंधकभावे स्वामित्वेतया प्रकृते व्यभिचारज्ञान
स्य वह्नित्वलाघवमिति रीत्या धर्मीनवच्छिन्नवह्नित्वादिरेहितत्रिविषयताशालि तादृशानवच्छेदकत्वग्रहत्वमेव निर्धर्मितावच्छेदकज्ञानसाधार
णप्रतिबध्यतावच्छेदकमिति नोक्तापत्तिः लाघवेन वह्नित्वलाघवावच्छिन्नविषयतैव प्रतिबध्यतावच्छेदिकेत्याशयेन चाग्निमद्ग्रंथसंग
तिरिति रहेत्ववधेयं अत्र वस्तुरूपता उपस्थिता एवं सत्यादिकं वस्तुगतिमनुसृत्य सधर्मितावच्छेदकज्ञाने स्यैवानुमितिहेतुत्वेपि तादृ
स्येन स्वरूपेण तद्गोत्वधर्मितावच्छेदकतादृशानवच्छेदकत्वग्रहस्य गोत्वलाघवग्रहदशायामपि सत्त्वेनासंगत्यापत्तेरभावात् एवं
सति अग्निमद्व्यापकताज्ञाने हेतुताखंडनस्यासंगतिस्तोभयत्वेपि तादृशान्येन स्वरूपेण ज्ञानत्वधर्मितावच्छेदकताकानवच्छेदकत्वे
ग्रहाहानवानित्यनुमितिसंभवेन हेतुवीरगतेलस्य समाधानाचेतिकेचित्तन्न सधर्मितावच्छेदकज्ञानेनैवानुमितिहेतुः गोत्वलाघवग्रहदशायां रा॰म॰ ३७

भिन्नस्य गोत्वत्वाद्यैस्तादृशानवच्छेदकत्वाग्रहदृशायामित्यर्थः तेन तादृशानवच्छेदकगोत्वावच्छिन्नसंबंधिसंबंधी साक्षाद्धितिस्ते वैशिष्ट्याग्रहस्य गोत्वत्वाद्यग्रहदृशा
यामसंभवेऽपि न दोष इत्याकूतं अन्ये तु गोत्वत्वेतिभावप्रधानो निर्देशः तथा च गोत्वत्वाद्यग्रहदृशायामित्यस्य गोत्वत्वत्वादिना रूपेण गोत्वत्वाद्यग्रहदृशायामित्यर्थः
तादृशैव न गोः साध्यत्वे गोत्वत्वेन रूपेण गोत्वस्योपस्थितिमात्रमपेक्षितं समवायेन गोत्वस्य साध्यत्वे च गोत्वत्वत्वेन गोत्वस्योपस्थितिरपेक्षितेति भावः यत्तु गोत्वस्य वि
शिष्टगोवृत्तित्वरूपस्य स्वरूपतो भानासंभवेनैतज्ज्ञानदृशायां तद्वृत्तित्वविमानस्यावश्यकत्वेन दृश्यमसंगतमिति तत्र न यतो गोवृत्तित्वरूपगोत्वत्वस्य स्वरूपतो भानसंभवो हि
त्याकूतः परे तु साध्यतावच्छेदके तादृशावच्छेदकत्वाभावकज्ञाने तत्संविन्निवेशयतो यातादृशावच्छेदकत्वाभावेऽपि साध्यतावच्छेदकमादाय तत्संबंधेन भासतेन या
च साध्यतावच्छेदकविशिष्टतादृशावच्छेदकत्वाभाववद्विशिष्टसाध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यज्ञाने हेतुः तादृशविशिष्टविषयत्वेन कारण
तावच्छेदिका तादृशावच्छेदकत्वाभावे व्याधिकयतया साध्यतावच्छेदकवच्छेदज्ञानमेव व्यभिचारज्ञानेन तथा च स्वरूपतः साध्यतावच्छेदकविषयतानिवेशोऽपि व्यभि
चारज्ञानस्य प्रतिबंधकत्वेऽपि पत्तिः स्वरूपतः साध्यतावच्छेदकावच्छिन्नविधेयताकानुमित्युपपत्तिस्तु यत्र शाब्दपरामर्शादिस्थले तत्त्वविनिवेशतानघटितेतत्र
वह्नित्वत्वादिधर्मितावच्छेदककतादृशानवच्छेदकत्वज्ञानं स्यवह्नित्ववत्वानित्याद्यनुमितेरेव तत्ज्ञाने प्रमाणे हेतुत्वमित्याकूतं तत्समवायात्मसंबंधेन ज्ञाते स्वरूपतः
प्रकारत्वस्य सिद्धांतविरुद्धत्वात् नवीनास्तु वह्न्यसमाराप्रतियोगिताधर्मिकयत्संबंधावच्छिन्नत्वयद्धर्मावच्छिन्नत्वोभयाभावघटितलक्षणाभिप्रायेणैव हेत्वे
पत्तो गोत्वादिप्रकारकानुमितौ तादृशप्रतियोगिताकत्वावच्छेदेन गोत्वावच्छिन्नत्वतादात्म्यसंबंधावच्छिन्नत्वोभयाभावज्ञानस्य हेतुतया तत्र चावच्छिन्नत्वेति रामं

२६

भा॰प्र॰ रूपितत्वसंबंधेन स्वरूपत एव गोत्वस्य प्रकारतया गोत्वत्वाग्रहेऽनपेक्षणादित्याहुः तदपि चिंत्यमेव तन्मतेऽपि गोत्वस्य स्वरूपतः प्रकारत्वासंभवात् तन्मतेऽपि तादात्म्येन स्वरू-
३८ पतो गोत्वधर्मितावच्छेदकताकावच्छेदकत्वग्रहाद्वे गोत्वत्वाग्रहदशायां गवानुमितिसंभवेन स्मरणाभ्याभावघटितत्वास्यनुधावनवैयर्थ्याच्च एतेन व्यस्मारण
पारिभाषिकावच्छेदकत्वघटितप्रतियोग्यनधिकरणहेत्वधिकरणवृत्त्यभावीयप्रतियोगितासामान्ये यद्धर्मविशिष्टसंबंधिनिष्ठाभावप्रतियोगितानवच्छे-
दकावच्छेदकत्वयत्संबंधावच्छिन्नत्वोभयाभाववत्त्वेन संबंधेन तद्धर्मावच्छिन्नस्य व्यापकत्वमिति निष्कृष्टलक्षणाभिप्रायेणोक्तं तत्र गोत्वत्वाग्रहेऽपि स्व-
रूपत एव गोत्वादिप्रकारकस्य गोसंबंधिनिष्ठाभाववत्त्वाद्याकारकग्रहस्य संभवादित्यपि परास्तं अत एव व्याख्यायामपि यत्कैश्चित्स्वत्वस्त्रलेतो व्यस्मारणोत्या
दिकेनिक्षिप्तमस्ति तदप्यसांप्रदायिकमेवेति ध्येयं अपरे तु गोत्वत्वाग्रहदशायामपि स्वरूपतो भासमानगोत्वावच्छिन्नहेतुमन्निष्ठान्योन्याभावप्रति-
योगितानिरूपिततादात्म्यसंबंधावच्छिन्नावच्छेदकत्वाभावरूपान्योन्याभावघटिततादात्म्यसंबंधावच्छिन्नव्यापकताज्ञानात्तादात्म्येन स्वरूपतो गोत्व-
प्रकारिकानुमितिसंभवस्तेन एकरूपेणावच्छेदकेऽपि अवच्छेदकतानवच्छेदकरूपेणावच्छेदकत्वाभावे स्वीकृते वान्योन्याभावघटितलक्षणस्य ग्रंथ-
कृता यद्रूपावच्छिन्नमित्यादिना परिष्करणीयतया तदभिप्रायेणैव तस्य गतिः केवलान्वयिग्रंथे च प्रतियोगितानवच्छेदकरूपेणाप्रतियोगित्वाभा-
वस्यैवावच्छेदकेऽप्यवच्छेदकतानवच्छेदकरूपेणावच्छेदकत्वाभावस्य प्रामाणिकतया व्यापकताज्ञाने साध्यतावच्छेदकस्य स्वरूपतो भानेन संभवतीत्य-
भिप्रायेण व्यापकतासामान्यघटिता मते स्वरूपतो ज्ञातत्वादिप्रकारकानुमित्यनुपपत्तेर्व्यस्मारणात्तयानन्दवीपरग्रंथविरोध इत्याहुः ननु तथाप्येतत एवेत्यारभ्य॰ ३८

द्विकासंयोगत्वेसाध्यसाधनभेदेन वा दीधितिकृता तत्प्रतियोगिव्यधिकरणत्वेनाभावप्रतियोगित्वघटितव्याप्तेरेवखण्डनं तयोर्गोत्वत्वाघटितहेतुसाध्ययोरपि सम
वायेनैव गोत्वस्यानुमितिसंभवेन तादात्म्येन व्यापकत्वानंगीकारेपि क्षतिविरहात् न चानुमितिजनकज्ञानविषयव्याप्तेरेव निरूप्यतया गोत्वेनानन्वय
मदृशायामनुमितिरुपपन्नेति यत्प्रतियोगितानवच्छेदकत्वघटितव्याप्तेरेवं वक्ष्यमाणैव चेति वाच्यं गोत्वत्वाघटितहेतुकालीनतादृशाध्यवसायामन्योन्याभावघटि
ततादात्म्येन व्यापकत्वग्रहस्यापि संभवादिति चेन्न अन्यत्र एवं सति दिग्रन्थस्यैकोनत्वाभिप्रायकत्वेनादोषात् केचित्तु साध्याभाववद्वृत्तित्वस्य व्या
प्तित्वमते द्रव्यत्वविशिष्टसत्त्वादिसाहाव्यव्याप्तिवारणाय साध्याभाववद्वृत्तित्वरूपताधेयमानवच्छेदकहेतुतावच्छेदकत्वं तद्रूपं तत्र यथा साध्याभावे यो
साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेन तत्प्रकारस्यापि व्यापकत्वघटितव्याप्तावपि साध्यतावच्छेदकावच्छिन्नप्रतियोगितायाः सं
बंधविधया निवेशेन साध्यतावच्छेदकविशिष्टसाध्ये साध्यतावच्छेदकावच्छिन्नप्रतियोगितासंबंधेन हेतुसमानाधिकरणाभावाभावरूपव्या
पकत्वमेव निवेश्यते तत्संबंधनिर्देशे त्वगुरुभूतस्य साध्यतावच्छेदके तादृशाभावप्रतियोगितावच्छेदकत्वाभावस्य निवेशे प्रयोजनविरहात् तत्व
भिचारेपि साध्यतावच्छेदकविशिष्टसाध्ये तत्संबंधेन हेतुसमानाधिकरणाभाववत्त्वमेव एवं च धर्मितावच्छेदकनियंत्रितो व्यभिचारोन्न
व्यापकतात्वानयोः प्रतिबध्यप्रतिबंधकभावोपि साधु संगच्छते अन्यथा धर्मितावच्छेदकस्य साध्यतावच्छेदकतावच्छेदकस्योपस्थितिं विना तत्से
द्दौ व्याप्तेः अत्र एवैक्षणे साध्याभावाधिकरणतानिरवच्छिन्नायाः ह्याद्वितीयलक्षणे चाभावस्य हेत्वधिकरणवृत्तित्वे निरवच्छिन्नत्वेयाद्यत्र तो राम०

सा॰प्र॰ ४०
३९

न्याभावस्याव्याप्यवृत्तित्वेन प्रतियोगिवैयधिकरण्यनिवेशेनानिर्वाहात् अत एवानयोर्व्याप्त्योः शरीरसाम्येन वक्ष्यमाणकेवलान्वय्यनुमानखंडनम
पि खंडितं भवति एवं च सति अयं गौः सास्नावत्त्वादित्यादौ तादात्म्येन गोः साध्यत्वे गोत्वेनोपस्थितात्मगो व्यक्तिषु गोत्वावच्छिन्नप्रतियोगितासं
बंधेन हेतुसमानाधिकरण्यान्योन्याभावाभावस्यानुमितिहेतुः संभवति गोत्वस्य समवायेन साध्यतायां तु गोत्वेनोपस्थिते गोत्वत्वावच्छिन्न
प्रतियोगितासंबंधेन हेतुसमानाधिकरण्यात्यंताभावाभावस्यानेहेतुत्वेन वाच्ये तत्र गोत्वत्वाद्यग्रहदशायां न संभवति स्वरूपेण तूपस्थिते गोत्वे ता
दृशाभावज्ञानहेतुत्वे च तोत्रिकानामसंभवं तन्निर्धर्मितावच्छेदकतया व्यभिचारज्ञानाप्रतिबध्यत्वाहितितादात्म्येन व्यापकत्वास्वीकारे अनुमिति
रेव दुर्घटेति साध्यसाधनभेदेन व्याप्तिभेदेपि तादात्म्येन व्यापकत्वस्वीकारस्यावश्यकतया नात एवैतादृशे कमसंगतमिताद्दृशस्थले उक्तरीत्या ता
दृशाहेतुत्वे तोत्रिकासंभवतत्संबंधेन वा सिद्धेः साध्यतावच्छेदकावच्छिन्नप्रतियोगितासंबंधस्य हेतुनियामकतया प्रतियोगितानवच्छेदकत्वाच्च अ
न्योन्याभावस्याव्याप्यवृत्तित्वेपि प्रतियोगिवैयधिकरण्यनिवेशानिर्वाहस्योक्तत्वेन तदनिवेशपनिरवच्छिन्नहेत्वधिकरणवृत्तित्वनिवे
शे कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभावाद्यौ साध्ये आत्मत्वादिहेतावव्याप्तिरपि केवलान्वयिग्रंथे स्वरूपतो ज्ञानत्वाव
गाहिज्ञानविलितत्वमितरेनुपपत्त्या व्यापकताज्ञानहेतुताखंडनानुपपत्तेः स्वरूपतो ज्ञानत्वविशिष्टज्ञानेनिरुक्ताभावज्ञानान्तादृशा
नुमितेः संभवात् मिश्रानुयायिनस्तु गोत्वत्वाद्यग्रहदशायामपि गोतादात्म्यसाध्यव्यापकताग्रहसंभवेन तत्साध्यज्ञायमानायोगितादात्म्य ९
३९

त्म्यविधेयकानुमितेस्सत्त्वेबाधकेन तादात्म्यनिष्ठव्यापकताज्ञानस्यैव तादात्म्येन तत्तदनुमितिहेतुत्वांगीकारेण तादात्म्येन गोविधेयकत्वस्वीकारेण स्वरूपतो गो
त्वप्रकारकानुमितिनिर्वाहे तादात्म्येन व्यापकत्वानंगीकारेऽपि न क्षतिः न च गोतादात्म्यस्य गोत्वस्वरूपतया गोतादात्म्यत्वेन व्यापकताग्रहे गोत्वेऽग्रहस्यावश्य ल
कत्वमेवेति वाच्यं तादात्म्यस्यातिरिक्तत्वाभ्युपगमात् अन्यथा तादात्म्यसंबंधेन वह्न्यादीनां साध्यत्वे तत्र रूपादिहेतौ हेत्वधिकरणवृत्त्यभावीयप्रतियो
गितानवच्छेदकतादात्म्यसंबंधेन संबंधिनोऽप्रसिद्ध्याऽव्याप्त्यापत्तेः न ह्यविधतादात्म्यस्य वह्नित्वादिस्वरूपस्य घटपटादेरधिकरणसंबंधत्वादि
त्वाद्भेदेऽपि न समं केऽपि एवमपि गोतादात्म्यव्यापकत्वग्रहदशायां स्वरूपतो गोत्वप्रकारकानुमितेरनिर्वाहेण तादात्म्येन व्यापकत्वांगीकारस्यावश्य
कत्वात् अत एव गोत्वत्वाद्यग्रहदशायामिति गोतादात्म्यत्वादिरूपेण व्यापकतावच्छेदकत्वाग्रहदशायामित्यर्थकतया व्याख्यापितं कैश्चित्तत्सांप्रदापि
कैरित्यलमप्रसावेशेन आधेयत्वाद्यनवच्छिन्नेति तेभ्याश्च मात्रपदमाधेयत्वावच्छिन्नत्वव्यवच्छेदार्थकं द्रष्टव्यं अत एवेति तथा चात एवाधेयत्वाव
नवच्छिन्नत्वमत एव वृत्तिनियामकत्वमिति फलितं आधेयत्वावच्छिन्नसंयोगएव आधेयत्वाद्यवच्छिन्नसंयोगत्वावच्छिन्नएव न त्वेव आधेयत्वा
द्यवच्छिन्नसंयोगावच्छिन्नप्रतियोगिताकत्वेनैव अनुभवात् अभावानुभवात् अत एव वृक्षतले घटः तत्संयोगादाधेयत्वाद्यवच्छिन्नसंयोगादे
रेव भूतले घटोघोः संसर्गतया भाने विशेषणतानिष्ठः संबंधत्वमिति नृ आधेयत्वावच्छिन्नस्य विशिष्यानिष्ठत्वमिति मते अधिकरणत्वावच्छिन्नस्य
भानमिति संप्रदायः अनुभवानंगीकारे भावस्य प्रतियोगितावच्छेदकसंबंधएव न सिद्ध्येदिति भावः आधेयत्वे- आधेयत्वादिकं सुद्दसंयोग राम॰

१९

गा॰म मात्रेऽप्युद्भूतसंयोगत्वावच्छिन्नं यो यः जलादिमात्रसंबंधीतदवच्छेदकत्वं गगनत्वे इत्यादिनाद्दृशस्य वृत्तिनियामकस्य व्याचक्षुरिति च अत्रमात्रपदस्य
४० कालीयिकत्वे संयोगमात्रस्याभावप्रतियोगितावच्छेदकत्वे नैव गगनत्वे द्वीपकत्वसिद्धौ वृत्तिनियामकेतस्यैव यथ्र्थं किंच एकस्य वृत्तिनियामकसंयोग
स्याभावप्रतियोगितावच्छेदकत्वे सर्वस्यापि तत्त्वं कस्यचित्तत्वाभावे सर्वस्यापि तत्त्वाभावेऽन्युक्तेरुभयत्रैतोस्यादिति सर्वस्यैव वृत्तिनियामकसंयोगस्या
भावप्रतियोगितावच्छेदकत्वलाभे न गगनसंयोगमात्रस्यैवेत्यादिशंकाया असंभवेन तन्निरासककालीयिकमात्रपदार्थेन येकत्वमयीत्स्व
रसोद्भूतद्रव्यः तेन संबंधेन वृत्तिनियामकसंयोगसंबंधेन घटो घटाभाववानेव वृत्तिनियामकसंयोगेन घटघटाभावं एव प्रतियोगितायां साध्यतावच्छेदक
संबंधावच्छिन्नत्वस्य निवेशादिति भावः आद्यविवक्षायां गगनादिसंयोगिनि च अवच्छेदकभेदं विना नातेन संबंधेन गगनाद्यभावस्य संभवति एक
स्मिन्नवच्छेदकभेदं विना प्रतियोगितावच्छेदकसंबंधेन प्रतियोगितदभावयोः समानाधिकरण्यस्य विरोधात् न हि न्यदेशस्यावच्छेदकत्वे संभवति गग
नादेर्द्देशिकाव्याप्यवृत्तित्वविरहात् तत्कालस्यैवावच्छेदकत्वेऽपि व्यतिसामयेनाहेतुत्वान्निकोलदे इत्यादिगगनाभाववत्वादिति हेतुरुपलक्षणं द्वि
तीयविवक्षायां समवायादिना गगनाभाववत्वादिहेतुरपि दुष्टव्यं तेन संबंधेन वृत्तिनियामकसंयोगसंबंधेन तत्वृत्तिनियामकसंयोगस्यापि व्याप
कत्वाघटकत्वाय च्छेदकसंयोगत्वावच्छिन्नवात्तेन संबंधेन वाधानवत्तादेश्यायामन्यातस्यगगनोद्यनुमितास्याप्रतिरत आहहेविधिनोऽसिद्धिरपीति च व
मितिरपीत्यर्थः तत्स्यगगनादेः तथैवैसेव कार्य्यमवच्छेदकमाहनन्विति तेया च पद्रूपावच्छिन्नयत्संबंधस्य व्यापकताघटकत्वं तद्रूपावच्छिन्नतत्से राम॰ ४०

वंधस्यैवानुमितौ भानमिति नियमान्वयेन संबंधेन गगनादेरनुमित्युपपत्तिरिति भावः ननु वृत्तिनियामकसंयोगस्यापि गगनादिनिष्ठव्यापकताघटकत्व
मस्त्येव तेन संबंधेन गगनादेः संबंधाप्रसिद्ध्या तदभावस्य प्रतियोगिव्यधिकरणत्वासंभवादित आह तेनेति वृत्तिनियामकसंबंधेनेत्यर्थः व्याख्या
यां प्रदर्शितं इति तथा च तेन संबंधेन सामानाधिकरण्यग्रहाभावान्नानुमितिरिति भावः अव्यापकत्वादितीति तेन सत्वघटकत्वे चरमेत्यपदोपादानप्र
योजनं खंडकालवारणप्रयोजनत्वे दर्शयन्नेव तेन सर्वविशेषणप्रयोजनमाह खंडकाल इति वृत्तिधर्मेति खंडकालवृत्तेरतत्कालत्वादीनामर्थः स
वीरणविशेषणानीति विशेषणविशेषणमपि विशेषणमेवेत्याशयेन बहुवचनोपपत्तिः तथाभिधाने अवच्छेदकव्यतिरिक्तत्वाभिधाने तथा च तो
। तत्कैव महाकालस्यावच्छेदकव्यतिरिक्तत्वव्यपदेशेनैवाभिधानेन च तदवच्छेदकव्यतिरिक्तत्वाभिधानेऽन्यपरत्वशंकानिरासाय विशिष्याभिधानापेक्षा स्या
त् तथाभिधाने तु तत्र महाकालस्यैव तथाभिधानेनान्यपरत्वशंकाया असंभवेन न विशिष्याभिधानापेक्षेति तथाभिधानमावश्यकमिति भावः अ
स्तीति गुणादेर्गुणान्यत्वविशिष्टसत्त्वादिमत्त्ववारणाय सामानाधिकरण्यघटकविशेषणविशेष्यभावसंबंधाभ्यां तदुभयवत्त्वस्य विशिष्टवत्त्व
नियामकतया महाकाले महाकालान्यत्वविशिष्टघटवत्त्वसंभवेन तन्नैवं महाकालस्य तद्गेहाधारत्वव्याघातः घटत्वावच्छिन्नवत्त्वेनैव तदुपप
त्तेरिति भावः महाकालवृत्तौ इति महाकालवृत्तीत्यर्थः क्वचित्तथैव पाठः एवं च द्वैधितौ धर्मस्य तत्र षष्ठ्यर्थे द्विरहो शिरस्त्वे वा भेदस्य च विशेष
मात्र
णतया विशिष्टान्वयीति ध्येयं ननु खंडकालसाधारणकालिकविशेषणताप्रतीतौ महाकालीयविशेषणतया अवैलक्षण्येन नावतारणोपपद्यत आह°

२६

मा॰भ॰ स्यत्र आह महाकालविशेषणतायाइति खंडकालीयविशेषणतेति यावत् खंडकालसाधारणविशेषणतेत्यर्थः ननु तस्याः स्वत्वे लक्षणे प्रमा

४१ णाभावः न च कालस्वरूपाणां भेदेन तदात्मकविशेषणतानामपि भेदे आवश्यक इति वाच्यं तथा सति यत्किंचित्कालविशेषणतया

साध्यत्वे तन्मात्रवृत्तित्वे तावदप्यसिद्धिसंभवे हेतोरिति कारस्य महाकालमात्रवृत्तित्वे हेतुकोऽनुधावन स्पन्तिबीजत्वात् पत्रेण आह कथमन्यथेति

औपपत्तिकेतियो क्रिके त्यर्थः क्वचिद्धेतोरिति केति पाठः तथा च खंडकालविशेषणतानामिहाभावेन घटे इत्साधिकजातीयप्रतीतिविष

यत्वेपि महाकालविशेषणतायाः कालसत्वात् तिविलक्षणप्रतीतिविषयत्वेनैव लक्षणे प्रमावश्यकं एवं च दैशिकविशेषणतया

महाकालान्यत्वाधिकरणे घटस्य महाकालविशेषणतया वृत्तित्वरूपसामानाधिकरण्याप्रसिद्ध्या तेन संबंधेन महाकालान्यत्वविशिष्टघ

टवत्वमप्रसिद्धमेव खंडकालसाधारणविशेषणतया तद्वृत्तित्वरूपसामानाधिकरण्यप्रसिद्धावपि महाकालविशेषणतया तेन संबंधेन म

हाकालान्यत्वविशिष्टघटवत्वं महाकालेवर्त्तत एवेति महाकालान्यत्वविशिष्टघटाभावोपि न प्रतियोगिव्यधिकरण इति प्रतियोगिव्यधि

करणाभावाप्रसिद्धिनिबंधनाव्याप्तिर्दुर्वारैवेत्यखंडकालार्थः अयमपि परिष्करोति स्वसामानाधिकरण्यघटकविशेषणताविशिष्टोभयसंबं

धान्यौ तदुभयवत्संबंधविशिष्टवत्वमिति नियमेनेन महाकालेकपमहाकालान्यत्वविशिष्टघटत्वमिति चेन्न विषयितादिसंबंधेन संयोगादिघटि

तसामानाधिकरण्यसंबंधेन दंडादिविशिष्टकुंडलादिमत्वस्य ज्ञानाद्यवत्ययस्याविशेष्यस्य सामानाधिकरण्यघटकसंबंधविशिष्टव एम॰ ४१

त्वघटकसंबंधयोरैक्यस्थल एवोपदर्शितनियमः तयोर्भेदस्थले तु विशिष्टवत्त्वघटकसंबंधेनैव विशेषणविशेष्योभयवत्त्वे विशिष्टवत्त्वमित्यपरे नि
यमद्वयस्यावश्यकत्वमुपपादयामः प्रकृते घटसत्त्वे खंडकालसाधारणो विशेषणतायाः सामानाधिकरण्यघटकतया महाकालविशेषणताया अपि विशिष्टव
त्वघटकत्वं तयोर्भेदेन प्रथमनियमाविषयत्वे न द्वितीयनियमविषयतया ऽदोषात् न च नित्यकृतदंडादिविशिष्टकुंडलादिमत्त्वे शानाहेतोर्वैयर्थ्ये किं
त्वेतदुपलक्षितकुंडलादिमत्त्वमेवेति द्वितीयनियमे मानाभाव इति वाच्यं निरुक्तविशिष्टवत्त्वस्यानुभवसिद्धत्वेनापह्नोतुमशक्यत्वात् अन्यथा स
र्वत्रोपलक्षितवत्त्वमेवानुभूयते न तु विशिष्टवत्त्वमित्यस्य वक्तुं शक्यतया विशिष्टवत्त्वस्यैवासिद्धिप्रसंगात् अत एव विशेषणताविशेषेण तेन म
हाकालीयविशेषणतावच्छेदककालमात्रवृत्तित्वनिषेधस्य तादृशविशेषणतया किमपि व्यापकेन साहित्यस्यैव सम्बन्धेऽप्येतद्व्यतिरिक्तस्याभि
धानस्यैवैयर्थ्यं च स्वरूपसंबंधेन गगनादेर्वृत्तिमत्त्वेऽवृत्तित्वग्रंथविरोधप्रसंगश्च महाकालीयविशेषणतया गगनादेर्वृत्तिमत्त्वेऽपि तादृशसंबंधसा
मान्येन महाकालान्तत्वविशिष्टघटत्वाद्यवच्छिन्नप्रतियोगिकत्वविरहेण तादृशघटत्वाद्यवच्छिन्नाभावस्यैवोभयथाभावघटितप्रतियोगिव्यधिक
रणत्वसंभवेन पूर्वकालस्यैव सम्बन्धाहितिकस्य चिन्मल्लपितमपास्तं अथ एतद्व्यतिरिक्तद्व्यात्मक एव कालः इति मतविशेषस्य च नाय कालमा
त्रवृत्तिनिषेधस्य खंडकालेऽपि सत्त्वेन तत्र महाकालीयविशेषणतया साध्यासत्त्वेन व्यभिचारितया लक्ष्यतासंपादनाय उपदर्शितरीत्या महाकालीय
विशेषणतानिवेशनाय चोक्तद्व्यतिरिक्तस्याभिधानस्यावश्यकत्वात् दंडकारी साम महाकालस्यापि महाकालीयविशेषणतया महाकाला रामं

भा॰प्र॰ न्तत्वविशिष्टघटवत्त्वमामहाकालीयविशेषणतायां महाकालत्वन्तत्वविशिष्टघटत्वावच्छिन्नप्रतियोगिकत्वसत्त्वेन तदवच्छिन्नाभावस्योभयाभाववद्वृत्तित्वप्र
५२ तियोगिव्यधिकरणत्वासंभवेन एवैकस्य स्वदृष्टत्वसंभवेन स्वरूपसंबंधेनत्वाद्यग्रिमग्रंथविरोधप्रसंगाभावाच्च उपदर्शितोपपत्तिकविलक्षणानुभवा
नंगीकर्त्तॄणां मतमाह। केचित्विति नत्वमहाकाले विलक्षणविषयोऽनभ्युपगमेन स्पष्टग्रहाधारत्वमत पपञ्चमतएवोक्तोपपत्तिकप्रतीतिबलादिती
स्पतत्र्याह इदानीमित्यत्र विति तत्प्रतीतिवक्रियावच्छिन्नेत्यवेति विशिनिगमनाविरहादिति भावः अधिकरणत्वेनेतिमयाचविलक्षणप्रतीत्यभावेपिइदानी
मितिप्रतीतिबलादेव तस्य ऽगहाधारत्वोपपत्तिरितिभावः सैव खंड कालसाधारण्येव एवकारेण महाकालमात्रवृत्तिविशेषणतानाविशेषत्वव्यवच्छेदः
एवं चैतन्मतेधर्मिस्येत्यत्र षष्ठ्यर्थो निरूपकत्वं व्यापकपदार्थैकदेशव्यापकत्वान्वयीतिद्रष्टव्यं ननुचैवंमहाकालान्तत्वविशिष्टघटाभावएव प्रतियो
गिव्यधिकरणोऽभावस्तत्राह महाकाले चेत्यादि सामानाधिकरण्य घटकविशेषणत्वविशेषणभयसंबंधाभ्यां तद्भयवत्त्वविशिष्टवत्त्वनिया शे
मकतया महाकालान्तत्वविशिष्टघटस्य महाकाले वृत्तित्वं न संभवतीत्याशंकानिरासाय सत्वादित्यन्तम् उक्ततादृशविशेषणतया खंड
कालसाधारणविशेषणतया सत्वादितिऽत्रायमाशयः यथा केषांचिद्देकेन संबंधेन विभिन्नसंबंधेन वा विशेषणतत्संबंधविशिष्टानोन्यत्व
मेव विशिष्टसत्त्वनियामकं न तु क्रोभयवत्त्वं मानाभावात् समवायसंबंधेन घटत्वाधिकरणो विषयितया वृत्तित्वरूपसामानाधिकरण्यसंबं
धेनघटत्वविशिष्टघटादिमत्त्वस्य ज्ञानादावसिद्धिप्रसंगाच्चेन चतदसिद्धावीष्टापत्तिरितिवाच्यं तथासतिइच्छाविषयितयाऽनिरूक्तेच्छात्व राम॰
५२

विशिष्टघटाभाववतीत्यादौ बाधस्य हेत्वाभासत्वानुपपत्तेः यादृशविशिष्टविषयकज्ञानत्वमनुमितिप्रतिबंधकतावच्छेदकं तादृशविशिष्टस्यैव हेत्वाभा-
सत्वेन ज्ञानेन तादृशविशिष्टविषयितासत्वेन तस्य हेत्वाभासत्वसंभवादिति ॥ ननु महाकाले महाकालान्यत्वविशिष्टघटवत्वे मानाभाव इत्यत आह
इदानीमिति एवं यथाकथंचिद्विशेषणादिसत्वे सैव विशिष्टवत्वनियामकत्वे स्यादिति गुणेपि प्रतियोगितया गुणान्यत्वसत्वादिति भावः इ-
तिधीविरहात् इत्यादि प्रमाविरहात् आदिना गुणे गुणान्यत्वविशिष्टसत्वेत्यस्य परिग्रहः तेन महाकाले महाकालान्यत्वविशिष्टघटवानिति धी
विरहेपि उक्तधीबलादेव यथा महाकालान्यत्वविशिष्टघटस्य महाकाले वृत्तित्वे सिद्ध्यति तथैव गुणे गुणान्यत्वविशिष्टसत्तावानिति धीविरहेपि
गुणे गुणान्यत्वविशिष्टसत्तेति धीबलादेव गुणान्यत्वविशिष्टसत्ताया गुणवृत्तित्वे सेत्स्यतीत्याशंका निराकृता तथा च प्रमाणाभावादेव न गुणा-
न्यत्वविशिष्टसत्ताया गुणवृत्तित्वमिति भावः आकुरिति अनेनैवास्वरसः सूचितः स च इदानीं महाकालान्यत्वविशिष्टो घट इति प्रतीत्या विशिष्टा-
नतिरिक्ते घटे महाकालवृत्तित्वसिद्धावपि महाकाले महाकालान्यत्वविशिष्टघटवत्वमसिद्धमेव किंच गुणे गुणान्यत्वविशिष्टसत्तावानिति
प्रतीतेः प्रमात्ववारणाय तन्निरुक्ताभयवत्वे विशिष्टवत्वनियामकमवश्यं वाच्यं न च विशिष्टसत्तावत्वस्य गुणेऽभावादेव न प्रमात्वमिति वाच्यं गुणे
विशिष्टसत्तावत्वसाधकाभावात् तेन च प्रमाणाभाव एव बाधकः अन्योन्याश्रयप्रसंगात् तथा च महाकाले महाकालान्यत्वविशिष्टघट-
वत्वं न संभवत्येव न चैवं बाधस्य हेत्वाभासत्वानुपपत्तिः पूर्वोक्ता दुर्वारेति वाच्यं वृत्तिनियामकसंबंधेन विशिष्टवत्वस्य इव निरुक्ताभयवत्वस्य अप-

भा॰ प्र॰ नियामकत्वात् यत्र सपक्षकपक्षसाध्यकयोर्हेत्वोर्यावन्तो दोषाः संभवन्ति तावदन्यतमत्वस्यैव हेत्वाभासत्वमिति सर्वत्र निष्कर्षः॥ केचित्तु ज्ञाने ज्ञातह्रदत्वविशिष्टविषयित्वास्

४३ न्येऽपि वह्न्याद्यवच्छिन्नाह्रदत्वविशिष्टपर्याप्तविषयताप्रतियोगित्वस्य ज्ञाने सत्त्वेनोक्तबाधस्य हेत्वाभासत्वसंभवमेव द्वयान्तरविशेषोपज्ञाह्रदत्वविशिष्टप्रतियो

गित्वस्य ज्ञाने सत्त्वेनोक्तबाधस्य हेत्वाभासत्वसंभवमेव द्वयान्तरविशेषोपज्ञाह्रदत्वविशिष्टप्रतियोगिकत्वमिथ्यात्वेनैव विषयतायां न तु ज्ञानवृत्तेर्गतस्योत

तदुपलक्षितप्रतियोगिकत्वमेवेति प्राहुः॥ अपि च एतत्क्रियावच्छिन्नो यो महाकालस्तत्सत्त्वसंगतेऽद्य तदानीं तत्र न कालो न तदानीं तत्रेति प्रतीतेरप्रामाण्याप

पत्तेर्वविनिगमकत्वात्तद्विषयस्य महाकालत्वस्यैकात्तस्यैव प्रत्यभिज्ञापनरोधेन विशिष्टानुयोगिकविशिष्टप्रतियोगिकभेदस्याप्यनुपगमात्संभवा

त् एवं इदानीं महाकालानन्तत्वविशिष्टो घट इति प्रतीतेरप्रामाण्यापत्तिरपि विनिगमकत्वेन तदिच्छया उपदर्शितरीत्या महाकाले महाकालानन्तत्वविशि

ष्टघटाधिकरणासंभवात्तत्र च सद्विशेषणे हीति न्यायेन तत्क्रियाया एव विषयत्वमिति वाच्यं तर्हि एकरूप्यापत्तेः सर्वत्र तस्या एव विषयत्वौचित्येन म

हाकालस्य तद्विषयत्वे मानाभावात् अत एव महाकालावच्छिन्नक्रियाया इदानीमिति प्रतीतिविषयत्वेऽपि महाकालस्य तत्त्वेनमेनयवाहृविशिष्टेन

ग्राहकसंविशेषणोऽपि न ग्राहकत्वमिति न्यायादित्यपि परास्तं इदानीं महाकालानन्तत्वविशिष्टो घट इति प्रतीतौ पूर्वोपदर्शितबाधकेन महाकाल

स्याधिकरणत्वेन विषयत्वासंभवेन विशिष्टग्राहकस्यैवासिद्धेः एतेनानन्ताक्रियादिरूपखण्डकाले इदानीमित्यादिविधयोऽधिकरणत्वेन विषयत्व

केऽन्यतापि स्याल्लाघवादेकस्यैव महाकालस्य तत्कालत्वेनापयुक्तेन चातिप्रसंगः क्रियादिरूपखण्डकालस्याधिकरणतावच्छेदकत्वाङ्गीकारात् अत एव राम॰

वत्क्रियादीनामधिकरणतावच्छेदकतया कालोपाधित्वमपि संगच्छते न चैवं खंडकालस्याधिकरणतावच्छेदकत्वेन तादृशधीविषयत्वावश्यप
कत्वेऽधिकरणत्वेनैव तद्विषयत्वकल्पनमुचितमिति वाच्यं तथा सति महाकालस्यैवासिद्धिप्रसंगात् धर्मसत्त्वे च षष्ठ्यर्थोऽभेदः एवं सर्वत्र वि
शेषणतान्वयी तथा च कालिकसंबंधघटितसामानाधिकरण्येन महाकालात्मत्वे विशिष्टाप्रसिद्ध्या महाकालात्मत्वविशिष्टघट्याद्यभा
वस्य प्रतियोगिव्यधिकरणत्वासंभवेनाप्रसिद्धिनिबंधनाव्याप्तिर्दुर्वारैवेसाधयवर्णनमपि निरस्तं उपदर्शितप्रतीतिसिद्धस्य नाममात्रेणाय
स्य क्रियादिखंडकालस्यैवाधिकरणत्वेनेहानीमित्यादिविषयत्वस्योचितत्वात् कालः स्वैवातिरिक्तत्वोपपत्तिकप्रतीतिबलेनैकत्वमहा
धारमहाकालसिद्धेः यत्तु प्रतियोगितावच्छेदकवैशिष्ट्यं साध्यतावच्छेदकताघटकसंबंधेनैव वाच्यं अन्यथा धूमवान्वह्नेरित्यादौ हे
त्वधिकरणस्य कालिकसंबंधेन धूमत्वादिविशिष्टवह्न्याद्यधिकरणतया धूमाद्यभावस्य तथात्वेनाव्याप्त्यापत्तेः न च तादृशाभावा
प्रसिद्धेवं नाव्याप्तिरिति वाच्यं अतीतानागतत्वघटिततत्त्वावच्छिन्नाभावस्यैव प्रसिद्धेः इत्थं च महाकालात्मत्वविशिष्टघ
टत्वावच्छिन्नाभावस्य साध्यतावच्छेदकताघटकसमवायसंबंधेन प्रतियोगितावच्छेदकविशिष्टस्य प्रसिद्धेः महाकालात्मत्वविशि

२२

मा॰म॰ ष्टघटत्वस्योपाधितया स्वरूपसंबंधेनैव वृत्तेः विशिष्टप्रतियोगिकसमवायस्यानभ्युपगमात् अत एव तादृशाभावमादाय न प्रसिद्धिसंभवः

५४ न च प्रतियोगितावच्छेदकताघटकसंबंधेनैव तद्वैशिष्ट्यं निवेशनीयं तथा च तादृशेन स्वरूपसंबंधेन तद्वैशिष्ट्यं प्रसिद्धमेवेति वाच्यं निरु

क्तसंबंधेन तद्वैशिष्ट्यनिवेशे तत्र घटत्वावच्छिन्नाभावस्यापि लक्षणघटकतापत्त्या गौरवेण साध्यतावच्छेदकताघटकसंबंधेन तद्वैशि

ष्ट्यनिवेशे तस्य लक्षणाघटकतया लाघवमिति तन्निवेशस्यैवोचितत्वादिति केनचिदुक्तं तदतीव तुच्छं विशिष्टस्यानतिरिक्तत्वेन विशिष्टप्र

तियोगिकसमवायाभ्युपगमस्यावश्यकत्वात् अन्यथा प्रकृतयुक्त्या गुणान्यत्वविशिष्टसत्त्वादेरपि स्वरूपसंबंधेनैव वृत्त्या विशिष्टसत्ताहि साध्य

कस्थले समवायस्य साध्यतावच्छेदकसंबंधत्वाभावेन गुणादौ तदभावस्य प्रतियोगितावच्छेदकस्वरूपसंबंधेन यथाश्रुतप्रतियोगिवैयधि

करण्यसंभवेन प्रतियोगितावच्छेदकावच्छिन्नत्वस्यातिव्याप्तिवारकतया एवमभिधानस्यासंगत्यापत्तेः परे तु वैशिष्ट्यव्यासज्यवृत्तिधर्मा

वच्छिन्नसाध्यकस्य प्रतियोगितावच्छेदकावच्छिन्नत्वं प्रतियोगिवैयधिकरण्ये निवेशनीयं नान्यत्र साध्यसाधनभेदेन व्याप्तिभिन्नतया त

अतन्निवेशे लाघवात् इत्थं च प्रकृते महाकालान्यत्वविशिष्टघटाभावो घटत्वप्रतियोगिसमानाधिकरण एव प्रतियोगिता च प्रतियो रा॰म॰

५४

प्रतियोगिस्वरूपात्तेषामनेकत्वेन गौरवात्तेनैकप्रतियोग्यधिकरणतामादाय कपिसंयोगि एतत्त्वादित्यादावव्याप्तिः न चैवमपि खंडकालाव्यत्वविशिष्टघस
टेरेव व्यापकत्वसंभवे किमर्थीत्याघट्संगतमिति वाच्यं किमपि व्यापकत्वेनस्यादित्यस्यैवेति स्पष्टमसत्व प्रतिधर्मान्यरूपेणाव्यापकत्वंनस्यादित्यर्थकतया ऽसंगतेरभा
वात् न चैवमग्रे न चैसादेः प्रतियोगितावच्छेदकविशिष्टपदरोपादानं तत्त्वापत्तिप्रदर्शनादि विरोध इति वाच्यं तस्य एकोऽभिप्रायकत्वात् न चैतस्यापि वारणार्थ
मेवचस्यमाणागुरुतरोभयाभावघटितप्रतियोगिवैयधिकरण्यनिवेशापेक्षयाप्रतियोगिवैयधिकरण्ये प्रतियोगितावच्छेदकावच्छिन्नत्वनिवेशनमेवोचितमितिवा
च्यं महाकालमात्रवृत्ति विशेषणतानास्वीकारेण निवेशनेनापि अव्याप्तिवारणासंभवेन वक्ष्यमाणाणीसागुरुतरप्रतियोगिवैयधिकरण्यनिवेशनस्यावश्यकत्वादिति भा
वः ननु तथापि वह्न्यादिसाध्यकस्थलस्य पर्वतादिनुयोगिकसंयोगत्वादिना पर्वतानुयोगिकसंयोगादेः साध्यतावच्छेदकसंबंधत्वेन धूमत्वादिना हेतुत्वे चाव्याप्तिः स
भवति घटादेः स्वेन संबंधेनाधिकरणस्यैवाप्रसिद्ध्या वह्न्यादेरधिकरणत्वस्य हेत्वधिकरणे सत्वेन च तादृशप्रतियोगितावच्छेदकसंबंधेन साध्यतावच्छेदकसंबंधेन वा प्रतियो
गिनोपरधिकरणात्तदन्यत्वस्य हेतुमत्यप्रसिद्धेः तथा च नदुपेस्येतावद्दूरानुधावनेन दीधितिकारस्य निष्फलतामिति चेन्न विशिष्टविशेषरूपेण संबंधतायाः सिद्धांतविरुद्धत्वेन पर्वता
द्यनुयोगिकसंयोगत्वादिना संयोगादेर्न संबंधता किंतु संयोगत्वादिनैव साध्ये तेनान्वयस्य रागुधावनस्य सफलत्वात् केचित्तु तादृशप्रतियोगितावच्छेदकसंबंधावच्छिन्नाधिकर
णतानिरूपितविशेषणताविशेषेणावातादृशप्रतियोग्यधिकरणत्वसामान्याभावो विवक्षणीयः अन्यथा कालिकादिसंबंधेन सर्वस्यैव हेतुमतः प्रतियोग्यधिकरणा
त्वेनाप्रतियोग्यनधिकरणाहेत्वधिकरणस्यैवाप्रसिद्ध्यापत्तेः तथा च नोपदर्शिताव्याप्तिः संभवति घटाद्यधिकरणत्वादेः पर्वताद्यनुयोगिकसंयोगादिसंबंधावच्छिन्ना
धिकरणतानिरूपितविशेषणताविशेषसंबंधाधिकरणासंबंधनयातत्संबंधावच्छिन्न घटाद्यधिकरणत्वाभावस्य हेत्वधिकरणेऽसुलभत्वादिति न दीधितिकारस्य तावद्दूरानुधा
वनं निष्फलमित्याहुः तन्न विशेषणताविशेषमात्रेण प्रतियोग्यधिकरणत्वसामान्याभावनिवेशेनैवाप्रसिद्धिवारणे निरुक्तविशेषणताविशेषपर्यंतस्यानिवेशात्तेन चाप्र

टि॰ विशेषणताविशेषेण साध्यतावच्छेदकसंबंधावच्छिन्नाधिकरणतानिरूपित ४

१

म०प्र० सिद्धेस्तादृशैतद्वारणेऽप्युपदर्शितस्थलेऽव्याप्तेर्वारणाय चैतावत्पर्यन्तं निवेशनीयमिति वाच्यं तथा सति साध्यतावच्छेदकसंबंधावच्छिन्नप्रकृतसाध्याधिकरणतानिरूपितस्व-
४५ रूपसंबंधेन यदभावप्रतियोगितावच्छेदकावच्छिन्नानधिकरणत्वं हेतुमतस्तदभावप्रतियोगितानवच्छेदकत्वस्य साध्यतावच्छेदके निवेशेन सामञ्जस्येन प्रकृताव्याप्तेरप्र-
संगसापत्तेः कालिकसंबंधावच्छिन्नघटाधिकरणतानिरूपितस्वरूपसंबंधेन पटत्वाद्यवच्छिन्नानधिकरणत्वस्य हेतुमति सत्वेन पटत्वाद्यवच्छिन्नाभावस्यैव प्र-
तियोगिव्यधिकरणस्य सुलभत्वान्न चैतद्विवक्षायाः शङ्कितोऽनाभेनोदरूरतापत्यास्तावत्पर्यन्तनिवेशनं न संभवतीति वाच्यं भवतु केऽप्येतादृशपुञ्जे स्वल्पत्वेन
भवतु न निवेशनस्याप्यसंभवात् स्वत्वस्यापत्स्वरूपतानयान्तत्राप्यव्याप्तिर्दृढैवेसपि कश्चिदिति किंचिदिति दिक् आकाशाभावादिरेवेति आदिना केवलान्वयिधर्मान्तरपरिग्रहः
ननु व्यतिरेकिधर्मवत्केवलान्वयिधर्मस्याप्यव्याप्यवृत्तित्वे बाधकाभावस्तत्राह कालिकतयेत्यादि ननु व्यतिरेकाभावस्य त्व एव दैशिकतयेत्यादिनियमः तत्र दैशिकत-
याप्रतियोग्यनधिकरणदेशस्य प्रसिद्धेः केवलान्वय्यभावस्थले च न तादृशनियमात् तत्र दैशिकतयाप्रतियोग्यनधिकरणदेशस्यैवाप्रसिद्धेः किंतु कालिकतयाप्रति-
योग्यनधिकरणत्वघटितमेव नियमः तथा चाकाशाभावादेरव्याप्यवृत्तित्वे बाधकसत्त्वे आह कालिकतयेति तदवच्छेदेन आत्मावच्छेदेन तदभाव इति कालिकसंबंधेना-
काशाभावाभाव इत्यर्थः एकावच्छेदेनैकत्रैतेन संबंधेन तादृशतत्संबंधावच्छिन्नतदभावयोः संभवादिति भावः तेन संबंधेन तत्त्वमेवोपपादयति आत्मनीति आवश्यकं व्याप्य-
वृत्तिसाध्यकेऽप्यावश्यकं न च आत्मावच्छेदेन तत्काले कालिकसंबंधावच्छिन्नोपन्यः आकाशाभावाभावस्तस्य दैशिकविशेषणतयाऽनंगीकारेण तदवच्छेदेन तत्काले न हि
प्रतियोगी आत्मनि इदानीं कालिकतया आकाशाभावो नास्तीत्यादिप्रतीतेरुपपत्तिरिति चेत् आत्मनि इदानीमाकाशाभाव इत्यादिपूर्वोक्तप्रतीतिविरोधेनास्य तत्का-
लावच्छेदेनात्मादौ तदभावविषयकत्वोपगमात् तच्च विनिगमनाविरहेणोत्पत्तीतिविरोधेन पूर्वोक्तप्रतीतेरेव तत्कालावच्छेदेनात्मादावाकाशाभावविषयकत्वसंभ- एम० ४५
वेनैतत्प्रतीतिबलादेव तत्काले आत्मास्पत्तिः संभवत्येवेति वाच्यं विनिगमनाविरहेणोत्पत्तीतेरपि पूर्वोक्तप्रतीतिविरोधेन तत्कालावच्छेदेनात्मादौ कालिकतयाकाशा

घावच्छेदेन कालिकतया आकाशाभाव

भावाभावविषयकत्वस्यापि वक्तुं शक्यत्वात् अभावच्छेदेन तत्काले कालिकेनयाकाशाभावाभावविषयकत्वान्निर्णयेन तद्भूत्वात्तत्कालेऽप्यात्माद्यवच्छेदेन तादृशाभावासिद्धेः
एवं चेदानीमाकाशाभावः इदानीं कालिकसंबंधावच्छिन्नप्रतियोगिताकाकाशाभावाभाववद्देशवच्छेदकानवगाहि प्रतीतिबलात्कालिकसंबंधेन तयोः कालवृत्ति
त्वे तेन कोऽपि विरोधः इत्यवधेयं यत्तु तत्स्वरूपे हृदि निधायाह संदेहपदं इति सार्वभौममतमाशंक्य निराकरोति दीधितौ न चेति अत्र घटादेरत्यन्ताभावस्य वृत्तितानियामकसं
बंधसामान्येन प्रतियोगिवैयधिकरण्येन सुघटत्वेन तत्र कालिकसंबंधेन प्रतियोगिवैयधिकरण्यस्य दुर्घटत्वादित्याशयेनाह व्याप्याकाशादाविति वृत्तितानिया
मकसंबंधेन। तादृशसंबंधसामान्येन। इत्यतः इत्यस्य स्वरसात्स्य त्वत्कापूर्वसत्त्वेन सर्वमपि तावत् साध्यकेऽपरित्यज्य स्यत्वान्तरानुसरणात्र निर्बीजत्वात् तादृशस्थलपरित्या
गेऽसंदर्भविरोधः इति पत्के स्थितिदूषणमुक्तं तत्त्वौठिवादमात्रं स्वपंक्तव्यत्वाननुसरणोऽपि मतस्य मतान्तरानुवादत्वेनाभ्युपगन्तरेणासंबंधविवक्षायाः फलत्वव
नाय तादृशस्थलपरित्यागेन च संदर्भविरोधाभावात्। एवमग्रेऽपि वस्तुतस्तु ज्ञातिसाध्यकस्यैव यथार्थैतिकृतादृशस्थलान्तरत्वेन तत्रूचातिव्याप्तेः संबंधविवक्षो
पि दुर्वारत्वात् तस्य त्यागस्यैवोचितत्वात् तथा तत्परित्यागस्यावश्यकत्वेन न संदर्भविरोधशंकापीति तिथ्येयं आदिनेति यत्तु आदिपदेनोपात्तस्य हेतोः साध्यस्य च वि
शेषणत्वेनोपादानस्यापुक्तत्वादिदमसंगतमिति तन्न छिन्नत्वेऽपि विशिष्टस्यानतिरिक्तत्वादिति दूषणादानेनैवानौचित्यादिति स्थितिरिक्तत्वमभिमतमित्युपगमेन सत्ता स
मपि ध्यान्तरादि पदेन सत्तीभिन्नस्य विशिष्टसत्त्वस्योपादाने बाधकाभावात् अत एव विशिष्टहेतुकेषु शाखान्तरत्वेन धिकरणत्वादेः स्वत्वाद्यधिकरणेति। तथा च संयो
गीसत्त्वादिघटे च पत्र्किंचित्स्य इत्यपिव्याप्तिरस्तु इति तत्रौवप्रदर्शितेति न दीधितौ तत्तेस्याश्यः भावास्तु यत्किंचित्स्य दानेहेत्वधिकरणावृत्तित्वसामान्याभावस्य साध्याभा
वप्रतियोगित्वस्य सत्त्वेन सर्वत्रैव व्यभिचारिण्यतिव्याप्तिः स्यादित्येन बोक्तेति न दीधितौ न्यूनत्वेसाऊ: हित्वा तच्छिन्नाभावस्पति प्रतियोगितायाप्यामस्य वृत्तित्वाभावादिति भा
वः उक्तातिव्याप्तिनिरासस्तु दिवावच्छिन्नाभावस्य मनोवृत्तिप्रतियोगिकत्वाभावादितिभावः इतिरित्यस्य स्वरसात् यत्तु पूर्वं च विशिष्टसाध्यकेऽतिव्याप्तिप्रदर्शनोऽभंविशिष्टस्याति

२

व्या २

५०प्र रित्वतापत्तेस्तत्संसर्गेनेरस्वरसादभयसाध्यकत्वात्याप्तेः प्रदर्शनेनात्रप्रदर्शितग्रंथविपरीतोपन्यासादित्यसंगतमितितत्त्वचिंतामणिसंदर्भस्य स्वरसप्राप्तत्वात् एवं चमुभयत्वस्यैकविशिष्टाधारत्वस्वरूपत्वेपिक
नायतत्राभिधानात्त्वः विशेष्यपर्याप्तवृत्तिकत्वेति ननु सार्वभौममते विशिष्टस्यातिरिक्तत्वया विशिष्टाभावप्रतियोगिता विशेष्यावृत्तित्वेनयथाश्रुतस्य वातिव्याप्त्यभावे विशिष्टपदोपादा
७६ नमसंगतमितिचेन्नोच्चविशिष्टस्यातिरिक्तत्वे विगुणोसत्ताजातिर्नतु विशिष्टसत्तेमादिप्रतीतिबलेनशुद्धसत्तादावपि विशिष्टाभावप्रतियोगित्वमस्त्वीतितदुपादानेऽव्याप्त्यामनिरा
मात्रस्यवृंतरवच्छेदकत्वेतुशुद्धसत्तात्वेनास्ति अस्मान्नतिरिक्तत्वेनेखावच्छेदकत्वात् अतोनतदुपादानेऽव्याप्तिर्व्याप्तिनिरासः केवलसत्तायाविशिष्टाभावप्रतियोगित्वानुपगमेतुनस्व
दंनरेयमेवेत्याशयेनाहेत्यात्कृचित्तु सामानाधिकरण्यस्याव्याप्यवृत्तित्वे विशिष्टस्यानतिरिक्तत्वेचास्तु येसेवेदंतत्पाहितसत्तानुपादानेकालिकेनद्रव्यादिरूपसमभावप्रति
योगित्वसत्तादेर्गुणादृत्वेसाध्यावच्छेदेनैवद्रव्यादिहिनेत्वाभावसत्तानहृत्वावान्द्रव्यत्वादित्यादावव्याप्तिप्रियाऽवस्थंतेनतत्रेतिभिन्नसच्चाव्यक्ततथाचातिव्याप्तिःतत्पदोपादा
नेचनाहृशाहृत्ति भिन्नत्वप्रतियोगितावच्छेदकावच्छेदेनैववाच्यं इत्याशयइत्याहुः तन्नसर्वमपिविशिष्टस्यानतिरिक्तत्वमताश्रयणेमननसिनतदुभयंगुणेनविशिष्टसत्तेतिप्रती
तेरन्यथोपपादनेनैवदूषणस्योचितत्वेनविशिष्टस्यानतिरिक्तत्वस्वरूपदूषणासंगतेः तुसत्त्वेकालावच्छिन्नसंयोगाभावस्तितदुपत्तिकालावच्छेदेनद्रव्यत्वसमानाधिकरणःसंयोगसा
ध्याभावरसार्थःचकृत्यसामान्यकत्वात्तेनविवक्षणीयं तथावविशिष्टसत्तावाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वादेर्गुणादिवृत्तितानवच्छेदकत्वयानाहृशाभावसंग्र
२५ हेणविशिष्टसत्तावांजातेरित्यादावेवात्तिव्याप्तिरितिभावः नचैवमपिविशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकस्यचैवशिष्ट्यसहितसत्तात्वस्यगुणादिवृत्तितावच्छेदकत्वशुद्धसत्ता
